सह ० ॥ कठोपनिषत्समाप्ता ॥

102. *Bhāvanopanishad*, p. 959: भद्रं ० ॥ ओं । श्रीगुरुपरमकारणभूता शक्तिः । ते नवरंध्ररूपा देहाः । नवशक्तिमयं श्रीचक्रं वारा हि पितृरूपा कुरुकूला (sic) वह्निदेवता । माता पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवकमुद्रा शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्ताः संकल्पाः कल्पतरवः तेजः कल्पको ध्यानं । ०

It ends: तस्य देवतात्मैकसिद्धिः चिंतितकार्याण्ययत्नेन सिध्यंते स एव शिवयोगीति कथ्यते । इत्युपनिषत् ॥ ०

103. *Śrī-Rudrahṛidayopanishad*, p. 963: सह० ॥

ओं हृदयं कुंडली भस्म रुद्राक्षगणदर्शनं ।
तारसारमहावाक्यपंचब्रह्माग्निहोत्रकं ॥
ओं प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मिन्देवाश्च सर्वशः ॥
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवंतु मे ।
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकं ॥
श्रीवेदव्यास उवाच । सर्वदेवात्मको रुद्रः
सर्वे देवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयो ऽग्नयः ॥ ०

It ends:

स यो ह वैतत्परमं ब्रह्म यो वेद वै मुनिः ।
ब्रह्मैव भवति स्वस्थः सच्चिदानंदमात्रक इत्युपनिषत् ॥०

104. *Yogakuṇḍalyupanishad*, p. 967: सह० ॥

ओं हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिंस्तद्द्वावपि विनश्यतः ॥
तयोरादौ समीरस्य जयं कुर्यान्नरः सदा ।
मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥
एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरं ।
सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ॥
भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ।
आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा ॥
ऊर्वोरुपरि चेद्धत्ते उभे पादतले यथा ।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनं ॥ ०

About 160 *ślokas*. It ends:

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्य देहमक्तत्वं (!) पवने स्पंदतामिव ॥
अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् ।
अनाद्यनंतं महतः परं ध्रुवं तदेव शिष्यत्यमलं
निरामयमित्युपनिषत् ॥ ०

105. *Bhasmajābālopanishad*, p. 981: भद्रं० ॥ ओं अथ जाबालो भुसुंडः कैलासशिखरावासमोंकारस्वरूपिणं महादेवमुमार्धकृतशेखरं सोमसूर्याग्निनयनं अमृतेंदुरविप्रभं व्याघ्रचर्मांबरधरं मृगहस्तं भस्मोद्धूलितविग्रहं तिर्यक्त्रिपुंड्ररेखाविराजमानफालप्रदेशं स्मितपूर्णपंचविधपंचाननं वीरासनारूढमप्रमेयमनाद्यनंतं निष्कलं निर्गुणं शांतं निरंजनमनामयं हुंफट्कुर्वाणं शिवनामान्यनिशमुच्चरंतं हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं चतुर्थं ब्रह्मविष्णुरुद्रातीतमेकमाशास्यं भगवंतं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य श्रीफलदलैस्तेन भस्मना च नतोत्तमांगः कृतांजलिपुटः पप्रच्छ देहि भगवन्वेदसारमुद्धृत्य त्रिपुंड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः । किं भस्मनो द्रव्यं कानि स्थानानि ०

It ends: ततश्चाप्रमादेन निवसेदप्रमादेन निवसेत्काश्यां लिंगरूपिणमित्युपनिषत् ॥ भद्रं ० ॥

Digitized by Microsoft®

106. *Rudrajābālopanishad*, p. 993: आप्यायंत्विति शांतिः ॥ ओं अथ हैनं कालाग्निरुद्रं भुसुंडः पप्रछ । रुद्राक्षोत्पत्तिस्तद्धारणा किं फलमिति । तं होवाच भगवान् कालाग्निरुद्रस्त्रिपुरवधार्थमहं निमीलिताक्षो भवन् तेभ्यो जलबिंदवो भूमौ पतितास्ते रुद्राक्षा जाताः सर्वानुग्रहार्थाय तेषां नामोच्चारणमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न [श]क्नोमि । तत्रैते श्लोका भवंति ।

कस्मिन् स्थितं तु किं नाम कथं वा धार्यते नरैः ।
कति भेदमुखान्यत्र कैर्मंत्रैर्धार्यते कथं ॥
दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया ।
भूमावक्षिपुटाभ्यां तु पतिता जलबिंदवः ॥ ०

It ends: ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारगमनतत्संयोगपातकेभ्यः पूतो भवति सर्वतीर्थफलमश्नुते पतितसंभाषणात्पूतो भवति पंक्तिशतसहस्रपावनो भवति । शिवसायुज्यमवाप्नोति न च पुनरावर्तते इत्युपनिषत् ॥ ०

107. *Gaṇapatyupanishad*, p. 999: भद्रं ० ॥ ओं नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्वमसी त्वमेव केवलं कर्तासि त्वमेव्वलं (!) धर्ता त्वमेव केवलं ब्रह्म । त्वं साक्षादात्मासि । नित्यं ऋतं वच्मि सत्यं वच्मि । अवतु मां अवतु वक्तारं । अव दातारं । अव श्रोतारं । ०

It ends:

महापापात्प्रमुच्यते महादोषात्प्रमुच्यते स सर्वविद्भवति ।
स सर्विद्भवति (!) य एवं वेदेत्युपनिषत् ॥ ०

108. *Darśanopanishad*, in 10 sections, p. 1003: आप्यायंत्विति शांतिः ॥

ओं दत्तात्रेयो महायोगी भगवान्भूतभावनः ।
चतुर्भुजो महाविष्णोर्योगसाम्राज्यदीक्षितः ॥
तस्य शिष्यो मुनिवरः सांकृतिर्नाम भक्तिमान् ।
पप्रछ गुरुमेकांते प्रांजलिर्विनयान्वितं ॥
भगवन् ब्रूहि मे योगं साष्टांगं सप्रपंचकं ।
येन विज्ञानमात्रेण जीवन्मुक्तो भवाम्यहं ॥
सांकृते शृणु वक्ष्यामि योगं साष्टांगदर्शनं ।
यमश्च नियमश्चैव तथैवासनमेव च ॥
प्राणायामस्तथा ब्रह्मप्रत्याहारस्ततः परं ।
धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने ॥ ०

It ends:

यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रजगत्कृत्स्नं तदा भवति निर्वृतिः ॥
येन मुक्तः स भगवान् दत्तात्रेयो महामुनिः ।
सांकृतिः स्वस्व(रू)पेण सुखमास्ते (!) विनिर्भयः ॥ आ० ॥

109. *Tārasāropanishad*, in 3 sections, p. 1019: पूर्ण ० ॥ बृहस्पतिरुवाच याज्ञवल्क्यं । यद(नु) कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्मात्क्वच न गच्छेदेवमन्ये ते दिदं (!) वै कुरुक्षेत्रं देवानां देवयजनं । सर्वेषां भूतानां ब्रह्मसदनमविमुक्तं वै कुरुक्षेत्रं । देवानां देवयजनं सर्वेषां ० अयमृग्वेदः प्रथमः ॥

ओमित्येतदक्षरं परं ब्रह्म तदेवोपासितव्यं । ०
यजुर्वेदो द्वितीयः ॥

अथ हैनं भारद्वाजो याज्ञवल्क्यमुवाच । कैर्मंत्रैः परमात्मप्रीतो भवति ०

It ends with *Rigv.* I., 22, 20–1: तद्विष्णोः परमं पदं ० विष्णोर्यत्परमं पदमित्युपनिषत् । सामवेदस्तृतीयः पादः ॥ पूर्ण ० ॥

110. *Mahāvākyopanishad*, p. 1023: भद्रं ० ॥ ओं अथ होवाच ब्रह्मा अपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः । गुह्याद्गुह्यतरमेषा न प्राकृतायोपदेष्टव्या । सात्विकायांतर्मुखाय परिशिश्रूषवे (!) । अथ संसृतिबंधमोक्षयोर्विद्याविद्ये चक्षुषी । उपसंहृत्य विज्ञाय । अविद्यालोकांडसमो दृक् । तमोमोहशरीरप्रपंचमाब्रह्मस्थावरांतं अनंताखिलाजांडभूतं । निखिलनिगमोदितसकामकर्मव्यवहारो लोकः । नैषोंधकार अयमात्मा । ०

It ends: सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमवाप्नोतीत्युपनिषत् ॥ भद्रं ० ॥

111. *Pañcabrahmopanishad*, p. 1025: सह ० ॥ ओं अथ पैप्पलादो भगवान् । भो किमादौ किं जातमिति सद्यो जातमिति । किं भगव इति अघोर इति । किं भगव इति वामदेव इति । किं वा पुनरिमे भगव इति तत्पुरुष इति । किं वा पुनरिमे भगव इति तत्पुरुष इति (!) । सर्वेषां दिव्यानां प्रेरयिता ईशान इति ईशानो भूतभव्यस्य सर्वेषां देवयोनीनां कति वर्णाः कति भेदाः कति शक्तयो यत्सर्वं तद्गुह्यं तस्मै नमो महादेवाय महारुद्राय प्रोवाच तस्मै भगवान्महेशः ।

गोप्याद्गोप्यतरं लोके यद्यस्ति शृणु शाकल ।
सद्योजातं मही पूषा रमा ब्रह्म त्रिवृत्स्वरं ॥ ०

It ends:

अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः ।
तेनायं हृदयं प्रोक्तं शिवः संसारमोच (!) इत्युपनिषत् ॥
सह ० ॥

Digitized by Microsoft®

112. *Prāṇāgnihotropanishad,* p. 1029: सह ० ॥ ओं अथातः सर्वोपनिषत्सारं संसाराज्ञानातीतमन्त्रसूक्तं शारीरयज्ञं व्याख्यास्यामो यस्मिन्नेव पुरुषः शरीरे विनाप्यग्निहोत्रेण विनापि सांख्येन संसारविमुक्तिर्भवतीति । ० See *Āth. Up.*, p. 260 *seq.* This MS. has no sectional division.

113. *Gopāla-pūrvatāpanīyopanishad,* p. 1033: भद्रं ० ॥ ओं सच्चिदानंदरूपाय ०

It ends: तं भजेद् ओं तत्सदित्युपनिषत् ॥ भद्रं ० ॥

114. *Gopāla-uttaratāpanīyopanishad,* p. 1039: भद्रं ० ॥ एकदारो (!) व्रजस्त्रियः सकामाः ०

It ends: गच्छध्वं स्वालयांतिकं ॥ इत्युपनिषत् ॥ भद्रं ० ॥

115. *Kṛishṇopanishad,* p. 1047: भद्रं ० ॥ ओं श्रीमहाविष्णुं सच्चिदानंदलक्षणं रामचंद्रं दृष्ट्वा सर्वांगसुंदरं मुनयो वनवासिनो विस्मिता बभूवुस्तं होचुः । नो वद्यमवतारा वै गण्यंते आलिंगामो भवंतमिति भवांतरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिंगथ । अन्ये ऽवतारास्ते हि गोपालस्त्रीश्च नो कुरु (!) अन्योन्यविग्रहं नाथार्थं तवांगस्पर्शनादिह शश्वत्स्पर्शयितास्माकं गृहामो लता वयं ।

रुद्रादीनां वचः श्रुत्वा प्रोवाच भगवांत्स्वयं ।
अंगसंगं करिष्यामि भवद्वाक्यं करोम्यहं ॥ ०

It ends:

तस्मान्न भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ।
भूमावुत्तारितं सर्वं वैकुंठस्वर्गवासिनामित्युपनिषत् ॥ ०

116. *Yājñavalkyopanishad,* p. 1049: पूर्ण ० ॥ ओं अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच । भगवन्संन्यासमनुब्रूहीति । कथं संन्यासलक्षणं । स होवाच याज्ञवल्क्यः । ब्रह्मचर्यं समाप्य गृही भवेद् गृहाध्वनि भूत्वा प्रव्रजेद् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वाथ पुनरव्रती वा व्रती वास्नातको वा स्नातको वा उत्पन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्तद्धैके प्राजापत्यामेवेष्टिं कुर्वंत्यथ ह न कुर्यादाग्नेयामेव कुर्यादग्निर्हि प्राणः प्राणमेवैतया करोति । त्रैधातवीयामेव कुर्यादेतदेव त्रयो धातवो यदु तत्सत्वं रजस्तम इति । अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिमित्यनेन (V. *S.* III., 14; *Taitt. S.* I. 5, 5, 2) मंत्रेणाग्निमाजिघ्रेदेष वा अग्नेर्योनिर्यः प्राणं गच्छ स्वायोनिं (!) गच्छ स्वाहेत्य०

It ends:

यतीनां तदुपादेयं पारहंस्यं परं पदं ।
नातः परतरं किंचिद्विद्यते मुनिपुंगवेत्युपनिषत् ॥
पूर्ण ० ॥

117. *Varāhopanishad,* in 5 adhyāyas, p. 1053: सह ० ॥ ओं अथ ऋभुर्वै महामुनिर्देवमानेन द्वादशवत्सरं तपश्चचार । तदवसाने वराहरूपी भगवान् प्रादुरभूत् स होवाचोत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति । सो ऽवतिष्ठत्तस्मै नमस्कृत्योवाच भगवन् कामिभिर्यद्यत्कामितं तत्तत्त्वत्सकाशात् स्वप्नेन याचे समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुरस्त्वद्रूपप्रतिपादिकां (!) ब्रह्मविद्यां ब्रूहीति होवाच तथेति स होवाच वराहरूपी भगवान् ।

चतुर्विंशति तत्वानि केचिदिच्छंति वादिनः ।
केचित् षत्रिंशत् (! षट् ० ?) तत्वानि केचित्पणवतीति च ॥
तेषां क्रमं प्रवक्ष्यामि सावदानमना शृणु ।
ज्ञानेंद्रियाणि पंचैव श्रोत्रत्वग्लोचनादयः ॥ ०

It ends: स्वर्णस्तेयात्पूतो भवति । तदेतदृचाभ्युक्तं । तद्विष्णोः परमं पदं ० *Ṛigv.* I. 22, 20–21, ० परमं पदमित्युपनिषत् । पंचमोध्यायः ॥ सह ० ॥

118. *Śāṭyāyanīyopanishad,* p. 1071: पूर्ण ० ॥

ओं मन एव मनुष्याणां कारणं बंधमोक्षयोः ।
बंधाय विषयासक्तं मुक्तैर्निर्विषयं स्मृतं ॥
समासक्तं यदा चित्तं जंतोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात्तत् को न मुच्येत बंधनात् ॥
चिंतमेव (!) हि संसारस्तत्प्रयत्नेन शोधयेत् ।
यच्चित्तस्तन्मनो भवति (!) गुह्यमेतत्सनातनं ॥
नावेदविन्मनुते तं बृहंतं
नाब्रह्मवित्परमं प्रीतिधाम ।
विष्णुक्रांतं वासुदेवं विजानन्
विप्रो विप्रत्वं गच्छेत्तत्वदर्शी ॥ ०

It ends:

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
स ब्रह्मवित्परं प्रेयादिति वेदानुशासनमित्युपनिषत् ॥
पूर्ण ० ॥

119. *Hayagrīvopanishad,* p. 1075: भद्रं ० ॥ ओं नारदो ब्रह्माणमुपसमेत्योवाच । अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां । ययाचिरात्सर्वपापं व्यपोह्य ब्रह्मविद्यां लब्ध्वा

Digitized by Microsoft ®

ऐश्वर्यवान्भवति । ब्रह्मोवाच हयग्रीव दैवत्यान्मंत्रान्यो दि (!) वेद स श्रुतिस्मृतेतिहासपुराणानि वेद स सर्वैश्वर्यवान्भवति त एते मंत्राः ।

विश्वोत्तीर्णस्वरूपाय चिन्मयानंदरूपिणे ।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे
स्वाहा स्वाहा नमः ॥

ऋग्यजुः सामरूपाय वेदाहारणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः
स्वाहा स्वाहा नमः ॥

उद्गीथो प्रणवोद्गीथ सर्ववागीश्वरेश्वर ।
सर्ववेदमयाचिंत्य सर्वं बोधय बोधय
स्वाहा स्वाहा नमः ॥

हयग्रीवमंत्राणास्य ब्रह्मात्रिरपि सपितृभार्गव ऋषयः । गायत्रीत्रिष्टुबनुष्टुप्छंदांसि । श्रीमान्हयग्रीवः परमात्मा देवतेति ह्लोमिति बीजं ।०

It ends: ओं नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्ढं ममामुष्यमोमित्युपनिषत् ॥ भद्रं ० ॥

120. *Dattātreyopanishad,* p. 1079 : भद्रं ० ॥ सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं ततो ब्रूहीति भगवन्नित्युक्तः सत्यानंदचिदात्मकं सात्त्विकं मामकं धामोपास्स्वेत्याह सदा तत्रोहमस्मीति (!) प्रत्येतत्पदंति येन ते संसारिणो भवंति नारायणेनैवं विवक्षितो ब्रह्मा विश्वरूपधरं विष्णुं नारायणं दत्तात्रेयं ध्यात्वा तद्वदति । दमिति ह्रस्वं दामिति दीर्घं तद्बीजं नाम बीजस्थं द्रामित्येकाक्षरं भवति तदेतत्तारकं भवति तदेवोपासितव्यमिति ज्ञेयं गर्भादितारणं । गायत्री छंदः सदाशिव ऋषिः दत्तात्रेयो देवता वटबीजस्थमिव दत्तबीजस्थं सर्वं जगत् ।०

It ends: तस्मात् शिष्यं भक्तं प्रतिगृह्णीयात्सोऽनंतफलमश्नुते स जीवन्मुक्तो भवतीत्याह भगवान्नारायणो ब्रह्माणमुपनिषत् ॥ भद्रं ० ॥

121. *Gāruḍopanishad,* p. 1083 : भद्रं ० ॥ ओं ॥ गारुडं ब्रह्मविद्यां प्रवक्ष्यामि यां ब्रह्मा विद्यां (!) नारदाय प्रोवाच । नारदो बृहत्सेनाय बृहत्सेन इंद्राय इंद्रो भरद्वाजाय भरद्वाजो जीवत्कामेभ्यः (!) शिष्येभ्यः प्रायच्छत् । अस्य श्रीगारुडब्रह्मविद्याया ब्रह्मा ऋषिः गायत्री छंदः श्रीभगवान्महागरुडो देवता श्रीमहागरुडप्रीत्यर्थं मम सकलविषविनाशनार्थे जपे विनियोगः । ओं नमो भगवते अंगुष्ठाभ्यां नमः । श्रीमहागरुडाय तर्जनिभ्यां स्वाहा । पक्षींद्राय मध्यमाभ्यां वौषट् । श्रीविष्णुवल्लभाय । अनामिकाभ्यां हुं । त्रैलोक्यपरिपूजिताय कनिष्ठिकाभ्यां वौषट् । उग्रभयंकरकालानलरूपाय । करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासः । भूर्भुवःसुवरोमिति दिग्बंधः । ध्यानं

स्वस्तिको दक्षिणं पादं वामपादं तु कुंचितं ।
प्रांजलीकृतदोर्युग्मं गरुडं हरिवल्लभं ॥

अनंतो वामकटको यज्ञसूत्रं तु वासुकिः ।
तक्षकः कटिसूत्रं तु हरिः कर्कोट उच्यते ॥

पद्मो दक्षिणकर्णे तु महापद्मस्तु वासके ।
शंखः शिरः प्रदेशे तु गुळिकस्तु भुजांतरे ॥

पौंड्रकाळिकनागाभ्यां चामराभ्यां सुवीजितं ।
एलापुत्रकनागाद्यैः सेव्यमानं मुदान्वितं ॥

कपिलाक्षं गरुत्मंतं सुवर्णसदृशप्रभं ।
दीर्घबाहुं बृहत्स्कंधं नागाभरणभूषितं ॥

आजानुतः सुवर्णाभमाकट्योस्तुहिनप्रभं ।
कुंकुमारुणमाकंठं शतचंद्रनिभाननं ॥

नीलाग्रं नासिकावक्त्रं सुमहच्चारुकुंडलं ।
दंष्ट्राकराळवदनं किरीटमकुटोज्ज्वलं ॥

कुंकुमारुणसर्वांग कुंदेंदुधवलानन ।
विष्णुवाह नमस्तुभ्यं क्षेमं कुरु सदा मम ॥

एवं ध्यायेत् त्रिसंध्यासु गरुडं नागभूषणं ।
विषं नाशयते शीघ्रं तूलराशीनिवानलः ॥

ओं ईं ओं नमो भगवते श्रीमहागरुडाय पक्षींद्राय विष्णुवल्लभाय त्रैलोक्यपरिपूजिताय । उग्रभयंकरकालानलरूपाय वज्रनखाय वज्रतुंडाय वज्रदंताय वज्रदंष्ट्राय वज्रपुच्छाय वज्रपक्षालक्षितशरीराय । ओं ईं एह्येहि श्रीमहागरुडाप्रतिहतशासनास्मिन्नाविशाविश दुष्टानां विषं दूषय दूषय । स्पृष्टानां विषं नाशय नाशय ० etc., this forming little more than one fourth of the whole. Comp. Prof. Weber's text, *Ind. Stud.* xvii. p. 161.

It ends: सर्वं जनेन मुंचति तृणेन मुंचति । काष्ठान्मुंचतीत्याह भगवान् ब्रह्मेत्युपनिषत् । भद्रं ०

122. *Kalisaṃtaraṇopanishad,* p. 1087 : सह ० ॥ ओं ॥ द्वापरांते नारदो ब्रह्माणं जगाम । कथं भगवन्

Digitized by Microsoft ®

गां पर्यटन् कलिं संतरेयमिति स होवाच ब्रह्मा साधु पृष्टो ऽस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूलकलिर्भवति (!)। नारदः पुनः पप्रच्छ तन्नाम किमिति। स होवाच हिरण्यगर्भः।

हरे राम हरे राम राम राम हरे हरे।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥
इति षोडशकं नाम्नां कलिकल्मषनाशनं।
नातः परतरोपायः सर्ववेदेषु दृश्यते॥

इति षोडशकलावृतस्य जीवस्यावरणविनाशं संततः। प्रकाशते परब्रह्म।° about as much more.

123. *Jābālopanishad*, p. 1089 : आप्यायंत्विति शांतिः॥ ओं अथ हैनं भगवंतं जाबालिं पैप्पलादिः पप्रच्छ भगवन्मे ब्रूहि परमतत्वरहस्यं। किं तत्वं। को जीवः। कः पशुः। क ईशः। को मोक्षोपाय इति। स तं होवाच। साधु पृष्टः सर्वं निवेदयामि यदा ज्ञातमिति। पुनः स तमुवाच। कुतस्त्वया ज्ञातमिति। पुनः स तमुवाच षडाननादिति। पुनः स तमुवाच। तेनाथ कुतो ज्ञातमिति पुनः स तमुवाच। तेनेशानादिति पुनः स तमुवाच। कथं तस्मात्तेन ज्ञातमिति°

It ends : सकलरुद्रमंत्रजापी भवति। न स पुनरावर्तते° इति। ओं सत्यमित्युपनिषत्॥ आप्या°॥

124. *Saubhāgyalakshmyupanishad*, in three sections, p. 1091 : वाङ्मे°॥ अथ भगवंतं देवा ऊचुर्हे भगवन् कथय सौभाग्यलक्ष्मीविद्यां तथेत्यवोचद्भगवानादिनारायणः। सर्वे देवा यूयुसावधामना(!)भूत्वा शृणुत तुरीयरूपां तुरीयातीतां सर्वोत्कटां सर्वमंत्रासनगतां पीठोपपीठदेवतापरिवृतां चतुर्भुजां श्रियं हिरण्यवर्णामिति (!) पंचदशर्ग्भिः ध्यायथ अथ पंचदृगात्मकस्य श्रीसूक्तस्यानंदकर्दमचिक्लीतेंदिरासुता ऋषयः। श्रीरित्याद्य ऋचश्चतुर्दशानामृचामानंदाद्यृषयः।°

It ends : स सकलधनधान्यपुत्रकलत्रहयभूगजपशुमहिषीदासीदासयोगज्ञानवान्भवति। स न पुनरावर्तत इत्युपनिषत्॥ वाङ्मे°॥

125. *Sarasvatīrahasyopanishad* (11 sections), p. 1095 : सह°॥ ओं॥ ऋषयो ह वै भगवंतमाश्वलायनं संपूज्य पप्रच्छुः।

केनोपायेन तद् ज्ञानं तत्वार्थावभासकं (!)।
यदुपासनया तत्वं जानासि भगवन्वद॥
सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया।
स्तुत्वा जप्त्वा परां सिद्धिमलभ्य (!) मुनिपुंगवाः॥
ऋषय ऊचुः। कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत।
महासरस्वती येन तुष्टा भगवती वद॥

स होवाचाश्वलायनः। अस्य सरस्वतीदशश्लोकमहामंत्रस्य महाश्वलायनो भगवानृषिः। अनुष्टुप् छंदः। श्रीवागीश्वरी देवता। यद्वागिति बीजं। देवीं वाचमिति शक्तिः। प्र णो देवीति कीलकं।°

It ends :

मयि जीव त्वमीशत्वं कल्पितं वस्तुतो न हि।
इति यस्तु विजानाति स मुक्तो नात्र संशय इत्युपनिषत्॥ सह°॥

126. *Bahvṛicopanishad*, p. 1101 : वाङ्मे°॥ ओं देवी ह्येकाग्र आसीत्। सैव जगदंडमसृजत। कामकलेति विज्ञायते। तस्या एव ब्रह्मा अजीजनत्। रुद्रो अजीजनत्। सर्वे मरुद्गणा अजीजनत्(!)। गंधर्वाप्सरसकिन्नरा वादित्रवादिनः समं तदजीजनत्। भोग्यमजीजनत्। सर्वमजीजनत्। सर्वं शाक्तमजीजनत्। अंडजं स्वेदजमुद्भिज्जं जरायुजं यत्किंचैतत् प्राणि स्थावरजंगमं मनुष्यमजीजनत्।° about twice as much more.

127. *Muktikopanishad*, p. 1103 : पूर्ण°॥ ओं॥

अयोध्यानगरे रम्ये रत्नमंडपमध्यमे।
सीताभरतसौमित्रिशत्रुघ्नाद्यैः समन्वितं॥
सनकाद्यैर्मुनिगणैर्वशिष्ठाद्यैः शुकादिभिः।
अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशं॥
धियां क्रियासहस्राणां साक्षिणं निर्विकारिणं।
स्वरूपध्याननिरतं समाधिविरमे हरिं॥
भक्त्या शुश्रूषया रामं स्तुवन्पप्रच्छ मारुतिः।
राम त्वं परमात्मासि सच्चिदानंदविग्रहः॥°

It ends :

जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते।
विशत्यदेहमुक्तत्वं पवनोऽस्पंदतामिव॥

तदेतदृचाभ्युक्तं। तद्विष्णोः परमं पदं° परमं पदं॥ ओं सत्यमित्युपनिषत्॥ पूर्ण°॥

[128. *Mahāvākyaratnāvali*, p. 1115 : श्रीमद्विश्वाधिष्ठानसद्गुरुरामचंद्राय नमः॥

ये विद्या द्विदेहांता (!) महावाक्यार्थविग्रहः।
श्रीरामचंद्ररूपाय तस्मै भूतात्मने नमः॥

Digitized by Microsoft®

यः पूज्यो यतिभिः स्वधर्मनिरतैर्ध्यायंति ये योगिनो
येनांतं निगमांतवेद्यमनिशं यस्मै हविर्दीयते ।
यस्मात्स्थावरजंगमं समभवद् यस्यांशमात्रो वरो
यस्मिन् तेनमिदं (? तान०) प्रणौमि सततं
श्रीवासुदेवं गुरुं ॥

नत्वा श्रीवासुदेवेंद्रपारं पंके महद्वयं ।
ग्रथ्यते वै महावाक्यरत्नावलिरियं मया ॥

अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः। तत्रैकविंशतिशाखा ऋचः । नवाधिकशतशाखा यजुषः । सहस्रशाखाः साम्नः । पंचाशच्छाखा अथर्वणस्य । एकैकस्याः शाखाया एकैकोपनिषत्। आहत्याशीत्यधिकशतसहस्रसंख्याका उपनिषदः। तासु श्रीरामचंद्रेण रामदूताय सारतरोपनिषद अष्टोत्तरशतसंख्याका उपदिष्टाः । तदा च मुक्तिकोपनिषद्यष्टोत्तरशतोपनिषन्नामश्लोका * लिख्यंते ।

ईशकेनकठप्रश्नमुंडमांडूक्यतित्तिरि ।
ऐतरेयं च छांदोग्यं बृहदारण्यकं तथा ॥ १ ॥

ब्रह्मकैवल्यजावालाः श्वेताश्वो हंस आरुणिः ।
गर्भो नारायणो हंसो विंदु नादशिरः शिखा ॥ २ ॥

मैत्रायणी कौषीतकी बृहज्जावालतापिनी ।
कालाग्निरुद्रो मैत्रेयी सुबालक्षुरिमंत्रिकाः ॥ ३ ॥

सर्वसारं निरालंबं रहस्यं वज्रसूचिकं ।
तेजोनादध्यानविद्यायोगतत्वात्मबोधकं ॥ ४ ॥

परिव्राट् त्रिशिखी सीता चूडा निर्वाणमंडलं ।
दक्षिणा शरभं स्कंदं महानारायणाद्वयं ॥ ५ ॥

रहस्यं रामतपनं वासुदेवं च मुद्गलं ।
शांडिल्यं पैंगलं भिक्षु महः शारीरकं शिखा ॥ ६ ॥

तुरीयातीतसंन्यासपरिव्राजाक्षमालिकाः ।
अव्यक्तैकाक्षरं पूर्णसूर्याक्ष्यध्यात्मकुंडिकाः ॥ ७ ॥

सावित्र्यात्मपाशुपतं परं ब्रह्मावधूतकं ।
त्रिपुरातपनं देवी त्रिपुराकठभावनाः ॥ ८ ॥

हृदयं कुंडली भस्म रुद्राक्षगणदर्शनं ।
तारसारमहावाक्यं पंचब्रह्माग्निहोत्रकं ॥ ९ ॥

गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकं ।
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडं ॥ १० ॥

कलिजावालसौभाग्यं रहस्य ऋचमुक्तिकेति ।
तत्र दशोपनिषद ऋग्वेदगताः। शुक्लकृष्णभेदेन यजुष्येकपंचाशत् । तत्र शुक्लयजुष्येकोनविंशतिः । कृष्णयजुषो द्वात्रिंशत् । साम्नां षोडश । अथर्वणस्यैकत्रिंशत् । आहत्याष्टोत्तरशतं । तत्र गौडपदाचार्यैर्मांडूक्योपनिषद्व्याख्याता । श्रीमच्छंकरभगवत्पादाचार्यैर्दशोपनिषदः । पंच रुद्रान्वर (!) । नृसिंहतापिनी च शंकरानंदैः सदाशिवब्रह्मेंद्रैः स्वयंप्रकाशानंदाद्यैश्च द्वात्रिंशोपनिषदः। विद्यारण्याचार्यैरष्टोत्तरशतोपनिषद्व्याख्याता ॥ प्रकृते तु

रामचंद्रेणोपदिष्टे रामदूताय धीमते ।
ईशाद्यष्टोत्तरशतोपनिषद्यादसांपतौ (!) ॥
निमज्ज्यात्र महावाक्यरत्नावलिरुदाहृता ।
विभाव्यते विभागेन सा त्रयोदशधा पुनः ।
तत्रादौ विधिवाक्यानि बंधमोक्षपराणि च ।
अज्ञानिनिंदावाक्यानि जगन्मिथ्यापराणि च ॥
ततोपदेशवाक्यानि जीवात्मैक्यपराणि च ।
ब्रह्मविन्मनसाख्यानि जीवन्मुक्तिपराणि च ॥
ब्रह्मानुभूतिरूपाणि स्वसमाधिपराणि च ॥
अष्ट स्वरूपवाक्यानि फलवाक्यान्यसंततं ।
विदेहमुक्तिवाक्यानि लिख्यंते निश्चितात्क्रमात् ॥
यः स्वाश्रमाचाररतः परिव्राड् विजितेंद्रियः ।
सोऽधिकारी महावाक्यरत्नावल्यां तु नेतरे ॥
वाक्पूर्णसहनाप्यायं भद्रं कर्णेभिरेव च ।
पंचशांतिः पठित्वादौ पठेद्वाक्यान्यनंतरं ॥ ०
तत्र सार्वौतिकविधिवाक्यानि । ०

129. *Śvetāśvataropanishad*, in six adhyāyas, with *Vijñānātman's* commentary (*vivaraṇa*), p. 1163 : मूलं ॥ हरिः ओं ॥ ब्रह्मवादिनो वदंति ।

किं कारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च संप्रतिष्ठा ।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थां ॥ १ ॥

श्रीगुरुभ्यो नमः ॥ हरिः ओं ॥
अवच्छेदत्रयातीतनिर्मलज्ञानमूर्तये ।
मनो गिरां विदूराय दक्षिणामूर्तये नमः ॥ ०

See further on.

* On this enumeration of the *Upanishads*, and their distribution among the several Vedas, see Sir W. Elliot, *Journal of the Asiatic Society*, Bengal, 1851, p. 607 *seq.*; A. Weber, *Ind. Stud.* iii., p. 324 *seq.*

Digitized by Microsoft®

495.

2783b. Foll. 7; size 11 in. by $4\frac{1}{2}$ in.; well written, in the Devanāgarī character, about A.D. 1600; 14–16 lines in a page.

Māṇḍūkyopanishad with the *Gauḍapādīya Kārikās*; in four *prakaraṇas*.

The 1st *prakaraṇa*, the prose (or *upanishad*) portions of which are marked in red, ends: इति माण्डूकोपनिषत् समाप्ता ॥ the 2nd *p.*, like the rest, in *ślokas*: इति द्वितीयं वैतथ्याख्यं प्रकरणमुपनिषदं व (च?) स्मृतिं रूपं माण्डूक्योपनिषदपेक्षया द्वितीयत्वम् ॥ the 3rd *p.*: इत्यद्वैताख्यं प्रकरणं उपनिषत् ॥ the 4th *p.*: इत्यलातशान्ताख्यं चतुर्थं प्रकरणमुपनिषत् समाप्तम् (!) ॥

Edited, with *Śaṅkarācārya's* and *Ānandagiri's* commentaries, by Dr. E. Röer, in the *Bibl. Ind.*, 1850. Translated by the same, 1853.

[COLL. OF FORT WILLIAM.]

496.

1454e. Foll. 67; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī; nine lines in a page. Modern.

Śaṅkarācārya's commentary on the *Māṇḍūkyopanishad* including the *Gauḍapādīya Kārikās*.

It ends: इति श्रीगोविंदभगवत्पादपूज्यशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतावागमशास्त्रविवरणे ऽलातशांत्याख्यं चतुर्थं प्रकरणं समाप्तं ॥

[H. T. COLEBROOKE.]

497.

1084a. Foll 90; size $13\frac{1}{2}$ in. by 5 in.; well written, in the Devanāgarī character; twelve lines in a page.

Ānandagiri's gloss on *Śaṅkara's* commentary on the *Māṇḍūkyopanishad*, and the *Gauḍapādīya Kārikās*.

Dated Saṃvat 1852. [H. T. COLEBROOKE.]

498.

992. Foll. 89; size 13 in by 5 in.; legibly written, in the Devanāgarī character; 9–11 lines in a page.

Another copy of *Ānandagiri's Māṇḍūkyopanishad-bhāshyaṭīkā*.

Written in Saṃvat 1737, by one *Śivarāma*, son of *Śrī Kuvera*. [H. T. COLEBROOKE.]

499.

138f. Foll. 18; size 10 in. by $4\frac{1}{4}$ in.; fairly written, in the Devanāgarī character; eleven lines in a page.

Śaṅkarācārya's commentary on the *Kenopanishad* [*Keneshitapadabhāshya*].

Dated Saṃvat 1847.

The *Kena* (*Keneshita*) or *Talavakāra-upanishad* forms part of the *Jaiminīya* (or *Talavakāra*)-*Brāhmaṇa* of the *Sāmaveda*, recently discovered by Dr. Burnell. It has been edited, with *Śaṅkara's* and *Ānandagiri's* commentaries, by Dr. E. Röer, *Bibl. Ind.* 1850; translated by Rajah Rammohun Roy, 1816 (2nd ed., 1832); by Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, I. (1879).

[H. T. COLEBROOKE.]

500.

138g. Foll. 11; size and writing as the preceding MS.

Ānandajñānagiri's gloss on *Śaṅkarācārya's* commentary [*Talavakāropanishad-bhāshyaṭippaṇa*]. [H. T. COLEBROOKE.]

501.

1095B. Foll. 7; size 12 in. by $5\frac{1}{2}$ in.; legibly written, in Devanāgarī, on European paper; 14–16 lines in a page.

The same work. [H. T. COLEBROOKE.]

Digitized by Microsoft ®

502.

1355f. Foll. 20; size 10½ in. by 4½ in.; well written, in Devanāgarī, about A.D. 1700; fourteen lines in a page.

a) Another copy of *Ānandajñāna's* gloss. It ends, fol. 7:

यो ऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धबोधांबुधिः साक्षात्सोऽहं नित्योऽभयः प्रभुः ॥ १ ॥

इति श्रीशांकरस्य तलवकारोपनिषत्पदभाष्यटिप्पणं समाप्तं ॥ The work is marked के० प० भ० टी० in the margin.

b) *Keneshitavākya-bhāshyaṭippaṇa*, a gloss on *Śaṅkara's Kenopanishadvākyavivaraṇa*, the same as that by which the latter work is followed in the next MS.

It is marked के० वा० भा० टी० in the margin. [H. T. COLEBROOKE.]

503.

964b. Foll. 52; size 9¼ in. by 3¾ in.; fairly written, in the Devanāgarī character; nine lines in a page. Modern.

a) *Śaṅkarācārya's Kenopanishad-vākyavivaraṇa.* It begins:

समाप्तं कर्मात्मभूतप्राणविषयं विज्ञानं कर्म चानेकप्रकारं० It ends, fol. 24:

इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ तलवकारोपनिषत्केनोपनिषदि वाक्यविवरणं समाप्तं ॥

b) *Keneshitavākya-bhāshyaṭippaṇa*, a gloss on the preceding work. It begins:*

प्रयत्नाद्यंतरेणैव मनआदेः प्रवर्तकं ।
विदिताविदितान्यत्वसिद्धं ब्रह्माहमद्वयं ॥

केनेषितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो व्याख्यायापि न तुतोष भगवान्भाष्यकारः शारीरकैर्न्यायैरनिर्णीतार्थत्वादिति न्यायप्रधानैः श्रुत्यर्थसंग्राहकैर्वाक्यैर्व्याचिख्यासुः पूर्वकांडेन संबंधमभिधित्सुः पूर्वकांडार्थं संक्षेपतो दर्शयति । समाप्तमिति०

It ends:

सत्यकामः स्वयंसिद्धः सर्वेशो यः स्वशक्तितः ।
स एतांतः प्रविष्टो ऽस्मनुपास्यः सर्वदेहिनां ॥ १ ॥

[H. T. COLEBROOKE.]

* One or two mistakes of the scribe have been corrected with the help of MS. 1355f.

504.

1317b. Foll. 72; size 12 in. by 4½ in.; legibly written, in the Devanāgarī character; 7–9 lines in a page. Modern.

Kenopanishad, with a commentary by *Bāla Kṛishṇānanda*, ruler of *Śrutinagara*.

The comment begins:

समाधावंभोधौ स्फुरदमृतमाधुर्यमहिते
शरद्राकाचंद्रः सकलकलिकामोदमधुरः ।
सदद्वैतानंदः शमरसमहिम्ना समरसो
विवर्तानामादिर्विविधघटनानां विजयते ॥ १ ॥
श्रुत्यंतांबुजमोदने दिनमणिश्चिंतामणिश्चिंतितः
स्वात्मानंदपुमर्थपूर्णतरसद्विश्राणने विश्रुतः ।
यो विश्रांतिसुरद्रुमो भवभवप्रोद्दामतापश्रमे
सोयं शंकरभिक्षुशेखरमणिश्चित्ते चिरं वर्ततां ॥ २
पुराणं पुण्यानामवधिर० ३ ॥
भगवत्पादवचनमणिदीपावलंबनात् ।
निवृत्तहृदयध्वांतः स्वात्मानमवलोकये ॥ ४ ॥
श्रीधरमार्यं श्रीमत्स्वयंप्रकाशार्यगोपालौ ।
शिवरामं पुरुषोत्तमपूर्णानंदौ च गुरुकुलं कलये ॥ ५ ॥
स्वचेतःसंशुद्धिं ननु तलवकारश्रुतिशिरो
गिरामालंबेनापनयपरिपाटीमपनयन् ।
मुहुर्बालो नव्यद्रविडमुनिरुन्निद्रनयनो
यतिः कृष्णानंदः श्रुतिनगरनेता वितनुते ॥ ६ ॥

केनेषितमित्याद्या छंदोगांतर्गतानां तलवकारिणां ब्रह्मविद्यापरोपनिषत् ॥ ०

Foll. 1–13 contain the introduction.

The commentary ends: न तु साधारणजनः इत्यर्थः द्विरुक्तिर्विद्यासमाप्तिमवगमयति ॥ इति श्रीमत्परमहंस ॥ (!)

[H. T. COLEBROOKE.]

Digitized by Microsoft®

505.

583. Foll. 17; size 11 in. by $4\frac{1}{4}$ in.; legibly written, in the Devanāgarī character, in the early part of the last century; 10–14 lines in a page.

Śaṅkarācārya's commentary (*bhāshya* or *vivaraṇa*) on the *Muṇḍakopanishad.*

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, in the *Bibl. Ind.*, 1850. The *upanishad* has been translated by Rajah Rammohun Roy, 1819 (2nd ed., 1832); by L. Poley (French), 1836; by Dr. E. Röer (1853); by F. M. Müller, *Sacred Books of the East*, xv. (1884).

[H. T. Colebrooke.]

506.

1625A. Foll 27; size $8\frac{1}{4}$ in. by 4 in.; fairly written in the Devanāgarī character, about A.D. 1650; 11–13 lines in a page.

The same work.

[H. T. Colebrooke.]

507.

1095C. Foll. 25; size 12 in. by $4\frac{3}{4}$ in.; fairly written, in the Devanāgarī character, in the latter part of the 17th century; 10–12 lines in a page.

The same work.

[H. T. Colebrooke.]

508.

1454b. Foll. 30; size $10\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; nine lines in a page. Modern.

Another copy of *Śaṅkarācārya's Muṇḍakopanishadbhāshya.*

[H. T. Colebrooke.]

509.

1454c. Foll. 13; size $10\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; eleven lines in a page. Modern.

Ānandagiri's Muṇḍakabhāshyaṭippaṇa.

[H. T. Colebrooke.]

510.

1878b. Foll. 30; size $12\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; nine or ten lines in a page. Modern.

The *Muṇḍakopanishad,* with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The commentary begins:

मुंडकं मुंडमार्गस्थं ब्रह्मात्मैक्यावबोधकं शंकराचार्यमार्गेणैव पदे पदे ब्रह्मविद्याया अतिदुर्लभत्वं दर्शयितुं इतिहासरूपेण श्रुतिः प्रथमतो गुरुपरंपरामाह । ब्रह्मा ब्रह्मांडजः ०

[Dr. John Taylor.]

511.

1454a. Foll. 39; size $10\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; ten lines in a page. Modern.

The *Kāṭhakopanishad* with *Śaṅkarācārya's* commentary.

The commentary begins: ओं नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च ०

[H. T. Colebrooke.]

512.

1364b. Foll. 28; size $10\frac{1}{2}$ in. by $4\frac{3}{4}$ in.; Devanāgarī character; indifferent handwriting of the earlier part of last century; twelve or thirteen lines in a page.

Śaṅkarācārya's Kāṭhakabhāshya.

It begins: नमो भगवते वैवस्वाताय ०

[H. T. Colebrooke.]

Digitized by Microsoft®

513.

790a. Foll. 20; size 9¾ in. by 4 in.; legibly written, in Devanāgarī, about the middle of the last century; ten lines in a page.

The same work.

It begins: नमो वैवस्वताय ०

[H. T. COLEBROOKE.]

514.

1457b. Foll. 37; size 10 in. by 4 in.; clearly written, in the Devanāgarī character, in the earlier part of last century; ten lines in a page.

Śaṅkarāćārya's commentary on the *Kāṭhaka-* or *Kaṭha (vallī)-upanishad.*

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, *Bibl. Ind.* 1850; the *Upanishad* translated by Rajah Rammohun Roy, 1832; L. Poley (French), 1835–37; Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, xv., 1884.

[H. T. COLEBROOKE.]

515.

1878d. Foll. 46; size 12¼ in. by 4 in.; fairly written, in Devanāgarī; 9–11 lines in a page. Modern.

The *Kāṭhakopanishad*, with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The commentary begins:

आत्मकल्पद्रुमं नीताः शंकरेण यथा पुरा ।
कठवल्लीर्विनेष्यानि तथैव पदपल्लवाः ॥

अथोपनिषदां कर्मसंबंधौ विषयादिचतुष्टयं च सुलभं । ततो न पृथग् वर्णनीयं । कठवल्ल्युपनिषदारंभ आख्यायिका श्रद्धावतां स्वधर्मनिरतानां ब्रह्मज्ञानं नेतरेषामित्यर्थः ॥ उशन् ०

It ends: इति श्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्यस्य शंकरानंदभगवतः कृतौ काठकोपनिषद्दीपिकायां द्वितीयेऽध्याये तृतीया वल्ली समाप्तश्चाध्यायः ॥

[DR. JOHN TAYLOR.]

516.

810. Foll. 283; size 14½ in. by 5 in.; fairly written, in Devanāgarī, in the latter part of the last century; twelve lines in a page.

The *Kaṭhavallīvivaraṇa,* a commentary on the *Kaṭhopanishad,* by *Bāla Krishṇānanda Sarasvatī* ruler of *Śrutinagara* (or *Vedanagara*).

It begins:

चमत्कारः कश्चित्सकलपुरुषार्थेषु सततं
सतां हृत्पाथोजे तरुणकिरणः कोपि तरणिः ।
समाधिक्षीराब्धौ मधुरतरराकाहिमकरस्
चिदानंदो भूमा चिरपरिचितः सन्विजयतां ॥ १ ॥
श्रीमच्छंकरभास्करस्य किरणैः फुल्ले वचोभिः परा
खंडार्थैकमरंदसंभृततनौ सद्युक्तिपत्रोज्ज्वले ।
हंसो हंसरसे कठश्रुति शिरःपद्मे वचःकेसरे
चर्चामोदभरे सदैव चरितु संसक्तसन्मानसः ॥ २ ॥
संख्यावज्जनसंख्यया सरसया सन्न्यायया ऽसंख्यया
सांख्यादिप्रतिपक्षया सुदृढया ऽखंडार्थसिद्धांतया ।
आचार्यो द्रमिलो नवः श्रुतिपुरीनेता यतिर्बालकः
कृष्णानंदसरस्वती वितनुते चित्तस्य संशोधनं ॥ ३ ॥
श्रीमत्पूर्णानंदान्वंदे पुरुषोत्तमार्यांश्च ।
शिवरामयतींद्रानपि गोपालानंददेशिकेंद्रांश्च ॥ ४ ॥
श्रीमत्स्वयंप्रकाशान् श्रितजनकल्पद्रुमान् श्रये सततं ।
श्रीमच्छ्रीधरचरणांभोजं हृदये सदा कलये ॥ ५ ॥
श्रुतिनगराधीशेनाभिनवद्रविडार्यबालकृष्णेन ।
रचितेयं मोदयतात्कैलासेशं कृतिर्महादेवं ॥ ६ ॥
सूत्रन्यायस्मृतिभिर्विवेचितेयं श्रुतिर्निगूढार्था ।
संतोषं निर्दोषा संपादयतात्सतां सततं ॥ ७ ॥

उशन्नित्याद्या मंत्रब्राह्मणमयी कठोपनिषत् ०

इति श्रीमत्परमहंसपरिव्राजकश्रुतिनगरेशस्वयंप्रकाशाभिनवद्रविडार्यबालकृष्णानंदविरचिते काठकोपनिषद्विवरणे मंत्रब्राह्मणविभजनं नाम प्रथमः परिच्छेदः fol. 8.

इति ० ब्राह्मणविवेचनं नाम द्वितीयः परिच्छेदः fol. 69b.

इति ० तृतीये मंत्रपरिच्छेदे प्रथमवल्लीविवृतिः fol. 137.

Digitized by Microsoft®

इति ० कठवल्लीविवरणे तृतीयपरिच्छेदे मंत्रव्याख्याने द्वितीयवल्ली fol. 195*b*.

इति ० द्रविडार्यवेदनगरेश ० तृतीयपरिच्छेदे तृतीयवल्ली fol. 221.

इति ० तृतीये मंत्रपरिच्छेदे चतुर्थवल्ली fol. 239*b*.

इति ० तृतीयपरिच्छेदे मंत्रविवृतौ पंचमवल्ली fol. 256*b*.

The colophon of the sixth *vallī* is incomplete इति श्री· [H. T. Colebrooke.]

517.

1638c. Foll. 8; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, in the earlier part of the last century; eleven lines in a page.

Śaṅkarācārya's commentary on the *Īśā* (*Īśāvāsya*)- or *Vājasaneyisaṃhitā-upanishad* (the 40th adhyāya of the *Vājasaneyi-saṃhitā*).

Edited, with *Ānandagiri's* gloss, by Dr. E. Röer, *Bibl. Ind.*, 1850; the *Upanishad* translated by Rajah Rammohun Roy, 1816 (2nd ed., 1832); by Dr. E. Röer, 1853; by F. M. Müller, *Sacred Books of the East*, i., 1879.

The MS. ends:

इति श्रीगोविंद ० शंकरभगवतः कृतौ वाजसनेयसंहितोपनिषद्भाष्यं समाप्तं ॥ [H. T. Colebrooke.]

518.

121A. Foll. 12; size 10 in. by 4 in.; Devanāgarī character; indifferent handwriting; eleven lines in a page.

Yājñīyamantra-vyākhyānuvivaraṇa, a gloss by *Jayatīrtha Bhikshu*, on (*Madhva*) *Ānandatīrtha's* commentary on the *Īśāvāsyopanishad*.

It begins:

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान्पातु नो हरिः ॥

काण्वीं मन्त्रोपनिषदं व्याकरिष्यन् भगवानाचार्यश्चिकीर्षितार्थविघ्नपरिसमाप्त्यादिप्रयोजने प्रपाद्य देवतास्तुतिनतिप्रथमं निबध्नाति। नित्येति।० ---- ज्ञानमूर्त्तये नित्यायेति।

The MS. ends:

कमलावदनांभोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

इति श्रीमदानंदतिर्थभगवत्पादाचार्यविरचितस्य याज्ञीयमंत्रव्याख्यानस्य विवरणं जयतिर्थभीक्षुविरचितं समाप्तं।० सं १८०५ ० [H. T. Colebrooke.]

519.

1317a. Foll. 70; size $12\frac{3}{8}$ in. by $4\frac{1}{8}$ in.; fairly written, in the Devanāgarī character, in the early part of the last century; nine lines in a page.

Īśādhyāyabhāshya, a commentary on the *Īśāvāsyopanishad*, by *Bāla Krishṇānanda*.

It begins:

चिदानंदो हंसश्चिरपरिचितो मानसतटे
चमत्कारान् कुर्वन् मतिमहिलयालिंगिततनुः ।
विलासाच्चिन्वानश्चरमचरमुच्चावचमिदं
विलीनीकुर्वंश्वासकृदपि परेशो विजयते ॥ १ ॥
वंदे वंदारुवृंदांतरघनतिमिरे ० वंदे शिकेंद्रं यतींद्रं ॥ २ ॥
शंकरयतिवरसूचित ० ३ ॥
अपनयतिमिरवृतायां हृदयगुहायां सदद्वयार्थाप्त्यै ।
श्रीमच्छंकरयतिवरवाणीमणिदीपिकायिता जयति॥४॥
पूर्णानंदयतींद्रान् पुरुषोत्तमयोगिनोऽथ गोपालान्।
श्रीमात्स्वयंप्रकाशान् श्रीधरवर्यांश्च सततमाकलये ॥५॥
मनूनीशेत्याद्यान् विशदवृहदारण्यकगिरा
मुहुर्व्याख्यातार्थान् क्रमघटनयालोड्य विमलम् ।
यतिर्बालो नव्यद्रविडमुनिराम्नायनगराधिभूः कृष्णानंदः स्वमतिपरिशुद्धिं वितनुते ॥ ६ ॥

ईशावास्यमित्याद्या वाजसनेयिशाखांतर्गतकाण्वमध्यंदिनयोश्चत्वारिंशत्तमाध्यायात्मिकोपनिषद् ०

It ends:

श्रीमच्छंकरयतिवरसूचितमर्यादया ऽकथयमहं ।
वृहदारण्यकगीर्भिर्भावानीशादिमंत्राणां ॥

इति श्रीमत्परमहंसपरिव्राजकश्रीस्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यश्रीमच्छ्रीधरानंदसरस्वतीचरणकमलेंदिरायितहृदयश्रुतिनगरीशाभिनवद्रविडाचार्यबालकृष्णानंदविरचितमीशाध्यायभाष्यं संपूर्णम् ॥ [H. T. Colebrooke.]

Digitized by Microsoft®

520.

1095F. Foll. 25; size 12 in. by 4¾ in.; fairly written, in Devanāgarī, in the latter part of the 17th century; 9–11 lines in a page.

Śaṅkarācārya's commentary on the *Praśnopanishad.*

Edited, with *Ānandagiri's* gloss, by E. Röer, *Bibl. Ind.*, 1850. The *Upanishad* translated by the same scholar, 1853; by F. M. Müller, *Sacred Books of the East,* xv., 1884.

[H. T. Colebrooke.]

521.

1454d. Foll. 32; size 10¼ in. by 4¼ in.; fairly written, in the Devanāgarī character; eight lines in a page.

Another copy of *Śaṅkara's Praśnopanishad-bhāshya.* Dated Saṃvat 1852.

[H. T. Colebrooke.]

522.

2444. Foll. 240 (from 136 to end not numbered); size 12¾ in. by 4½ in.; fairly written, in Devanāgarī, about A.D. 1750; ten lines in a page.

Praśnopanishad-vivṛiti, another commentary on the *Praśnopanishad,* by *Bāla Krishṇānanda Sarasvatī,* ruler of *Śrutinagara.*

It begins:

निवर्तानां भूनिर्विविधघटनानां त्रिजगतां
दधाना सामर्थ्यं सकलमपि सान्निध्यवशतः ।
चिरायाविद्यायै चिदचिदुभयग्रंथिखनये
चिरं चित्ते भूयाच्चिदखिलपुमर्थैककलिका ॥ १ ॥
श्रीमच्छंकरपूर्णशारदसुधाभीशोर्वचोभिः
करैः संफुल्ले नयसौरभेण भरिते चर्चादलैरुज्वले ।
जीवेशोभयसामरस्य सरसे चेतो द्विरेफः
सदा संसक्तोऽस्तु तुरीयवेदशिखरे प्रश्ने परे कैरवे ॥ २ ॥
संख्यावज्जनसंख्यया सरसया सत्पायया ऽसंख्यया
सांख्यादिप्रतिपक्षया सुदृढया ऽखंडार्थसिद्धांतया ।
आचार्यो द्रमिलो नवः श्रुतिपुरीनेता यतिर्बालकः
कृष्णानंदसरस्वती वितनुते चित्तस्य संशोधनं ॥ ३ ॥

etc., as p. 137 above; ° सततं ॥ ७ ॥

सुकेशा च भारद्वाज इत्याद्या मंत्राणां व्याख्येयरूपत्वादव्यभिचारेण ब्राह्मणानां व्याख्यानरूपत्वान्मंत्रब्राह्मणमयी प्रश्नोपनिषत् तस्या अल्पाक्षरा विवृतिरारभ्यते ॥ तत्रादौ विषयपरिशोधनाय मंत्रब्राह्मणे विभजामस्तत्रापीह मंत्राणामल्पत्वान्मंत्रानेव ब्राह्मणेभ्यः पृथक्कृत्य प्रदर्शयामः । तथा हि ।

विश्वरूपं हरिणं जातवेदसं
परायणं ज्योतिरेकं तपंतं ।
सहस्ररश्मिः शतधा वर्तमानः
प्राणः प्रजानामुदयत्येष सूर्यः ॥ १ ॥ °

पंचपादं ° २ ॥ एषोऽग्निस्तपत्येष सूर्य ° ३ ॥ ° sixteen couplets (*Praśnop.*, 1, 8; 1, 11; 2, 5 etc.; *cf.* also F. M. Müller, *Up.* Part II., *Introd.* p. xliii) ॥ अत्र द्वितीयप्रश्नस्थिता एषोऽग्निरित्याद्या नव मंत्राः प्राणस्तुतिपरा इंद्रियाद्यधिष्ठातृदेवताभिर्दृष्टाः प्रथमप्रश्नस्थौ मंत्रौ विश्वरूपं पंचपादमित्याद्यौ तृतीयप्रश्नस्य उत्पत्तिमिति °

The commentary on the *brāhmaṇa* portion (viz., सुकेशा च भारद्वाजः) begins fol. 48*b*:

अथ पूर्वं प्रश्नोपनिषदो मंत्रा विश्वरूपमित्याद्याः षोडशापि सूचीकटाहन्यायेन स्वल्पत्वान्मूलत्वान्मंत्राणां मूलतात्पर्यानुरोधेनैव च ब्राह्मणप्रवृत्तेश्च व्याख्याताः । संप्रति व्याख्यारूपाणि सुकेशा चेत्यादीनि ब्राह्मणानि क्रमेण व्याकुर्मः । तत्र तृतीयो गुरुः स्वशिष्यान् श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति वचनार्थं मनसि निधाय सुकेशादिऋषिगणपिप्पलादसंवादरूपब्राह्मणविवृतमंत्रगणप्रतिपादितानर्थान् बोधयितुं पिप्पलादं प्रति सुकेशादिऋषीणां षणां तत्सहचरितानामन्येषां चोपसदनादिक्रियां स्वशिष्याणामन्येषां च शिक्षायै स्ववचनतो निबध्नाति स्म सुकेशेत्यादिना °

Praśna I. ends fol. 87*b*.

P. II., fol. 99*b*: इदं च तमेता इति वाक्यं [viz., after II., 4 of the edition (5–13 having been explained as *mantras*)] पिप्पलशाखागतप्रश्नोपनिषदि न पठितं शौनकीयप्रश्न एव पठितमिति विशेषो वेदितव्य इति सर्वं निराकृतं ॥

Digitized by Microsoft®

P. III., fol. 146; IV., fol. 167*b*; V., fol. 181*b*; VI., fol. 196.

Then follows an additional philosophical chapter, beginning:

अथ भगवान् बादरायणो ऽस्यामुपनिषदि संदिग्धार्थकं वाक्यं विवरीतुं प्रथमे ऽध्याये तृतीये पादे । ईक्षतिकर्मव्यपदेशात् स इति (I. 3, 13) तत्रैव पादे । अत्ताचराचरग्रहणात् प्रकरणाच्चेति च सूत्रयां चकार । तत्र प्रथमेक्षतिकर्मव्यपदेशात्स इत्यधिकरणं °

It ends:

ननु श्रीमच्छंकरभगवत्पादभट्टभास्करलक्ष्मणार्यभिक्षुप्रभृतिभिः कठश्रुतिमुदाहृत्यैतदधिकरणप्रवर्तनादानंदतीर्थैरदितिश्रुत्यवलंबेन प्रवर्तनात् प्राकृतं सूत्रयोजनं तद्विरुद्धमिति चेत् नैव विरुद्धं प्रश्नश्रुतौ विस्पष्टमत्तृपदश्रवणादर्थाबाधाच्च (!) प्रकृतात्तृसूत्रविषयतायाः समुचितत्वात् कठादिश्रुतावत्तृपदश्रवणाभावे न यथा कथंचिदत्तृपदस्यानुमेयत्वेनार्थप्रत्यभिज्ञामात्रेण गौणविषयताया एव कठादिश्रुतेरुचितत्वात् प्रायेण सर्वेष्वष्टाधिकरणेषु प्रथमेऽध्याये श्रुतिशब्दानुवादेनैव सूत्रविरचनात् सूत्रगताशब्दवत्या एव श्रुतेर्मुख्यविषयत्वादर्थसाम्यवत्याः श्रुतेर्गौणविषयत्वेनैव सर्वैरभ्युपगमात् प्रश्नश्रुतिर्मुख्यो विषयः कठश्रुत्यादिर्गौणो विषय इति विभागेन प्रकृतिविरोधो न.वतरत्येव गौणविषयवाक्यानुरोधेन विचारास्तु प्रत्नाचार्यप्रवर्तिताः कठविवरणे ऽनुसंधेया इति दिक् ॥

None of the chapters have a colophon to them; sufficient blank space having, however, been left for it after each. [H. T. COLEBROOKE.]

523.

2346c. Foll. 3; size 10 in. by 6 in.; well written, in Devanāgarī, in the latter part of last century; nine lines in a page.

Kaivalyopanishad.

It begins: अथाश्वलायनो भगवंतं परमेष्ठिनमुपसमेत्योवाचाधीहि भगवन्ब्रह्मविद्यां वरिष्ठां ° [GAIKAWAR.]

524.

1878a. Foll. 50; size 12¼ in. by 4 in.; well written, in the Devanāgarī character; ten lines in a page. Modern.

Kaushītaki-brāhmaṇopanishad, with the commentary (*dīpikā*) of *Śaṅkarānanda*, disciple of *Ācārya Ānandātman.*

Edited, with a translation of the *Upanishad*, by E. B. Cowell, *Bibl. Ind.*, 1861; the *Upanishad* again translated by F. M. Müller, *Sacred Books of the East*, i., 1879. [DR. JOHN TAYLOR.]

525.

1878e. Foll. 44; size 12¼ in. by 4 in.; legibly written, in Devanāgarī; 10–13 lines in page. Modern.

Śvetāśvataropanishad with the commentary (*dīpikā*) of *Śaṅkarānanda.*

The *Upanishad* begins:

ब्रह्मवादिनो वदंति । किं कारणं ब्रह्म °

The commentary begins:

श्वेताश्वतरमंत्राणां ब्रह्मार्थोपनिषद्गिरां ।
पुण्यकृत्पुण्यतीर्थानामर्थमाविष्करोम्यहं ॥

ब्रह्मात्मैक्यार्थस्यातिगहनतां दर्शयितुं प्रथमतो ब्रह्मविदां विचारमवतारयति । ब्रह्मवादिनो °

The *Upanishad* has been edited, with *Śaṅkarācārya's* commentary, and a translation, by E. Röer, *Bibl. Ind.*, 1850–53; also translated by F. M. Müller, *Sacred Books of the East*, xv., 1884. [DR. J. TAYLOR.]

526.

1133. Foll. 64; size 11¾ in. by 6 in.; fairly written, in Devanāgarī, towards the end of the 17th century. Twelve lines in a page. The Manuscript has suffered from damp.

Śvetāśvataropanishad with the commentary (*vivaraṇa*) of *Vijñānātman*, disciple of *Jñānottamācārya.*

Digitized by Microsoft®

The commentary begins:

अवच्छेदत्रयातीतनिर्मलज्ञानमूर्तये ।
नमो गिरां विदूराय दक्षिणामूर्तये नमः ॥
निगमांतप्रदीपाय निःसंगसुखसंविदे ।
संसारतापनोदाय विद्याश्रीपतये नमः ॥
प्रत्यस्ताखिलभेदाय जगद्विभ्रमसाक्षिणे ।
ज्ञानोत्तममुनींद्राय नमः प्रत्यक्सुखात्मने ॥

नमः परमऋषिभ्यो नमो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । इदं ब्राह्मणवाक्यं वादिनो वदनशीलाः* वेदार्थविपरीतपक्षान्निर्मू-लीकृत्य वेदार्थतत्वेन ब्रह्मवदनशीलाः साक्षाद्वा परंपरया वा सर्ववेदार्थत्वेन ब्रह्म वदंतीत्येतत्सर्ववेदा यत्पदमामनंतीति श्रुतेः ।°

It ends:

द्विर्वचनमध्यायपरिसमाप्तिद्योतनार्थमादरार्थं च ॥ इति श्री-मत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यश्रीमद्वि-ज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे (!) षष्ठोध्यायः ॥

[H. T. Colebrooke.]

527.

1625D. Foll. 12; size 8½ in. by 3½ in.; legibly written, in the Devanāgarī character, about A.D. 1650; ten or eleven lines in a page.

Mahopanishad of the *Atharvaveda*, consisting of six sections (*upanishads*, or *upanishatkaṇḍikās*), the first five of which (according to this MS.) constitute the *Sundarītāpanī*, while the sixth is called the *Tripura-upanishad*.

I. The *Sundarītāpanī* begins:†

ओं अथैतस्मिन्नन्तरे भगवान्प्राजापत्यं वैष्णवं विलय-कारणरूपमाश्रित्य पराभिधा भगवत्येवमादिश्रुत्या भूर्भुवः-स्वरोमिति त्रीणि पुराणि स्वर्गभूपातालानि पुराणि हरोमात्मकेन ह्रींकारेण हृल्लेखपराभिधा भगवती त्रिकू-टावसाने त्रिनिलये विलये धाम्नि महसा घोरेण व्याप्नोति सैवेयं भगवती त्रिपुरेति व्याख्यायते ॥ तत्सवितुर्वरेण्यं etc. [the *gāyatrī*, *Ṛgv.* III., 62, 10; followed by I. 99, 1 जातवेदसे सुनवाम and VII. 59, 12 त्र्यम्बकं यजामहे] ॥ इति शङ्करी परमा विद्या सा त्रयी साष्टाक्षरी त्रिपुरा परमेश्वरी ॥ आद्यानि चत्वारि पदानि ब्रह्मविकाशीनि । द्वितीयानि शाक्त्य-ख्यानि । तृतीयानि शैवानि ।° here follows the explanation in six paragraphs; after which (fol. 3*b*) पञ्चदशाक्षरं त्रैपुरं यो धीते स सर्वान् कामानवाप्नोति स सर्वान् भोगानवाप्नोति – – स वैष्णवं धर्मनिरूढ परं ब्रह्म व्याप्नोतीत्येवं वेद ॥ here follow the twelve *dhāmāni* in as many paragraphs, the last of which, containing a number of epithets of *Tripurī*, ends (fol. 4*b*) महात्रिपुरीं देवीं ध्यायेयमिति ध्यानयोगेने-त्येवं सकलपूजार्चनं वेदेति महोपनिषत् इत्यथर्वणे सुंदरीतापन्यां प्रथमोपनिषत् ॥ • ॥

The second *Upanishad* begins:

जातवेदसे सुनवामेत्यादि पठित्वा त्रैपुरीव्यक्तिं व्याचक्षते ।° it treats chiefly of *cakra*, fol. 5*b*: देवा ह वै भगवन्तमब्रुवन् महाचक्रनाम चक्रनायकं नो ब्रूहि । सार्वकामिकं सर्वाराध्यं सर्वरूपं विश्वतोमुखं मोक्षद्वारं यद्योगिनामुपदिश्य परं ब्रह्मभित्वा निर्वाणमुपदिशति तान् होवाच भगवान् । श्रीचक्रं व्याख्यास्यामः । ओमिति त्रिकोणं त्र्यक्षरं कृत्वा °

Fol. 6*b*: ओं क्षीरेण स्नापिता देवी चन्दनेन विलेपिते । बिल्वपत्रार्चिता देवी दुर्गे हं शरणागत इत्यनेनार्चां प्रार्थयित्वा मायालक्ष्मीमन्त्रेण । ह्रीं श्रीं या वै शिवा भगवती महिमा सिद्धस्तस्यै वै नमः । after which follow, to the end of the chapter, many variations of this formula.‡

* Instead of इदं ब्राह्मणवाक्यं ° the Telugu MS. 3183 (p. 133, above) reads: ब्रह्मवादिनो वदंतीति

† Grantha MS., R.A.S., Whish 17, containing the same *Upanishad* (foll. 16–27), begins:

त्रिपुरातापनीविद्या देह्यचिच्छक्तिविग्रहम् ।
वस्तु चिन्मात्ररूपं तत्परतत्वं भजाम्यहम् ॥

ओं भद्रं कर्णेभिरिति शान्तिः । अथैतस्मिन्नन्तरे भगवान्प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवतीत्येवमादि-शंकरहरमायात्मकेन ह्रींकारेण हृल्लेखाख्या भगवतीति त्रिकूटा-वसाने निलये – – – घोरेण व्याप्नोति – – – त्रिपुरेति गीयते ॥ तत्सवितुः ° See also pp. 115*b*, 127*a*, above.

‡ These are wanting in the Grantha MS.

Digitized by Microsoft®

This *Upanishad* concludes (fol. 8*b*) : स ब्रह्म पश्यति स सर्वं पश्यति सोऽमृतत्वं गच्छति य एवं वेदेति महोपनिषत् ॥

The third *Upanishad* begins :
देवा ह वै मुद्राः सृजेयमिति भगवन्तमब्रुवंस्तान् होवाच * भगवानवनिपदजानुमण्डलं विस्तारपद्मासनं कृत्वा मुद्राः सृजेयमिति स सर्वानाकर्षयति यो योनिमुद्रामधीते ०

It ends (fol. 9*b*) : कुलकुमारी विद्महे मन्त्रकोटिः सुधीमही तं नः कौलिः प्रचोदयादिति कुमार्यर्चनं कृत्वा यो वै साधकोऽभिलिखति सोऽमृतत्वं च गच्छति स यश आप्नोति स परमायुष्यमवाप्य परं ब्रह्म भित्त्वा तिष्ठति य एवं वेद । इति महोपनिषत् ॥ †

The fourth *Upanishad* begins :
देवा ह वै भगवन्तमब्रुवन् देव गायत्रहृदयं ‡ नो व्याख्यातं त्रैपुरं सर्वोत्तमं जातवेदससूक्तेनाख्यातं त्रैपुराष्टकं यद्दृष्ट्वा मुच्यते योगी जन्मसंसारबन्धनात् । इत्येवं ब्रुवतां सर्वेषां देवानां श्रुत्वेदं वाक्यमित्यथातस्त्र्यम्बकेनानुष्टुभेन मृत्युंजयं दर्शयते ० – – – *ib*. देवा ह वै भगवन्तमूचुः सर्वं तयाख्यातम् । अथ कैर्मन्त्रैर्देवी स्तुता भगवती ०

It ends (fol. 10*a*) : नमः शिवायेति याजुषमन्त्रेणोपासको रुद्रत्वं प्राप्नोति शिवत्वं प्राप्नोति कल्याणं प्राप्नोति य एवं वेद । इत्यथर्वणवेदे सुंदरीतापिन्यां चतुर्थोपनिषत् ॥

The fifth *Upanishad* begins :
तद्विष्णोः परमं पदं ० विष्णोर्यत्परमं पदम् (*Rigv*. I, 22, 20. 21) विष्णोः सर्वतोमुखस्य स्नेहो यथा ० These verses are commented upon as well as *Rigv*. IV. 40, 5 हंसः शुचिषद् ० [which in this MS. ends with बृहत् । and in G. MS. with ऋतं बृहत्] – fol. 10*b* § : देवा ह वै भगवन्तमब्रुवन् स्वामिन्नो कथितं स्फुटं क्रियाकाण्डं सविषयं त्रैपुरीयमिति ‖ । अथ परम निर्विषयं कथयस्वेति तान् होवाच भगवान् तुरीयं माययान्यया निर्दिष्टं परमं ब्रह्मेति । ०

It ends : तस्माद्देषां विद्यां तुरीयां श्रीकामराजाख्यामेकादशधा तन्निमित्तोन्नमितां जानीते स तुरीयं पदं प्राप्नोत्येवं वेदेति महोपनिषत् । इत्यथर्वणे पंचमोपनिषत् ॥ Here (fol. 11*b*) follows another paragraph (wanting in the Grantha MS.) : एवं जानाति यस्तत्त्वं बीजोपनिषदां गणं । पंचकं परमे व्योम्नि लीयते मुनिपुंगवः ॥ ० – – – ० इयं इयमित्येकोनविंशत्यभुवनेह इति पंचमोपनिषत्तापिनी समाप्ता । ५ ।

II. *Tripuropanishad* (called *Tripurīsundaryupanishad* in the Grantha MS.) begins (fol. 11 *b*) तिस्रः पुरस्त्रिपथा विश्वचर्षणीरत्तां [यत्र G. MS.] कथा अक्षराः सन्निविष्टाः । ० *Cp*. p. 127*b*, above.

It ends : सरः [शिवः G. MS.] सर्वस्य जगतो धाता च भर्ता हर्ता विश्वरूपत्वमेति । [ब्रह्म विष्णुः शिवा रामा शिवो शक्तिर्हरे रमा । अर्चनीयं प्रयत्नेन ब्रह्मविष्णुरमाः शिवः शिवः । wanting in G. MS.] ॥ इत्ययं महोपनिषत् ॥ त्रैपुरीयामक्षरं ¶ परमो गीर्भिरुधेष (!) य्येजुः परमेतच्च सामे वा यान्या च विद्यायर्वे यान्या च विद्या ॥ इति अथर्वणवेदे त्रिपुरोपनिषत्पंचचत्वारिंशति समाप्तं ॥

[H. T. Colebrooke.]

528.

1638d. Foll. 13 ; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in. ; indifferent Devanāgarī writing, of the latter part of the 17th century ; 9–11 lines in a page.

Gopālatāpanīyopanishad.

Edited, with *Viśveśvara's* commentary, by *Haracandra Vidyābhūshaṇa* and *Viśvanātha*, *Bibl. Ind.*, 1870.

The MS. ends :
इति श्रीअथर्ववेदोपनिषत्सु ब्रह्मविद्यायां श्रीगोपालकृष्णतापनीयं संपूर्णं ॥ [H. T. Colebrooke.]

529.

2740. Foll. 26 ; size $7\frac{3}{4}$ in. by $6\frac{1}{4}$ in. ; legibly written in Devanāgarī ; recent ; six lines in a page.

---

* भगवानवनीकृतजानुमण्डलं विस्तीर्य पद्मासनं कृत्वा मुद्रा सृजतेति । G. MS.

† इति महोपनिषत्तृतीयोपनिषत् G. M.

‡ गायत्रीहृदयं G. M.

§ G. MS. begins only here the fifth *Upanishad*.

‖ त्रैपुरमिति । अथ प ० निर्विशेषं G. MS.

¶ त्रैपुर्यायमक्षरं G. MS.

Digitized by Microsoft ®

Gopālatāpanīyopanishad. At the beginning there is the following couplet:

कृषिर्भूवाचकः शब्दो नश्च निर्वृत्तिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

सच्चिदानन्दरूपाय ० [SIR C. WILKINS.]

530.

2346d. Foll. 14; size 10 in. by 6 in.; well written, in Devanāgarī, in the earlier part of the last century; nine lines in a page.

The same *Upanishad*.

[GAIKAWAR.]

531.

1369c. Foll. 21; size 9¾ in. by 4 in.; well written, in Devanāgarī, about A.D. 1650; nine lines in a page.

Viśveśvarācārya's commentary (*ṭīkā*) on the *Gopālottaratāpanī*. [H. T. COLEBROOKE.]

532.

2346b. Foll. 15; size 10 in. by 6 in.; well written, in Devanāgarī, in the earlier part of the last century; nine lines in a page.

Rāmatāpanīyopanishad. Both parts.

It begins:

चिन्मये ऽस्मिन्महाविष्णौ जाते दाशरथे हरौ ।०

It ends:

इत्यथर्वणरहस्ये रामस्योत्तरतापनीयोपनिषत् समाप्ता ॥

Edited, in Roman characters, with a German translation and notes, by A. Weber (*Abhandl.* of Berlin Ac., 1864).

[GAIKAWAR.]

533.

198. Foll. 54; size 10¾ in. by 3 in.; fairly written, in Devanāgarī; seven lines in a page.

Śaṅkarācārya's commentary on the (*Nṛisiṃha-*) *Pūrvatāpanīyopanishad.*

It ends:

इति ० आथर्वणतापनीयोपनिषद्भाष्ये पंचमोपनिषत्समाप्ता ॥ इति पूर्वतापनीयभाष्यं संपूर्णं ॥ संवत् १५८१ समए कार्त्तिकसुदि एकादशीवार शोमवार लीषितं ॥ [H. T. COLEBROOKE.]

534.

3087. Foll. 74; size 9 in. by 5 in.; fairly written, in Devanāgarī; recent; ten lines in a page.

The same work. It ends:

सर्वोपनिषत्समाप्तिं द्योतयतीति सर्वं निर्मलमिति सिद्धं ॥

इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य-श्रीशंकराचार्यशंकरभगवतः कृतौ आथर्वणतापनीयोपनिषद्भाष्ये पंचमोपनिषत्समाप्ता ॥ इदमुपनिषन्मया पंडितठोलकेन कश्मीरदेशवासिना संवति ३५ माघमासे शुक्लपक्षे श्रीतीर्थराजप्रयागांतरे संपूर्णीकृता ॥

The leaves, which have no original pagination, are completely out of order.

[J. R. BALLANTYNE.]

535.

269a. Foll. 48; size 11½ in. by 5¼ in. fairly written, in Devanāgarī; modern; 13–15 lines in a page.

(*Nṛisiṃha-*) *Uttaratāpanīyopanishad*, with *Śaṅkarācārya's* commentary.

Text and commentary of both the *Pūrva-* and *Uttara-tāpanīyopanishad* have been edited by *Rāmamaya Tarkaratna*, *Bibl. Ind.*, 1871.

[H. T. COLEBROOKE.]

536.

1638e. Foll. 61; size 10¼ in. by 4¼ in.; legibly written, in Devanāgarī, towards the end of the 17th century; 12–14 lines in a page.

The same commentary, here ascribed to *Gauḍapāda* (cf. *Rājendralāla Mitra*, Notices of Sanskrit MSS., IV. p. 72).

Digitized by Microsoft®

It begins:

निरस्तनिखिलानर्थपरमानंदरूपिणे ।
नृसिंहाय नमस्कुर्मः सर्वधीवृत्तिसाक्षिणे ॥

It ends:

यस्य संस्मृतिमात्रेण तरंति भवसागरं ।
तन्नतोऽस्मि गुरुंभक्त्या धिया वाचा च कर्मणा ॥

इति श्रीनवमः खंडः समाप्तः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुकमुनींद्रशिष्य-श्रीमद्गौडपादमुनिवरविरचिते उत्तरतापनीयविवरणे नवमः खंडः ॥ [H. T. COLEBROOKE.]

537.

1878c. Foll. 26; size 12¼ in. by 4 in.; fairly written, in the Devanāgarī character; eleven lines in a page. Modern.

The *Atharvaśiropanishad*, *Atharvaśikhopanishad* and *Jābālopanishad*, with the commentary (*dīpikā*) of *Śaṅkarānanda*, disciple of *Ānandātman*.

A. The *Atharvaśiropanishad* begins: देवा ह वै स्वर्गं लोकमगमन् ते देवा रुद्रमपृछन् ०

The commentary begins:

वक्ष्ये ऽथर्वशिरोनाम्न्याः श्रुतेर्व्याख्यां पदानुगां ।
रुद्रात्मैक्यावगत्यर्थं रुद्रस्तुष्टोऽस्तु नस्तया ॥ १ ॥

विद्याया अतिदुर्लभत्वप्रदर्शनार्थं आख्यायिकामवतारयति । ०

B. The *Atharvaśikhopanishad* begins fol. 13*b*: अथ हैनं पैप्पलादो ऽंगिराः सनत्कुमारश्चाथर्वणमुवाच । ०

The commentary begins:

व्याख्याथर्वशिखानाम्न्याः श्रुतेः क्लेशविनाशनी ।
क्रियते ब्रह्मबोधार्थं तया शुध्यतो मे मनः ॥

ब्रह्मविद्याप्राप्त्यर्थं तपोविद्यासंपन्नैरपि गुरुशुश्रूषादिकं करणीयमित्येतदर्थं प्रथमत आख्यायिकामवतारयति । ०

C. The *Jābālopanishad* begins fol. 18: बृहस्पतिरुवाच याज्ञवल्क्यं । यदनु कुरुक्षेत्रं देवानां देवयजनं ०

The commentary begins:

कृष्णद्वैपायनं व्यासं शंकरं लोकशंकरं ।
आनंदात्मानमप्यात्मगुरुं देवं नतोऽस्म्यहं ॥
जाबालोपनिषद्व्याख्यां व्यापयंतीं सुधानिधिं ।
करिष्ये प्रीयतां देवो विमुक्तोऽयं तदेश्वरः ॥

[DR. JOHN TAYLOR.]

538.

1685. Foll. 179; size 9 in. by 5 in.; badly written, in the Devanāgarī character, in A.D. 1748; generally twelve lines in a page.
Lakshmīvyākhyānā, also called *Bālambhaṭṭa-ṭīkā*, a commentary on the *vyavahāra* section of the *Mitāksharā*; by *Lakshmīdevī Pāyaguṇḍe* (the wife of *Bālakṛishṇa Vaidyanātha*, son of *Mahādeva*), who also wrote under the name of (? her son) *Bālambhaṭṭa*.

Digitized by Microsoft®

It begins: पूर्वत्रांते दुष्टदंडस्य शिष्टरक्षणस्य विधानादन्वयव्यतिरेकाभ्यां पालनाधिकारिणाहरहर्व्यवहारदर्शनं कर्तव्यमित्युक्तं ०

Colophon: इति श्रीमन्मिताक्षराव्याख्याने महादेवभट्टात्मजोमांगजवैद्यनाथाद्धांगभूतनाल(बाल B)कृष्णजननिपायगुंडोपाख्यश्रीलक्ष्मीदेवीविरचिते लक्ष्म्यभिधे व्यवहारप्रकरणं संवत् १८६५ ॥

Cf. Hall, Index of Bibliography, p. 175; West and Bühler, Digest, 3rd ed., I., p. 17; J. Jolly, Tagore Lectures, p. 15.

For another MS. (which seems to have been derived from the same source as the present one) see Aufrecht, Cat. Bodl., no. 632.

For an older commentary on the *Mitākshara*, the *Subodhinī* by *Viśveśvara*, see Aufrecht, Cat. Bodl., nos. 633, 634; Burnell, Index Tanj. MSS., p. 127*a*.

[H. T. Colebrooke.]

1283.

1104. Foll. 257; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, by three different, modern hands; 10–12 lines in a page.

The same work (B).

Three leaves inserted at the end contain a *sūcīpattra* of chapters.

[H. T. Colebrooke.]

1284, 1285.

3021, 3022. Foll. 266 and 326 resp.; size $12\frac{1}{2}$ in. by 6 in.; fairly written, in Devanāgarī, by different hands, at the beginning of the present century; 11–13 lines in a page.

Yājñavalkya's Institutes, with a commentary — the *Yājñavalkīyadharmaśāstranibandha* — by *Aparāditya* (or *Aparārka*) *Deva*.

According to Prof. Bühler (Report on Kāśmīr, p. 52; West and Bühler, Digest, 3rd ed., I., p. 18) *Aparāditya* belonged to the *Koṅkaṇa* branch of the princely house of the *Śilāras*, or *Śilāhāras*, residing at Purī, and reigned and wrote between 1140 and 1186 A.D. His formerly assumed descent from *Jīmūtavāhana* (the author of the *Dāyabhāga* etc.) is now very doubtful; see no. 1496.

The commentary begins:

संसिद्ध्यर्थमिलत्सुरासुरनमन्मौलिस्थितप्रोल्लसत्
सद्रत्नप्रभवप्रकृष्टविविधप्रेंखन्मयूखोज्ज्वलं ।
श्रेयोविघ्नमहामयप्रशमने दिव्यं यदेकौषधं
भूयाद्वो द्विरदाननांघ्रिकमलद्वंद्वं तदिष्टाप्तये ॥

विश्वानुभूतिसंभूतिस्थितिसंहृतिमुक्तय: ।
प्रभवंति यतस्तस्मै परस्मै ब्रह्मणे नम: ॥

यो विश्वसर्गपरिपालनसंहृतीहे (!)
ब्रह्मा हरिस्त्रिनयनश्च भवत्यमेय: ।
संशुद्धबोधमभयं सुखसत्स्वभावम्
आत्मानमद्वयमनंतमुपास्महे तं ॥

विश्वात्मन: शुक्लयजूंषि भानोर्
अवाप यो योगिगणाग्रगण्य: ।
तं याज्ञवल्क्यंमुनिवृंदवंद्यं
नमामि तत्कीर्तितधर्मबुद्ध्यै ॥

भक्त्या यस्य सविस्मय: स्मररिपुर्मत्या च वाचस्पतिर्
विक्रांत्या द्विषतां गण: शुचितया भास्वान्क्षमित्वेन भू: ।
जीमूतान्वयभूषणं सविलेपे(? सविनयं) योगीश्वरोदीरिते
शास्त्रे वाक्यनयानुगां वितनुते वाचं सतां संमताम् ॥

धर्मसंहितामारभमाणस्तस्या: पौरुषत्वे सामान्याज्जायमानाप्रामाण्यशंकां महाजनस्य तदध्ययनधारणादिविषये परिपंथिनीमपनेतुमाह योगी संयमवान् ०

Vol. I. contains the 1st adhyāya (इति ० राजनीतिप्रकरणं) and a *sūcīpattra* (foll. 263*b*–266); Vol. II., the 2nd and 3rd adhyāyas.

The *Vyavahāra* (foll. 1–136 and one leaf of index) begins: प्रथमाध्याये नानावर्णानां नानाविधा धर्मा उक्ता: । तत्र राजधर्मेषु वक्ष्यमाणं व्यवहारदर्शनोपदेशमाश्रित्य व्यवहारान्स्वयं पश्येत् सभ्यै: परिवृतो ऽन्वहमित्यत्र धर्मो विहित: । This portion is dated Saṃvat 1859.

The *Prāyaścitta* (foll. 199, numbered separately) begins: पूर्वेणाध्यायद्वयेन वर्णानामाश्रमिणोश्च ब्रह्मचारिगृहस्थयोर्धर्मा उक्ता: । संप्रति गृहस्थस्य स्वेषु धर्मेषु येन

Digitized by Microsoft ®

निमित्तेनानधिकारस्तस्मिंश्च सति येषु धर्मेष्वधिकारस्तदुभयप-रिच्छेदार्थमध्यायांतरमारभ्यते । °

Colophon: इति श्रीविद्याधरवंशप्रभवश्रीशिलाहारनरेंद्र-[जीमूतवाहनान्वयप्रसूत Adhy. I. II.]-श्रीमदपरादित्यदेव-विरचितयाज्ञवल्कीयधर्मशास्त्रनिबंधे तृतीयो ऽध्यायो समाप्तः ॥

For other MSS. of this commentary see Rāj. Mitra, Notices, iv., p. 260; Cat. of MSS. of the Mahār. of Bikāner, p. 506.

[H. T. Colebrooke.]

1286.

1175B. Foll. 34; size 13 in. by 4½ in.; legibly written, in the Bengalī character, at the beginning of this century; eight lines in a page.

The *Dāyabhāgaprakaraṇa*, or section on the law of inheritance, of the same work.

It begins: अथेदानीं विभागाख्यं व्यवहारपदमारभते । विभागं चेत् °

[H. T. Colebrooke.]

1287.

1278a. Foll. 86; size 13 in. by 5 in.; legibly written, in Devanāgarī; 10 or 11 lines in a page.

Dīpakalikā, a succinct commentary on *Yājña-valkya's* Code, by *Śūlapāṇi*.

It begins:

अशेषकलुषध्वंसि नत्वा कृष्णपदांबुजं ।
याज्ञवल्क्यस्मृतेष्टीकां शूलपाणिः समातनोत् ॥
अज्ञानतिमिरग्रस्तशास्त्रार्थप्रतिपत्तये ।
कृतेयं दीपकलिका कलिकालमलापहा ॥

योगीश्वरमित्यादि । योगिनां सनकादीनामीश्वरमाराध्यं याज्ञवल्क्यनामानमृषिं संपूज्य °

Adhyāya II. begins fol. 31: व्यवहारानित्यादि । ऋणादानादिनानाविवादपदविषयः संशयो ह्रियते ऽनेनेति व्यवहारः । तथा च कात्यायनः । वि नानार्थे ऽव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद् व्यवहार इति स्मृतः ॥

Adhyāya III. begins fol. 57: ऊनेत्यादि । असंपूर्ण-द्विवर्षं बालमकृतचूडं मृतं माल्यादिभिरलंकृत्य ग्रामाद्बहिः शुचौ भूमौ निखाय स्थापयेत् ॥ °

It ends: इति साहुडिया[ल]महोपाध्यायश्रीशूलपाणि-विरचितायां याज्ञवल्क्यटीकायां तृतीयो ऽध्यायः ॥

° । शकाब्दाः १७११ ॥

Acc. to Rāj. Mitra, Notices, iii., p. 104, the author was a judge at the court of *Lakshmaṇa Sena* of Bengal, in the early part of the 12th century; but he was probably considerably later; cf. Jolly, Tajore Lect., p. 14. For a chapter (*Prāyaścittaviveka*) of the author's *Smṛitiviveka* see further on, no. 1726.

[H. T. Colebrooke.]

1288.

1176. Foll. 348; size 13¼ in. by 5 in.; well written, in the Devanāgarī character; nine lines in a page.

Yājñavalkya's Institutes, with a commentary by *Mitramiśra*, son of *Paraśurāma Miśra*, and grandson of *Haṃsa Paṇḍita*.

The commentary was written by order of king *Vīrasiṃha Deva* (of Kāśī, the son of *Madhukara Shah*, of the *Bundelā* family), and forms part of a series of legal works by this author, bearing the title of *Vīramitrodaya* (see further on, nos. 1407–10).

According to Prof. Bühler (West and Bühler, Digest, 3rd ed., I., p. 22) this *Vīrasiṃha* is identical with the well-known *Bīrsinh Deo* of Orchā, who murdered *Abul Fazl*, the minister of Akbar, and author of the *Āyīn-i-Akbarī*; whence the *Vīramitrodaya* would have been written in the first half of the seventeenth century.

The commentary begins (slightly corrected from the beginnings of the other chapters):

निःसाम्यं स्वस्य शंसन्निव विदधदिव द्वैतवार्त्तामिहार्त्ताम्
अद्वैतं शीलयिष्यन्निव च निजपदं शीलताद्वंद्वभावः ।
अव्याद्वो शुद्धसत्वांकुर इव विशदो विघ्नभृत्क्रोडभर्तुर्
दंष्ट्रेवोच्चैरनाशी हरमुकुटशशीवैकदंतस्य दंतः ॥ १ ॥ ° ॥

Digitized by Microsoft®

अरिकुलकरिकुंभकूटपाटी
शिखरितटीमिव यां प्रभापटीयान् ।
अधिवसति महींदुवीरसिंहो
मधुकरसाहिमहीशसिंधुजन्मा ॥ २ ॥ ० ॥
मगोला भूगोलाद्बहिरभियियासंति भवितुं
पठानाः पाठीना इव जलविलीनाधिपमधुः ।
मघोमोचारंभे(भो MSS.) ऽपसरति बुदेलाकुलपतौ
रणार्थं दुर्वारे रणति रणसारे रणभुवि ॥ ७ ॥
बिभ्राणो बुधमित्रतां कविगुरू राजा धरानंदनः
शोभाभिर्विलसत्तमो दिवि लसत्केतुश्च भास्वत्सुतः ।
इत्थं जन्यजनुर्नवग्रहतनुः किंत्वस्ति तुंगः सदा
सोद्रेकः किल वीरसिंहधरणीधौरेयचूडामणिः ॥ ८ ॥ ० ॥
आरोहो गोर्लतायाः सदुपकृतिपदं धर्मभूमीरुहाणाम्
उद्यानं शुद्धकीर्त्तेरुपचयभवनं श्रीमृगीवागुरैव ।
आकारो विप्रतायां निधिरपि महसः सर्वविद्यानवद्यो
यद्द्वारि द्योतते श्रीद्युमणिरिव मूर्छयन्मित्रमिश्रः ॥ १४ ॥
क्ष्माचक्रं चारु चक्रे समुचितनयतो रक्षितुं भूमिदेवान्
देवांश्च प्राप्तसेवान्विमलमपि यशो वीरसिंहो नरेंद्रः ।
वित्तं मत्वाप्यसारं वितरदविरतं याज्ञवल्क्योक्तिमुक्ता
वारं स्मृत्यर्थसारं रचयितुमथ स प्रादिशन्मित्रमिश्रं ॥ १५ ॥
उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानंदधीमान्
श्रीभाज्जो मित्रमिश्राज्जगदुपकृतये विभ्रदादेशदीपं ।
ज्ञानानां दैन्यदोषापहमकलिमयं याज्ञवल्क्योक्तिकोशाद्
दृष्ट्वा स्मृत्यर्थसारं समचिनुत यशोधर्मलक्ष्मीविहारं ॥ १६ ॥

इह भगवता महर्षिणा याज्ञवल्क्येन लोकहिताय प्रणीतं धर्मशास्त्रं तच्छिष्यप्रवरो मानवं भृगुरिव प्रश्नोत्तरप्रबंधेन संक्षिप्य वक्तुं प्रस्तौति । योगीश्वरं ०

Adhyāya I. (*rājadharmaprakaraṇa*) occupies 171; II. (*prakīrṇaprakaraṇa*), 103; III., 74 leaves; each being paged separately.

Colophon: इति श्रीसकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजाधिराजचतुरु[दधिवलयवसुंधरा]हृदयपुंडरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपंडितात्मजश्रीपरशुराममिश्रसूरिसूनुसकलविद्यापारावारपारीणधुरीणश्रीमन्मि[त्रमि]श्रकृते श्रीवीर(सिंह not in adhy. 1 and 2)मित्रोदयाख्याने श्रीयाज्ञवल्क्यव्याख्याने प्रायश्चित्तप्रकरणं नाम तृतीयोध्यायः ॥ संवत् १८६७ ॥ Two leaves appended at the end contain an index to the third adhyāya.

[H. T. Colebrooke.]

1289

2193. Foll. 135; size $11\frac{1}{4}$ in. by 5 in.; Fairly written, in Devanāgarī, about the end of the 17th century; eleven lines in a page.

Bṛihat-Pārāśara-Dharmaśāstra, complete in twelve *adhyāyas*. The work is said to contain 3300 *ślokas*; but there seem to be only 2980 in these copies.

The work begins (cf. Calc. Dh., II., pp. 53-309; Weber, Cat. Berl., II., no. 1756):

व्यक्ताव्यक्ताय देवाय वेधसे ऽनन्ततेजसे ।
नमस्कृत्य प्रवक्ष्यामि धर्मान् पाराशरोदितान् * ॥ १ ॥
अथातो हिमशैलाग्रे देवदारुवनाश्रये ।
व्यासमेकाग्रमासीनं द्विजाः पृच्छन्ति धार्मिकाः ॥ २ ॥
मनुष्याणां हितं धर्मं वर्तमाने कलौ युगे ।
वर्णानामाश्रमाणां च किंचित्साधारणं वद ॥ ३ ॥
युगेषु त्रिषु ये प्रोक्ता धर्मा मन्वादिभिर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णैराश्रमवासिभिः ॥ ४ ॥
स पृष्टो मुनिभिर्व्यासो बहुभिः परिवेष्टितः ।
प्रष्टुं जगाम पितरं धर्मान् पाराशरं ततः ॥ ५ ॥
सर्वेषामाश्रमाणां च वरे बदरिकाश्रमे ।
संविवेशाश्रमे तस्मिन् योगीव वेधसस्तनुम् ॥ ६ ॥
नानापुष्पलताकीर्णे फलैः पुष्पैरलंकृते ।
नदीप्रस्रवणानेकैः पुण्यतीर्थोपशोभिते ॥ ७ ॥
मृगपक्षिभिराकीर्णे देवतायतनावृते ।
यक्षगन्धर्वसिद्धानां नृत्यगीतसमाकुले ॥ ८ ॥
तस्मिन्नृपिसभामध्ये शक्तिपुत्रः पराशरः ।
सुखासीनो महातेजा मुनिमुख्यगणावृतः ॥ ९ ॥
कृताञ्जलिपुटो भूत्वा व्यासस्तु मुनिभिः सह ।
प्रदक्षिणाभिवाद्यैश्च मुनिभिः परिपूजितः ॥ १० ॥
ततः संतुष्टमनसा पराशरमहामुनिः ।
व्यासस्य स्वागतं ब्रूयादासीनो मुनिपुंगवः ॥ ११ ॥
वत्साद्य स्वागतं ते ऽस्तु महर्षीणां समन्ततः ।
कुशलं कुशलेत्युक्ता व्यासः पृच्छत्यतः परम् ॥ १२ ॥
यदि जानासि मां भक्तुं स्नेहो ऽस्ति यदि वा मयि ।
धर्मं ब्रूहय मे तात अनुग्राह्यो ऽस्म्यहं यदि ॥ १३ ॥

* This MS. writes पारासर, परासर throughout.

Digitized by Microsoft®

श्रुतास्ते मानवा धर्मा गार्गीया गौतमास्तथा ।
वासिष्ठाः काश्यपाश्चैव तथा गोपालकस्य च ॥ १४ ॥
अत्रेर्विष्णोश्च सांवर्ता दाक्षाश्चाङ्गिरसास्तथा ।
शातातपाश्च हारीता याज्ञवल्क्यकृतास्तथा ॥ १५ ॥
आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च ।
कात्यायनकृताश्चैव प्रचेतोगदितास्तथा ॥ १६ ॥
श्रुतिरात्मोद्भवा तात श्रुत्यर्था मानवास्तथा ।
मन्वर्थः सर्वधर्माणां कृतादित्रियुगेषु च ॥ १७ ॥
धर्मं नु त्रियुगाचारं न शक्यं हि कलौ युगे ।
वर्णानामाश्रमाणां च किंचित्साधारणं वद ॥ १८ ॥
व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।
सुखासीनो महातेजा इदं वचनमब्रवीत् ॥ १९ ॥
क्रियन्ते नैव वेदाश्च न चापि प्रभवन्ति ते ।
न कश्चिद्वेदकर्तास्ति वेदकर्ता चतुर्मुखः ॥ २० ॥
तथा स्मरन्ति ते धर्मं कल्पे कल्पान्तरान्तरे ।
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥ २१ ॥
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ।
तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ॥ २२ ॥
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।
कृते तु मानवा धर्मास्त्रेतायां गौतमस्य च ॥ २३ ॥
द्वापरे शाङ्खलिखिताः कलौ पाराशराः स्मृताः ।
त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ २४ ॥
द्वापरे कुलमेकं तु कर्तारं च कलौ युगे ।
कृते तु लिप्यते देशस्त्रेतायां ग्राम एव च ॥ २५ ॥ ०
पराशरश्च यत्प्राह शास्त्रं पुत्रस्य वत्सलम् ।
अथ तत्संप्रवक्ष्यामि द्विजकर्मादिकं द्विजाः ॥ ४८ ॥
षट्कर्म वर्णधर्माश्च प्रशंसा गोवृषस्य च ।
अदोह्यवाह्यौ यौ तौ तु सीरं सीरप्रयोगिणां ॥ ४९ ॥
अमावास्यानिषिद्धानि ततश्च पशुपालनम् ।
अन्नतोयप्रशंसा च वाह्या वाह्या वसुंधरा ॥ ५० ॥ ०
प्रोक्तवान् व्यासमुख्यानां शेषं मुनिविभावितम् ।
नियुक्तः सुव्रतः शेषस्थापनाय द्विजन्मनाम् ॥ ६१ ॥
पराशरो व्यासवचो ऽवगम्य
 यदाह शास्त्रं चतुराश्रमार्थम् ।
युगानुरूपं च समस्तवर्ण-
 हिताय वक्ष्यत्यथ सुव्रतस्तत् ॥ ६२ ॥
शक्तिसूनोरनुज्ञातः सुतपाः सुव्रतस्त्विदम् ।
चतुर्णामाश्रमाणां च हितं शास्त्रमथाब्रवीत् ॥ ६३ ॥

इति बृहत्पाराशरीये धर्मशास्त्रे व्यासप्रश्ने सुव्रतप्रोक्तसंहितायां शास्त्रसंग्रहो देशकथनं नाम प्रथमो ऽध्यायः ॥ fol. 4.

पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिहितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥ १ ॥
चतुर्णामपि वर्णानामाचारो धर्मपालनम् ।
आचारहीनदेहानां भवेद्धर्मः पराङ्मुखः ॥ २ ॥
षट्कर्माभिरतो नित्यं देवतातिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥ ३ ॥ ०
उद्देशतो मया प्रोक्तः स्नानस्य परमो विधिः ।
द्विजन्मनां हितार्थं च जपस्यास्य परो विधिः ॥ २२३ ॥

इति बृहत्पाराशरीये धर्मशास्त्रे सुव्रतप्रोक्तसंहितायां षट्कर्मणि स्नानविधिः ॥ fol. 14.

Follow *praṇavasvarūpakathanam*, 33 *ślokas*, fol. 25*b*; *japavidhi*, 109 *ślokas*, fol. 20*b*; *devapūjāvidhi*, 44 *ślokas*, fol. 22*b*; *vaiśvadevavidhi*, 38 *ślokas*, fol. 24*b*; *atithipūjā*, 28 *ślokas*, fol. 25; (*varṇadharmāḥ*), 14 *ślokas*;

इति ० द्वितीयो ऽध्यायः ॥ fol. 26.

अतः परं गृहस्थस्य धर्माचारं कलौ युगे ।
धर्मं साधारणं साक्षाच्चातुर्वर्ण्यक्रमागतम् ॥ १ ॥
युष्माकं संप्रवक्ष्यामि पाराशरमुखाच्छ्रुतम् ।
षट्कर्मसहितो विप्रः कृषिवृत्तिं समाश्रयेत् ॥ २ ॥ ०

Iti - - - *gomatimā*, 43 *ślokas*, fol. 27*b*; *vrishabhapraśaṃsā*, 26 *ślokas*, fol. 28*b*; 136 *ślokas*; इति ० कृषिकर्मसीताधर्मो यज्ञोपधर्मो नाम तृतीयो ऽध्यायः ॥ fol. 34*b*.

स्वयं च वाहितैः क्षेत्रैः धान्यैश्च स्वयमर्जितैः ।
कुर्याद्विवाहयागादि पञ्चयज्ञांश्च नित्यशः ॥ १ ॥
अष्टौ विवाहा नारीणां संस्कारार्थं प्रकीर्तिताः ।
ब्राह्मादिकान् क्रमेणैतान् संप्रवक्ष्याम्यतः पृथक् ॥ २ ॥
[371 *ślokas*.

इति ० चतुर्थो ऽध्यायः ॥ fol. 51.

श्राद्धं वृद्धावचन्द्रे भच्छायाग्रहणसंक्रमे ।
व्यतीपातविष्णुकृष्णपक्षे पात्रार्थलब्धिषु ॥ १ ॥
[392 *ślokas*.

इति ० श्राद्धाधिकारे पञ्चमो ऽध्यायः ॥ fol. 69.

अथातः संप्रवक्ष्यामि शुद्धिं पाराशरोदिताम् ।
सूतके ऽप्यथवाशौचे यथावत्तां निबोधत ॥ १ ॥ ०
[334 *ślokas*.

Digitized by Microsoft®

इति ० प्रायश्चित्तनिर्णयो नाम षष्ठो ऽध्यायः ॥ fol. 83*b*.

व्रतान्यथ प्रवक्ष्यामि ह्यैन्दवादिक्रमेण तु ।
पापक्षयकृतैर्यैः स्याद्धर्मार्थे तु महोदयः ॥ १ ॥
चन्द्रवृद्ध्या चरेद् ग्रासाञ्शुक्ले कृष्णे क्षयं नयेत् ।
चन्द्रक्षये न भोक्तव्यं यवमध्यं शशिव्रतम् ॥ २ ॥

[42 *ślokas*.

इति ० ऐन्दवादिव्रतनिर्णयो नाम सप्तमो ऽध्यायः ॥ fol. 85*b*.

दानानि विधिना सार्धं जगौ यानि पराशरः ।
व्यासस्य तानि वक्ष्यामि श्रूयतां द्विजसत्तमाः ॥ १ ॥
दानेन प्राप्यते स्वर्गं सुखं दानेन लभ्यते ।
इहामुत्र च दानेन पूज्यो भवति मानवः ॥ २ ॥ ०

[382 *ślokas*.

इति ० दानधर्मेष्टापूर्तनिर्णयो नामाष्टमो ऽध्यायः ॥ fol. 102*b*.

त्रिभिः श्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ।
पराशरमुखाच्छ्रुत्वा शास्त्रं प्रोवाच सुव्रतः ॥ १ ॥*
शान्तीनामथ सर्वासां ग्रहशान्तिः परा स्मृता ।
ग्रहेभ्यो ऽपि गणेशस्तु तस्य शान्तिरथोच्यते ॥ २ ॥ ०

इति विनायकशान्तिः after *śloka* 34; ग्रहशान्तिः 85; अद्भुतशान्तिः 107; रुद्रपूजाविधिः 152;—रुद्रशान्तिः 45 *ślokas*; तडागादिप्रतिष्ठा 36 *ślokas*; लक्षहोमविधिः 22 *ślokas*; कोटिहोमविधिः 34 *ślokas*; पुत्रार्थपुरुषसूक्तविधानं 26 *ślokas*.

इति ० शान्तिविधाननिर्णयो नाम नवमो ऽध्यायः ॥ fol. 118.

अथातो नृपतेर्धर्मं वक्ष्यामि हितकाम्यया ।
पराशराच्छ्रुतं विप्रा वक्ष्यमाणं निबोधत ॥ १ ॥
भूभृद्भूमौ परो देवः पूज्यो ऽसौ परदेववत् ।
संविधाता हि सर्वस्य रक्षिता शासिता च सः ॥ २ ॥ ०

इति राजधर्मः 95 *ślokas*; वानप्रस्थधर्मः 50 *ślokas*; 30 more *ślokas*, after which इति ० ब्रह्मचारिगृहस्थवानप्रस्थयतिप्रभृत्याश्रमचतुष्टयभेदो नाम दशमो ऽध्यायः ॥ fol. 126.

मुमुक्षवो ऽपि रज्यन्ते देहाद्देहादितो यथा ।
शरीरान्तास्तथा प्राहुः परब्रह्मलयंगमाः ॥ १ ॥
स्ववाय्वम्बुसुधात्रीभिरारभ्यमाणुनानि (? ० शुचीनि) च ।
तन्मुख्यगुणसंयुक्तं तत्पञ्चाख्यालयं त्यजेत् ॥ २ ॥

[82 *ślokas*.

इति ० आश्रमविवेचनं नाम एकादशो ऽध्यायः ॥ fol. 130.

तच्छान्तं निर्मलं शुद्धं ध्यातव्यं हृत्सरोरुहे ।
तज्ज्ञेयं तद्वरेण्यं च बीजं मुक्तेस्तदुच्यते ॥ १ ॥

* Some MSS. omit this *śloka* here, see the end.

संचिन्त्य व्याहृतीः सप्त प्रणवाद्यास्तदन्तिकाः ।
सम्यगुक्तमिदं ध्यात्वा परब्रह्मणि योजयेत् ॥ २ ॥

इति प्रणवध्यानविधिः 28 *ślokas*; then follow 102 more *ślokas*:

य इदं शृणुयाद्वापि श्रावयेत्पठयेदपि ।
स प्रध्वस्ततमस्तोमो ब्रह्मलोकमवाप्नुयात् ॥ १०० ॥
त्रिभिः श्लोकसहस्रैस्तु त्रिभिर्वृत्तशतैरपि ।
पराशरोदितं धर्मशास्त्रं प्रोवाच सुव्रतः ॥ १०१ ॥
नमो ऽस्तु याज्ञवल्क्याय मनवे विष्णवे नमः ।
गौतमाय वसिष्ठाय नमः पाराशराय च ॥ १०२ ॥†

इति श्रीबृहत्पाराशरे धर्मशास्त्रे सुव्रतप्रोक्तसंहितायां योगोपदेशो नाम द्वादशो ऽध्यायः समाप्तः ॥ [GAIKAWAR.]

1290.

1672. Foll. 205; size 9 in. by $3\frac{1}{2}$ in.; written indifferently, in Devanāgarī, by two or three different hands, in Saṃvat 1654 (1597 A.D.); eight lines in a page.

Bṛihat-Pārāśara. [H. T. COLEBROOKE.]

1291.

2335. Foll. 139; size $11\frac{3}{4}$ in. by 5 in.; legibly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

The same work. [GAIKAWAR.]

1292.

2467. Foll. 153; size $10\frac{3}{4}$ in. by 5 in.; indifferent Devanāgarī writing of about the end of the 17th century; ten lines in a page.

The same work. [GAIKAWAR.]

1293.

283. Foll. 118; size $10\frac{1}{2}$ in. by $3\frac{1}{2}$ in.; fairly written, in Devanāgarī, towards the end of last century; ten or eleven lines in a page.

The same work. [H. T. COLEBROOKE.]

† MS. 1672 omits the last two *ślokas*.

Digitized by Microsoft®

1294.

1814. Foll. 147; size 12¼ in. by 4 in.; fair Devanāgarī writing; nine lines in a page.

Bṛihat-Pārāśara.

Dated: संवत् १८१६ वर्षे भाद्रपदमासे शुक्लपक्षे पंचम्यां सोमवासरे लिखितेयं ० [DR. JOHN TAYLOR.]

1295.

2324b. Foll. 29; size 11 in. by 5 in.; on the whole well written, about the beginning of last century; Devanāgarī character; ten lines in a page.

Laghu-Pārāśarīya-Dharmaśāstra (A). In twelve adhyāyas.

It begins:

अथातो हिमशैलाग्रे देवदारुवनाश्रये ।
व्यासमेकाग्रमासीनमृषयः पर्यपृच्छत (!) ॥ १ ॥
मनुष्याणां हितार्थाय वर्तमाने कलियुगे ।
शौचाशौचं यथाशक्त्या वद सत्यवतीसुत ॥ २ ॥

There are considerable discrepancies between this (A) and the next MS. (B), as well as the text printed in the Calcutta Collection of *Smṛitis* (C), and that commented on by *Mādhavācārya* (M., ed. and transl. Bibl. Ind.), and by *Nanda Paṇḍita*, as will appear from the following synopsis of the numbers of couplets in the several adhyāyas:

I.	A 62;	B 65;	C 64;	M. 73;	N. 67.
II.	A 65;	B 81;	C 16;	M. 15;	N. 15.
III.	A 39;	B 38;	C 54;	M. 41;	N. 48.
IV.	A 23;	B 24;	C 29;	M. 31;	N. 33.
V.	A 40;	B 42;	C 24;	M. 25;	N. 25.
VI.	A 56;	B 45;	C 71;	M. 75;	N. 75.
VII.	A 61;	B 42;	C 42;	M. 37;	N. 38.
VIII.	A 59;	B 32;	C 48;	M. 42;	N. 41.
IX.	A 46;	B 46;	C 62;	M. 60;	N. 60.
X.	A 45;	B 49;	C 41;	M. 37;	N. 41.
XI.	A 20;	B 23;	C 53;	M. 55;	N. 55.
XII.	A 13;	B 13;	C 74;	M. 82;	N. 82.
Total:	A 529;	B 500;	C 578;	M. 573;	N. 580.

Colophon: इति लघुपाराशरीये धर्मशास्त्रे समुद्रस्नानमहापातकनाशनं नाम द्वादशो ऽध्यायः ॥ [GAIKAWAR.]

1296.

1009A. Foll. 19; size 12 in. by 4½ in.; indifferently written, in Devanāgarī, towards the end of last century; eleven lines in a page.

The same work (B). This MS. begins:

ऋषयो हिमशैलाग्रे देवदारुवनाश्रमे ।
व्यासमेकाग्रमासीनमृषिं पृच्छंति धार्मिकम् ॥ १ ॥
मानुषाणां हितार्थाय धर्मं वद कलौ युगे ।
शौचाचारौ यथाशक्त्या वद सत्यवतीसुत ॥ २ ॥ ०

Colophon: इति पाराशरे धर्मशास्त्रे द्वादशो ध्यायः ॥ [H. T. COLEBROOKE.]

1297.

2586. Foll. 438; size 11½ in. by 3½ in.; fairly written, in Devanāgarī; nine lines in a page. One of the oldest MSS. in the collection.

Parāśarasmṛitivyākhyā Mādhavīyā, commonly called *Pārāśara-Mādhavīya.*

b. Foll. 255, of which are missing 174–199 (partially supplied by twelve leaves in modern handwriting); 237–247 (supplied by twelve leaves); 249-250 (supplied by six leaves).

Adhyāyas I.–III.; the first of which ends fol. 119, the second should end at fol. 174, which is lost.

Dated: संवत् १४६८ समये आषाढसुदि २ शनौ श्रीकाश्यां ॥

Two old leaves at the beginning contain a table of contents of this portion of the work. There have also been inserted there four leaves of different sizes and by different modern hands.

a. Foll. 181. Adhyāyas IV.–XII. This portion begins with the first eight introductory stanzas with which the first book is prefaced.

Adhy. IV. ends fol. 16*b*; V., fol. 20; VI., fol. 37*b*; VII., fol. 50*b*; VIII., fol. 66*b*; IX., fol. 77*b*; X., fol. 95; XI., fol. 117*b*.

Digitized by Microsoft®

The work is being published in the Bibliotheca Indica, by Pandit Candrakānta Tarkālaṅkāra. For a full analysis of it see Aufrecht's Catalogue, nos. 636, 637.

The colophon runs thus: इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां द्वादशोध्यायः समाप्तश्च प्रायश्चित्तकांडः॥ संवत् १[४]६८ समये ज्येष्ठवदि १ प्रतिपदा बुधवासरे॥ [Mack. Coll.]

1298.

402. Foll. 291; size 12½ in. by 5½ in.; fairly written, in Devanāgarī; 12–20 lines in a page. One leaf is missing between foll. 146 and 147.

The same work.

Adhyāya I. ends fol. 100*b* (dated Saṃvat 1856=A.D. 1799); II., fol. 136*b*; III., fol. 184*b* (dated Saṃvat 1842=A.D. 1785 which is rather too early for this copy); IV., fol. 194*b*; V., fol. 196*b*; VI., 207; VII., fol. 214*b*; VIII., fol. 223*b*; IX., fol. 229*b*; X., fol. 239*b*; XI., fol. 253.

The date of the MS. from which this copy was transcribed is given at the end: संवत् अवरसाहिसरत्राणराज्ये संवत्सर नृपतिविक्रमादित्यराज्ये संवत् १६५३ वर्षे भाद्रपदवदि ६ बुधवासरे लिखितमिदं ॰

[H. T. Colebrooke.]

1299.

1168. Foll. 227; size 13 in. by 4½ in.; well written, in the Devanāgarī character; seven lines in a page.

Vyavahāra-Mādhava, being the *Vyavahāra-kāṇḍa*—or supplementary (third) chapter on jurisprudence—of the *Pārāśara-mādhavīya*.

It begins:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥

सो ऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनसङ्गतीर्थनिपुणः सद्वृत्तितीर्थं श्रयन्।
लब्धामाकलयन् [प्र]भावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम्॥ ॰

Eight *ślokas*, ending ॰पराशरस्मृतिविवृतौ प्रवर्तते॥ (see Aufrecht, Cat. Oxf., nos. 636, 637); after which the MS. proceeds:

व्याख्याते आचारप्रायश्चित्ते॥ अथ व्यवहारः प्रस्तूयते॥ यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान्। तथाप्याचारकाण्डे चतुर्णां वर्णानां क्रमेणाचारान् ब्रुवन्। क्षत्रियस्तु प्रजाश्चैव क्षितिं धर्मेण पालयेदित्यस्मिन्वचने क्षत्रियविशेषस्य राजाचारविशेषमवोचत्॰

इति व्यवहारपरिच्छेदः fol. 9*b*; सभानिरूपणं fol. 15; व्यवहारदर्शनविधिः fol. 19; आसेधादिविधिः fol. 21; दर्शनोपक्रमः fol. 23*b*; प्रतिज्ञापादः fol. 27; उत्तरपादः fol. 35*b*; क्रियाभेदाः fol. 37*b*; साक्षिनिरूपणं fol. 48; लेख्यप्रकरणं fol. 56; भुक्तिप्रकरणं fol. 61; घटविधिः fol. 71*b*; अग्निविधिः fol. 74; जलविधिः fol. 76*b*; विषविधिः fol. 78*b*; कोशविधिः fol. 79*b*; तण्डुलविधिः fol. 80; तप्तमाषविधिः fol. 81; फालविधिः ib.; इति धर्मस्य विधिः॥ इति क्रियापादः॥ fol. 81*b*;

इति निर्णयपादः fol. 90; अष्टादशपदनिरूपणं fol. 94*b*; आधिविधिः fol. 102; ऋणादानप्रकरणं fol. 113*b*; निक्षेपप्रकरणं fol. 117*b*; अस्वामिविक्रयाख्यं पदं fol. 121; दत्तादत्तप्रदानिकं fol. 128; अभ्युपेत्याशुश्रूषाख्यं विवादपदं fol. 137*b*; संविद्व्यतिक्रमाख्यं विवादपदं fol. 142; क्रीतानुशयः fol. 144; क्रयविक्रयानुशयाख्यं विवादपदं fol. 146*b*; स्वामिपालाख्यं विवादपदं fol. 150*b*; सीमाविवादनिर्णयः fol. 159; दण्डपारुष्यं fol. 165*b*; वाक्पारुष्यं fol. 167*b*; स्तेयप्रकरणं fol. 172*b*; साहसप्रकरणं fol. 178*b*; स्त्रीसंग्रहः fol. 184*b*;—

अथ दायभागाख्यं व्यवहारपदं कथ्यते॥ दायभाग इति प्रोक्तं व्यवहारपदं बुधैरिति। ॰ this chapter has been translated by Dr. Burnell (Madras 1868); ॰ इति दायविभागः॥ fol. 222*b*; इति द्यूतसमाह्वयाख्ये विवादपदे॥ अथ बृहस्पतिना निरूपितं प्रकीर्णकाख्यं विवादपदमभिधीयते। fol. 225*b*.

It ends: इति श्रीमहाराजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरस्य माधवामात्यस्य

Digitized by Microsoft®

कृतौ पराशरस्मृतिव्याख्यायां व्यवहारमाधवः समाप्तः ॥ ० संवत् १८६६ शाके १७३१ वैशाखशुक्ल ८ अष्टम्यां शनिवासरे ॥

[H. T. Colebrooke.]

1300.

2883c & e. Foll. 23 and 66 resp.; size 9¾ in. by 6 in.; modern Telugu handwriting; 20–30 lines in a page.

The same work.

MS. c., the leaves of which have been bound in inverted order, contains from shortly after the commencement of the chapter on *vākpārushya* to the end.

It ends: इति ० (as above) माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां तृतीयो ध्यायस्समाप्तः ॥

The leaves have the marginal title *vyavahāra-mādhavam.*

[Mack. Coll.]

1301.

1699. Foll. 279; size 9¼ in. by 4½ in.; fairly written, in the Devanāgarī character; 10–12 lines in a page.

[*Laghu-*]*Parāśara-smṛiti*, with a commentary entitled *Vidvanmanoharā*, chiefly abridged from that of *Mādhava*, by *Nanda Paṇḍita*, also called *Vināyaka Paṇḍita*, son of *Rāma Paṇḍita*.

The MS. is very incorrect.

Adhy. I. begins (somewhat corrected):

श्रीवत्सांकितवक्षसः प्रणयिनो नित्यार्चने संविधाम्
आधातुं निहितं गिरींद्रसुतयोत्संगे स्वयं धूर्जटेः* ।
चूडाचुंबिकलंकपंकिलकलं चंद्रं मृणालभ्रमाद्
आदातुं करमुत्क्षिपंतमसकृद्दुंढिं चिरं भावये ॥ १ ॥
यं साक्षात्कर्तुमाद्यं पुरुषमविकृतिं योगिनः शुद्धचित्ता
मैत्र्याद्यैः क्लेशकर्मोद्भवविविधविपाकाशयैरप्रमृष्टं ।
भेदख्यातिं प्रपद्य प्रकृतिपुरुषयोराश्रयंते सबीजं
योगं तं श्रीसहायं हरिमनिशमहं सच्चिदानंदमीडे ॥ २ ॥

* गिरींद्रसुतयोत्संगेश्वप्रणयधूर्जटेः MS.

धर्माधिकारिकुलकैरवकाननेंदु-
श्रीरामपण्डितसुतेन विनायकेन ।
व्याख्यायते कलियुगोचितवर्णधर्म-
शास्त्रं पराशरमुखोक्तमल्पशब्दैः ॥ ३ ॥
तरतः सततं विनेरणेन स्मृतिसिंधौ दृढतकनकबंधौ ।
स मृकंडुजनेरिवावलंबो मधुपादभपायकेशवो ऽयं(!) ॥४॥
माधवाचार्यनिर्दिष्टव्याख्यामार्गानुसारिणः ।
स्खलतपि (l. तो ऽपि) न मे दोषः परप्रत्ययगामिनः ॥ ५ ॥

इह खलु कलिकवलितानुभावान्वर्णाश्रमानुगृह्णानैः परमकारुणिकैर्महामुनिभिर्वेदव्यासपुरःसरैस्तत्वजिज्ञासया पृष्टान्कलिकालानुष्ठेयान्वर्णाश्रमधर्मान्पराशरमुनिमुखाद् ० अथातो ० १ ॥ The number of *ślokas* commented upon is 67.

II. begins fol. 58:

द्विजांकधरमेकतो विधृतकौस्तुभं मध्यतो
रमाचरणपंकजस्खलितयावकं चान्यतः ।
सुरोदितमुरो निजं सततमीक्षमाणं मुदा
सदाभिमतसिद्धये नमत माधवं साधवः ॥ १ ॥
धर्माधिकारि ० ।
शास्त्रे पराशरकृते विवृतिर्द्वितीया-
ध्याये विधीयत इहोदितवृत्तिसिद्ध्यै ॥ २ ॥

प्रथमाध्याये चतुर्णामपि वर्णानामैहिकामुष्मिकफलहेतू साधारणासाधारणौ धर्मौ निरूपितौ । इदानीं सर्ववर्णानां जीवनहेतुं साधारणधर्मं निरूपयितुं द्वितीयाध्यायमारभते । तत्राध्यायार्थं प्रतिजानीते । अतः परं गृहस्थस्य ० १ ॥ 15 *ślokas.*

III., beg. fol. 65:

विश्वस्यालंकरिष्णुस्त्रिभुवनजठरस्याप्यखिन्नः सहिष्णुर्
वारं वारं भविष्णुर्निजभजनकृतामर्थसिद्धौ वरिष्णुः ।
भक्तानां हृत्सु जिष्णुर्दितितनयभुवां संपदामाहरिष्णुर्
देवानां संवरिष्णुः रुहृदयहृदयेष्टाविरास्नास(? ० येष्वा-
[विरास्तां स) विष्णुः ॥ १ ॥
धर्माधिकारिकुलकैरव ० । विवृतितृतीयाध्याये विधीयत
इहोदितवृत्तिसिद्ध्यै ॥ २ ॥ ०
अतः परं प्रवक्ष्यामि जनने मरणे तथा ० १ ॥ 48 *ślokas.*

IV., beg. fol. 85:

सुरालयनिवासिनां मरकतप्ररोह ० १ ॥
धर्माधिकारि ० । क्रियते चतुर्थाध्यायप्रकारणकसुतादि-
विनिर्णयो (!) ऽत्र ॥ २ ॥ ०
अतिमानादतिक्रोधात् ० १ ॥ 33 *ślokas.*

Digitized by Microsoft®

V., fol. 105:

वामेनोत्क्षिप्य गोवर्धनमतिसुरतिन्यस्तदृष्टिः ० १ ॥

धर्माधिकारि ०। संस्कारसिद्धिमभिधातुमिहाहिताग्नेरार-
भ्यते विवरणांकिलपंचमे (!) ऽपि ॥ २ ॥ ०

वृकश्वानसृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः ।
स्नात्वा जपेत्स गायत्रीं पवित्रां वेदमातरं ॥ १ ॥ ०

25 *ślokas.*

VI., fol. 113:

संवर्त्तोद्विलदुग्धांबु ० १ ॥

धर्माधिकारि ०। व्याख्यायते हिमालिनिकरणादिशुद्धीर्वक्तुं
पराशरवृत्ताविह षष्ठं (!) ॥ २ ॥ ०

अतः परं प्रवक्ष्यामि प्राणिहत्यासु निष्कृतिं ० १ ॥ ० 75 *ślokas.*

VII., fol. 134:

दध्ना वध्नाति कस्याप्यभिलम्भनयनं (?) ० ॥ १ ॥

धर्माधिकारि ० । द्रव्येषु शुद्धिमभिधातुमिहाखिलेषु
व्याख्यायते मनुविधामपि सप्तमो ऽयं ॥ २ ॥ ०

अथातो द्रव्यशुद्धिस्तु पराशरवचो यथा । ० १ ॥ 38 *ślokas.*

VIII., fol. 149:

आधाय प्रेमसाधारणमिव लगवान्पूर्वमस्मासु ० ॥ १ ॥

धर्माधिकारि ० । शास्त्रे पराशरकृते क्रियते विचारो
ऽध्यायेऽष्टमे निखिलगोवधशुद्धिसिद्धै ॥ २ ॥

गवां वंधनयोक्रेषु भवेन्मृत्युरकामतः । ० १ ॥ 41 *ślokas.*

IX., fol. 167:

यद्वत्कापुरुषादनुव्रजनतस्तच्चिंतसंरक्षणात्तत्त्वद्वा ० १ ॥

धर्माधिकारि ० । शास्त्रे पराशरकृते क्रियते व्यवस्था-
ध्याये ऽष्टमे ऽत्र नवमे विहितव्रतानां ॥ २ ॥ ० ।

गवां संरक्षणार्थाय ० १ ॥ 60 *ślokas.*

X., fol. 183:

प्रह्लादाह्लादहेतुः सकलसुरगणानंदकेतुः श्रुतीनां ० ॥ १ ॥

धर्माधिकारि ० । ० क्रियते ह्यगमार्गनविशुद्धिवचनं दशमे
विचारः ॥ २ ॥ ० ॥ चतुर्वेद्यो ० १ ॥ 41 *ślokas.*

XI., fol. 206:

पिंचतमसकृदूर्गं च सपुटेमुखं योः सुधां श्रियः(!) ० ॥ १ ॥

धर्माधिकारि ० । एकादशो विवरण क्रियते ऽधुनात्रा-
ध्यायेपराशरकृतावपनष्टसंशुचै (!) ॥ २ ॥ ०

अमेध्यरेतो ० १ ॥ 55 *ślokas.*

XII., fol. 227:

समाने शब्दार्थे तदनुगतवर्णे ऽपि च समे
स्वरूपे सामर्थ्ये सकलपुरुषादो दाहरणे (!) । ० १ ॥

धर्माधिकारि ० । तद्वादशे विवरणं क्रियते ऽधुनात्रा-
ध्याये महाद्यवयशुद्धिविचारणार्थं ॥ २ ॥ ०

दुःस्वप्नं यदि पश्येत्तु ० १ ॥ 82 *ślokas*; the last being, as in the Calcutta edition:

यथाध्ययनकर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गकामिना ॥ ८२ ॥ ०

The commentary concludes with five mostly very corrupt couplets, the last of which runs thus:

पराशरस्मृतेः व्याख्या जाताभिख्या प्रकाशिता ।
येषां नांतरात्मा नाशो यमनया प्रीयतां हरिः ॥ ५ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां द्वादशो ध्यायः ॥ संवत् १८५८ वैशाखमासे शुक्लपक्षे नवमि ९ वारमंगलवारे ॥

The present commentary is referred to by *Nanda Paṇḍita* himself, in his *Keśava-Vaijayantī* on the *Vishṇusmṛiti*, which was written in 1622 A.D. For further particulars see no. 1342.

Another writer of the same name, the son of *Paṇḍita śrī Deva Mahāmahopādhyāya*, wrote the *Smārtasamuccaya* (Rāj. Mitra, Notices, vi., p. 165) and *Jyotiḥśāstrasamuccaya* (ib. v., p. 80).

For another MS. of *Nanda Paṇḍita's* commentary, see Rāj. Mitra, Notices, v., p. 111.

[H. T. Colebrooke.]

1302.

2042d. Foll. 9; size 11 in. by 5 in.; legibly written, in Devanāgarī, in the latter part of the last century; ten lines in a page.

Āṅgirasa-Dharmaśāstra, a treatise on defilement and expiation, in 168 *ślokas*; differing greatly from the *Āṅgirasa-smṛiti* of the Calc. Collection I., p. 554 (72 *ślokas*). Rather incorrect.

Digitized by Microsoft ®

It begins:

धर्मजिज्ञासुभिः सम्यगमितौजा महाद्युतिः ।
भारद्वाजादिभिः पृष्टः प्राब्रवीदेतदंगिराः ॥ १ ॥
आश्रमेषु [च] सर्वेषु वर्णानामनुपूर्वशः ।
प्रायश्चित्तविधिं कृच्छ्रं वक्ष्यमाणं निबोधत ॥ २ ॥
अन्त्यानामविशेषेण जगध्वानं (?l. जग्ध्वान्नं हि) द्विज-
[न्मनां ।
चांद्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां स्मृतं ॥ ३ ॥
चंडालकूपभांडेषु यः त्वपः पिबते द्विजः ।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ॥ ४ ॥
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः ।
तदर्धं तु चरेद्वैश्यः पादं शूद्रः समाचरेत् ॥ ५ ॥
चांडालोदकभांडेषु यः पिबेत्तृषितो जलं ।
तत्क्षणं तत्समुच्चार्य प्राजापत्यं समाचरेत् ॥ ६ ॥
यदि चानुद्धृतं तोयं शरीरे तस्य जीर्यति ।
तदा विप्रः स्वशुद्ध्यर्थं कृच्छ्रं सांतपनं चरेत् ॥ ७ ॥
चांडालभांडसंस्पृष्टं पिबेच्चेत्तृषितो जलं ।
गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ॥ ८ ॥
यस्तु चांडालसंस्पृष्टं पिबेत्तोयं च कामतः ।
मनुसंतापनं (? तनु °) कृच्छ्रं चरेत् शुद्ध्यर्थमात्मनः ॥ ९ ॥ °
अत ऊर्ध्वं प्रवक्ष्यामि नीलीशौचस्य यो विधिः ।
स्त्रीणां क्रीडार्थसंभोगे शयनीये न दुष्यति ॥ ३२ ॥
[(Calc. ed., śl. 12).

संध्या स्नानं जपो होमः स्वाध्यायः पितृतर्पणं ।
वृथा तस्य महायज्ञा नीलीरक्तस्य धारणात् ॥ ३३ ॥
पालनाद्विक्रयाच्चैव नीलीवृत्त्युपजीवनात् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥ ३४ ॥
नीलीरक्तं यदा वस्त्रं विप्रो दोःषु (!) धारयेत् ।
अहोरात्रोषितो स्नात्वा पंचगव्येन शुध्यति ॥ ३५ ॥ °
स्नानं रजस्वलायास्तु चतुर्थे ऽहनि शुध्यति ।
कुर्याद्रजसि निर्वृत्ते नानिवृत्ते कदाचन ॥ ४१ ॥
रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ।
ऊर्ध्वं त्रिरात्रं स्नाताया शवे धर्मेण दाहयेत् ॥ ४२ ॥
रोगेण यद्रजः स्त्रीणामत्यंतं संप्रवर्तते ।
अशुद्धास्तु न तेन स्युस्तासां वैकारिको मदः ॥ ४३ ॥ °
भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुराविण्मूत्रसंस्पृष्टं शुध्यते तापलेखनैः ॥ ५५ ॥
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च ।
शुध्यंते दशभिः क्षारैः श्वकाकोपहतानि च ॥ ५६ ॥
शुद्धिः सुवर्णरूप्याणां मारुतार्केंदुरश्मिभिः ।
गंडूषपादशौचं च कुर्यात्कांस्यस्य भाजने ॥ ५७ ॥
भूमौ निक्षिप्य षण्मासान्पुनराकारमादिशेत् ।
निर्लेपकांचनं भांडमद्भिरेव विशुध्यति ॥ ५८ ॥ °

This section, as will be seen, shows considerable resemblance to the 6th, 7th and 8th adhyāyas of the *Āpastambīya-Dharmaśāstra*, Calc. Dh. I., p. 574–78; and below, no. 1313; see also next MS.

It ends:

अनुच्छिष्टेन संस्पृष्टो येन चाचमनं चरेत् । [śl. 11)॥
तेनैवोच्छिष्टसंस्पृष्टस्त्रिरात्रेण विशुध्यति ॥ १६४ (Calc.,
शवसूते समुत्पन्ने सूतकं तु भवेद्यदि ।
शवेन शुध्यते सूतिर्न सूता शुध्यते शवं ॥ १६५ ॥
मृतकेन तु जातेन उभाभ्यां सूतकं यदि ।
पातकेन तु लिप्येत सूतकेनैव गच्छति ॥ १६६ ॥
सर्वव्रतेषु निर्दिष्टं पश्चात्सूतकिनो भवेत् ।
चीर्णव्रतेन निर्दिष्टं पश्चाद् ब्राह्मणभोजनं ॥ १६७ ॥
अधीते य इदं शास्त्रमुक्तमंगिरसा स्वयं ।
ऋषीणां सन्निधौ विप्रः सर्वपापैः प्रमुच्यते ॥ १६८ ॥
इति श्रीअंगिराप्रोक्तं धर्मशास्त्रं समाप्तं ॥

Cf. Burnell, Index Tanj. MSS., p. 124*a*.

[GAIKAWAR.]

1303.

2042c. Foll. 2; size and writing as above. *Aṅgiraḥ-smṛiti* (?), in 32 ślokas. Very incorrect.

It begins:

गृहाश्रमादिधर्मेषु वर्णानामनुपूर्वशः ।
प्रायश्चित्तविधिं दृष्ट्वा त्वंगिरोवचनं यथा ॥ १ ॥
अत ऊर्ध्वं प्रवक्ष्यामि नीलीशौचस्य यो विधिः ।
स्त्रीणां क्रीडार्थं संयोजने तथा (!) ॥ २ ॥
बालानां विक्रयो चैव लाक्षायाश्च विशेषतः ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥ ३ ॥
स्नानं दानं जपो होमः ° see above, śl. 33.

It ends:

अवासकीर्तिता नारी पुत्रभर्तृविवर्जिता ।
भोक्तुं प्रतिग्रहीतुं वा न तस्याः स्यात्कदाचन ॥ ३१ ॥

Digitized by Microsoft ®

स्त्रीधनानि तु ये मोहादुपजीवंति बांधवाः ।
नारीयानानि वस्त्राणि तेषां पापमधोगतिः ॥ ३२ ॥
इति अंगिरोप्रोक्तं स्मृतिधर्मशास्त्रं समाप्तम् ॥

[Gaikawar.]

1304.

3245b. Foll. 2*a*–6*b*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 34–37 lines in a page.

Āṅgirasa-Dharmaśāstra, in twelve adhyāyas.

I. *Upodghāta*, begins (the first line partly rubbed out):

. . . . त्रिभुवनेश्वरं ।
धर्मस्य दर्शनात्राय (? l. र्थाय) अंगिरा ऋषिमब्रवीत् ॥
अथ त्रयाणां वक्ष्यामि प्रमाणं सिद्धिमादितः ।
धर्मस्य पार्षदस्यैव प्रायश्चित्तक्रमस्य च ॥
प्रायश्चित्तं चतुष्पादं विहितं कर्मकर्तृभिः ।
परिषद्दशधा प्रोक्ता त्रिविधा हि समासतः ॥
प्रमाणाभिहितं यत्तु तत्सर्वं गिरये सुखं ।
अप्रमेयप्रमाणस्य दुःखेनाभिगमोद्भवे ॥

II. *Parishadupasthānavidhi*:

अथ ऊर्ध्वं प्रवक्ष्यामि उपस्थानस्य लक्षणं ।
उपस्थितेनभिन्याये (!) न व्रतादेशमर्हति ॥
सद्यो निःसंशयः पापो न भुंजीतानुपस्थितः । °

III. *Prāyaścittavidhāna*:

सत्येन द्योतते राजा सत्येन द्योतते रविः ।
सत्येन द्योतते वह्निः सर्वं सत्ये प्रतिष्ठितं ॥

IV. *Parishallakshaṇakathana*:

प्रायो नाम तपः प्रोक्ता (!) तपोनिश्चय उच्यते ।
तपोनिश्चयसंयोगात् प्रायश्चित्तमिति स्मृतं ॥

V. *Prāyaścittanimnottārakathana*:

चतुर्वेद्यो विकल्पी च अंगविधर्मपाठकैः ।
यत्र चाश्रमिणो मुख्याः परिदे (!) षोडशावराः ॥

VI. *Prāyaścittōjananakathana*:

पणस्तु परिषत्कल्पस्य पल्पस्य (!) परिषद्वलं ।
कारिणं चाप्युपस्थानं बलं संध्यगवेदितं (!) ॥

VII. *Pāpapariganaṇa*:

आर्तीनां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जान (!) प्रगच्छंति ते च यांति समंततः ॥

VIII. *Śūdrānnādinishedhakathana*:

आहिताग्निस्तु यो विप्रा[त्] प्रतिगृह्णाति गोव्रतः ।
भोक्तृणां समतां याति तिर्यग्योनिं च गच्छति ॥

IX. *Abhakshyaprāyaścittavidhi*:

अंतर्दशाहे भुक्तान्नं सूतके मृतके ऽपि वा ।
दशरात्रं पिबेद्भक्तं ब्राह्मणो ब्राह्मणस्य तु ॥

X. *Hiṃsāprāyaścittakathana*:

दंडादूर्ध्वं तु यद्येना (!) प्रहारेण निपातयेत् ।
द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विधीयते ॥

XI. *Govadhaprāyaścittavidhi*:

उपपातकसंयुक्तो गोघ्नो भुंजीत यावकं ।
अक्षारलवणं रूक्षं षष्ठे काले ऽस्य भोजनं ॥

XII. *Kṛicchrādisvarūpakathana*:

अत ऊर्ध्वं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभं ।
यमधीत्य विमुच्यंते श्रुत्या स्मृत्या च वै द्विजाः ॥
सदा त्रिषवणं स्नायात् सकृत्स्नात्वा पयः पिबेत् ।
प्रातः समारंभं कुर्याज्जप्यस्तु नित्यशः (!) ॥

Colophon: इत्यंगीरसधर्मशास्त्रे कृछ्रादिस्वरूपकथनं (!) नाम द्वादशोध्यायः ॥

[Mack. Coll.]

1305.

2489i. Foll. 7; size 11 in. by 5 in.; clear, modern Devanāgarī writing; ten lines in a page.

Ātreya-Dharmaśāstra, in nine adhyāyas [A.]

I. हुताग्निहोत्रमासीनमत्रिं वेदविदां वरं ।
पृच्छंति जातसंदेहा ऋषयः संशितव्रताः ॥ १ ॥
भगवन् केन दानेन जप्येन तपसैव च ।
मुच्यंते पातकैर्युक्तास्तन्नो ब्रूहि महामुने ॥ २ ॥
अत्रिरुवाच ।
अविख्यापितदोषाणां पापानां महतां तथा ।
सर्वेषां चोपपापानां (A. B.) शुद्धिं वक्ष्यामि तत्त्वतः॥३॥
प्राणायामैः पवित्रैश्च व्याहृतिप्रणवैस्तथा ।
पवित्रपाणिरासीनो ब्रह्मविन्यस्तमभ्यसेत् ॥ 10 (B 12) [ślokas.

II. प्राणायामांश्चरेत् त्रींस्तु (प्राणायामं चरेद्यस्तु B) यथा-[कालमतंद्रितः ।
अहोरात्रकृतं पापं तत्क्षणादेव नश्यति ॥ 13 *ślokas.*

III. अथ कार्यशतं साग्रं कृतं वेदश्च धार्यते ।
सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेंधनं ॥ 15 *ślokas.*

Digitized by Microsoft®

IV. अचीर्णप्रायश्चित्तानां यमविषयनरकपातनानि अपातितानां यदि कदाचिन्मानुष्यं भवति तदैतच्चिह्नांकितशरीरा जायंते । तद्यथा । अनृतवादी खलो ब्रह्महा कुष्ठी न्यासापहारी वानपत्यो ऽपि रत्नापहारी चात्यंतदरिद्रः । ° prose.

V. न स्त्री दुष्यति जारेण न विप्रो वेदकारगः ।
नापो मूत्रपुरीषेण नाग्निर्दहनकर्मणा ॥
बलात्कारोपभुक्ता वा चौरहस्तगतापि वा । [ślokas.
स्वयं चापि विपन्ना वा यदि वा विप्रवादिता ॥ 16

VI. सर्ववेदपवित्राणि तानि वक्ष्याम्यशेषतः ।
येषां जप्यैश्च होमैश्च पूयंते कल्मषावृताः ॥
followed by prose.

VII. अथातो रहस्यानि व्याख्यास्यामः । नटनर्तकगायनगांधर्विकश्वपाककारुकवीशोत्कट(विषोत्कट B)वीणाशास्त्रशकयवनकांबोजबाह्लीकखशद्रविडवंगपारशवील्वातदीनां(पारशयविल्वातातादीनां B) भुक्त्वा प्रतिगृह्य च स्त्रीगमने सहभोजने रहस्ये रहस्यातिप्रकाशे प्रकाश्यानि चरेत् ° mixed prose and verse.

VIII. त ऋषयः पुनरत्रिमाहुः । भगवन् किमेतानि प्रायश्चित्तानि भवंत्याहो स्विदन्यानि संति रहस्यानि व्याख्यास्यामः ° । mixed prose and verse.

IX. यो ध्याता यच्च तद्ध्यानं यद्ध्येयं यत्प्रयोजनं ।
सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति ॥ १ ॥ °
प्रत्याहारस्तथा ध्यानं प्राणायामो ऽथ धारणा ।
तर्कश्चैव समाधिश्च षडंगो योग उच्यते ॥ ६ ॥
यस्त्विदं पठते शास्त्रं विप्रेभ्यश्च प्रयच्छति ।
मुच्यते सर्वपापेभ्यो ब्रह्मलोकं स गच्छति ॥ ७ ॥

इत्यात्रीये धर्मशास्त्रे नवमो ऽध्यायः ॥ समाप्तं चात्रिप्रणीतस्मृतिधर्मशास्त्रं ॥

See Burnell, Index Tanjore MSS., p. 124*a*.

[GAIKAWAR.]

1306.

2096a. Foll. 6; size 9 in. by 6¼ in.; legibly written, in Devanāgarī; 15–18 lines in a page.

The same work [B.]

Colophon: इत्यात्रीये धर्मशास्त्रे नवमोध्यायः संपूर्णमगमत् । संवत् १८५७ आषाढकृष्ण ३० सोमे राजनगरे लिखिता ॥

[GAIKAWAR.]

1307.

913d. Foll. 20; size 13¼ in. by 6 in.; large, modern Devanāgarī writing; ten lines in a page.

Ātreya-smṛiti, in 369 *ślokas*.

It begins:

हुताग्निहोत्रमासीनमत्रिं वेदविदां वरं ।
सर्वशास्त्रविधिज्ञातमृषिभिश्च नमस्कृतं ॥
नमस्कृत्य च ते सर्वे इदं वचनमब्रुवन् ।
हितार्थं सर्वलोकानां भगवन् कथयस्व नः ॥

It agrees on the whole with the second of the three treatises printed in the Calc. Dharm., as ascribed to *Atri* (I. 13–46).

It ends:

विद्यार्थी लभते विद्यां धनार्थी लभते धनं ।
आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियं ॥

इत्यत्रिमहर्षिस्मृतिः समाप्ता ॥

[H. T. COLEBROOKE.]

1308.

3245d. Foll. 10*b*–15*a*; size 15¼ in. by 9½ in.; folio; European paper; Telugu character; 34–38 lines in a page.

Ātreya-Dharmaśāstra, in six adhyāyas.

I. भुक्ताग्निहोत्रमासीनमत्रिं व्रतवतां वरं ।
उपागता स्म पृच्छंति ऋषयः संशितव्रताः ॥
भगवन् केन दानेन जप्येन नियमेन च ।
शुध्यंते पातकैर्युक्तास्तान् ब्रवीष्व महामुने ॥

II. *Rahasyaprāyaścittakathana:*
प्राणायामांस्तु यः कुर्याद् यथाविधिरतंद्रितः । °

III. *Dānaprakaraṇakathana:*
अस्य कार्यशतं साग्रं कृतं वेदश्च साध्यते । °

IV. *Rahasyaprāyaścittakathana:*
अथातो रहस्यप्रायश्चित्तविधिं व्याख्यास्यामः । अगमनस्त्रीगमने भोजने रहस्ये पावमानमनुतिष्ठेत् । अथाप्सु निमज्जैत्वातरसमंदीधत्रिरात्रमावृत्य (!) °

V. *Pitṛimedhaprakaraṇa:*
उदक्यानरणे प्राप्त सूतिकामरणे तथा । °

Digitized by Microsoft®

VI. *Ācāraprakaraṇa:*

अस्नाताशी मलं भुंक्ते अजपिपूयशोणितं ।
अहुत्वाशी क्रमो (!) भुंक्ते अदाता विषमुच्यते ॥

Colophon: इत्यात्रेयधर्मशास्त्रे आचारप्रकरणं नाम षष्ठो स्मृतेरध्यायः ॥ इति आत्रेयस्मृतिः समाप्तं ॥

Cf. Calc. Dh. I. 1–12; 47–59.

[Mack. Coll.]

1309.

3246a. Foll. 1*a*–3*a*; size 8¾ in. by 7½ in.; 4to; coarse country paper; Telugu character; 19 or 20 lines in a page.

Atri-smṛiti; corresponding to the fifth adhyāya of the (*Vṛiddha-*)*Atri-saṃhitā*, Calc. Dh. I. 53.

It begins:

चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य च ।
वर्तुलं चैव वैश्यस्य शूद्रस्याभ्युक्षणं तदा ॥
ब्रह्मा विष्णुश्च रुद्रश्च श्रीहुताशन एव च ।
मंडलान्युपजीवंति तस्मात्कुर्वीत मंडलं ॥

It ends:

सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे ।
सोमे ऽप्येवं न संदिग्धं तस्मात्स्नानं समाचरेत् ॥
इत्यत्रिकृतं धर्मशास्त्रं समाप्तं ॥

[Mack. Coll.]

1310.

3247c. Foll. 5*a*–6*b*; size 10 in. by 7½ in.; 4to; Telugu character; 21–24 lines in a page.

The same section.

Beginning and end as above.

[Mack. Coll.]

1311.

3248c. Foll. 6*b*–8*b*; size 9½ in. by 7¾ in.; 4to; Telugu character; 18–20 lines in a page.

The same section.

[Mack. Coll.]

1312.

3249c. Foll. 5*b*–7*b*; size 10 in. by 7¾ in.; Telugu character; 20 lines in a page.

The same section of the *Atri-smṛiti.*

The last three MSS. were probably derived from the same original.

[Mack. Coll.]

1313.

723h. Foll. 8; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Āpastambīya-Dharmaśāstra, a treatise on expiations, in ten adhyāyas [A.]

It begins:

आपस्तंबं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयं ।
दूषितानां हितार्थाय वर्णानामनुपूर्वशः ॥
परेषां परिवादेषु निवृत्तमृषिसत्तमं ।
विविक्तदेश आसीनमात्मविद्यापरायणं ॥
अनन्यमनसं शांतं सत्त्वस्थं योगवित्तमं ।
आपस्तंबमृषिं सर्वे समेत्य मुनयो ऽब्रुवन् ॥

The text, as printed in the Calc. Dh. I., pp. 567–584 agrees with that of these MSS. as to the number of *ślokas,* the only discrepancy in this respect being in the fifth adhyāya, where after śl. 2 these two MSS. insert the following half-śloka:

अहोरात्रेण वैश्यस्तु (अहोरात्रं तु वैश्यस्य B) पंचगव्येन [शुध्यति ।

These MSS. offer however numerous (and many better) various readings.

It ends:

देवद्रोण्यां विवाहेषु यज्ञेषु प्रततेषु च ।
कल्पितं सिद्धमन्नाद्यं नाशौचं मृतसूतके ॥
इत्यापस्तंबीये [धर्मशास्त्रे B] दशमो ऽध्यायः ॥

For the *Āpastambīya-Dharmasūtra,* see above, nos. 313–316.

[H. T. Colebrooke.]

Digitized by Microsoft®

1314.

69f. Foll. 41; size 10¾ in. by 3 in.; large, indifferent Devanāgarī writing; 4–6 lines in a page.

Āpastambīya-Dharmaśāstra. [B.].

Dated (for the whole volume): संवत् १८४८ भाद्रे मास्यसिते पक्षे नवम्यां भौमवासरे लिखितं देवरामेण धर्मशास्त्रसमुच्चयं ॥

[H. T. Colebrooke.]

1315.

723a. Foll. 3; size 12¾ in. by 5¾ in.; clear, modern Devanāgarī writing; ten lines in a page.

Auśanasa-Dharmaśāstra, in 51 couplets on mixed castes.

It begins:

अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकं ।
अनुलोमविधानं च प्रतिलोमविधिं तथा ॥

It ends:

एतत्संक्षेपतः प्रोक्तं जातिवृत्तं विभागशः ।
जात्यंतराणि दृश्यंते संकल्पादित एव तु ॥

इति श्री[उ marg.]शनसं धर्मशास्त्रं समाप्तम् ॥

This is the first and smaller of the two treatises (*Auśanasa-dharmaśāstra* I., pp. 497–501) printed in the Calc. Dh., under the name of *Uśanas;* while the second (*Auśanasa-smṛiti* I., pp. 501–554) consists of nine adhyāyas (of together 628 *ślokas*). For a third treatise, ascribed to *Uśanas*, see next MS.

[H. T. Colebrooke.]

1316.

2489g. Foll. 8; size 11 in. by 5¼ in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Auśanasa-Dharmaśāstra, a treatise on the duties of castes, in seven adhyāyas of mixed prose and verse.

The MS. is very incorrect, and there are several lacunæ, especially one in the 4th chapter, for which two pages have been left blank.

I. beg.: तत्र जन्ममरणयोः कालें देशांतरयोः शैवं दशरात्रं मातापितृभ्यः सूतकं मातुरित्येके उपस्पृश्य - - - - प्रतुराहवाले (? प्रातरहःकाले) देशांतरस्मे वानग्निके वोराद्वाते अजाशके (!) अग्निप्रवेशे युद्धहे च सद्यः सौचानष्टपतितानिस्तनिंदिताचारैर्न सह संवसेत् । कृतलक्षणैर्दर्शनभाषणाद्विवर्जयेत् । दर्शने ज्योतिर्दर्शनं । स्पर्शने हृदयालंभनं । संभाषणे ब्राह्मणसंभाषणे ब्रह्मेण संभाषणं पुनरूपस्पर्शनं च ।

ध्यायः (!) शुद्धा भूमिर्गता यत्रणैवातृपी (!) भवेत् ।
अप्राप्तास्वेदमध्येन गंधवर्णरसात्मिकाः ॥ १ ॥

[II.?] रहःसु स्त्रीमुखं शुचि शुचयः फलपातने पक्षिणः प्रसवे वत्सः शृंगग्रहणे च ऊर्ध्वं नाभेः पुरुषः गौर्मेध्या पृष्ठतः पुरस्तादजः ° perhaps the beginning of this adhy. is wanting.

III. fol. 2*a*: अत ऊर्ध्वं वर्णविवेकं व्याख्यास्यामः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा इति चत्वारो वर्णा मुखबाहूरूपादप्रसवाः(? प्रभवाः) । तेषां ब्राह्मणः श्रेष्ठो वर्णः । °

IV. fol. 2*b*: न ब्राह्मणस्यापदं कुर्यान्न रुधिरं जनयेत् । यावंतो हि पांसवस्तेन रुधिरेण स्रुता भवंति तावंति वर्षसहस्राणि दारुणापातनानरके (?) तु भवति °

V. fol. 5*b*: अतः परं श्राद्धकल्पं व्याख्यास्यामः । तत्रादित एव पात्रपरीक्षा कार्या । पात्रमिति शोभनस्याख्या भवति । °

VI. fol. 6*a*: अथैतान्मंत्रबद्धो जपेन्नोपहसेत् ।

VII. fol. 7*b*:

ब्राह्मणस्यापराधेषु चतुर्युगे विधीयते ।
गुरुतल्पे सुरापाने स्तैन्यब्राह्मणहिंसयोः ॥

It ends:

यस्य पुत्रः शुचिर्दक्षः पूर्वे वयसि धार्मिकः ।
नियंता वा स दोषाणां स तारयति बांधवं ॥

यथा हि वेदाध्ययनं धर्मशास्त्रमिदं तथा ।
अध्येतव्यं ब्राह्मणेन मूर्धः(? सूर्य)पुण्यमभीप्सता ॥

इत्यौशनसे धर्मशास्त्रे सप्तमोध्यायः ॥ समाप्तं चेदमौशनसस्मृतिधर्मशास्त्रं ॥

[Gaikawar.]

Digitized by Microsoft®

1317.

723g. Foll. 3; size $12\frac{3}{4}$ in. by $5\frac{3}{4}$ in.; clear, modern Devanāgarī writing; ten lines in a page.

Kāśyapa-Dharmaśāstra; on the duties of householders.

It begins: अथातः काश्यपीयान् गृहस्थधर्मान् व्याख्यास्यामः । आहिताग्निसेवानिरतो हुताग्निहोत्री स्नानऋतुकालगामी देवपितृमनुष्यभूतब्रह्मयज्ञान् सेवमान एकद्वित्रिचतुर्णां ब्राह्मणानां [भोजनं] कुर्वाणो व्रतनियमहोमजप्यपरो मातृपितृभक्तो दारापत्यपोषकः शेषान्नभोजी उपवासी त्रैवर्णिकभेदकसूचकान् परिहरमाणो लांगलवृत्तिः । तत्र च भूम्याः पाटने वृक्षच्छेदने नास्याधर्मो भवति । कूपसेतु[त]डागविप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य चतस्र आज्याहुतीर्जुहुयात् । इदं विष्णुरिति प्रथमा मा नस्तोक इति द्वितीया । युवा सुवासा इति तृतीया । दंष्ट्राभ्यामिति चतुर्थी । यं वनस्पतिमुत्पाटयेत् तस्यै च देवतायै पूर्णाहुतिं जुहुयात् । ०

अथाकालिकानि व्याख्यास्यामहे fol. 2*b*; अथ नैमित्तिकानि ० ib.; अथातः पात्राणां शौचविधिं ० fol. 3*a*.

It ends:

पिता वा यदि वा माता भ्राता वा यदि वेतरः ।
नरश्च कृतपापानां गतिं यां याति तां शृणु ॥
अनिवर्ती यथा श्येनो गच्छत्येव यमालयं ।
एवं च नरकं यांति कन्यास्वनृतकारकाः ॥
पुनः संपद्यते नारी गतमात्मानमात्मनि ।
अस्थिमात्रं त्वचं भित्त्वा शुक्रं तेजो बलं तथा ॥
शुल्केन ये प्रयच्छंति दुहितां लोभमोहिताः ।
ते यांति नरके घोरे यावदाभूतसंप्लवं ॥
गमनागमनायोगादेवं शुल्के विधीयते ।
एवं ज्ञात्वा च युक्तां तां कन्यां विंदेत सत्कुलात् ॥
तस्माद्दैवे च पित्र्ये च दासी स्यादथ सेविता (!) ।
क्रयक्रीता तु सा दासी न सा पत्नी विधीयते ॥
अग्निष्टोमातिरात्राणां शतं शतगुणीकृतं ।
प्राप्नोति पुरुषो दत्त्वा होममंत्रैरलंकृतां ॥
यस्तु सत्येन धर्मेण पिता समर्पयेत्सुतां ।
स प्रेत्य लभते स्थानं यथा दक्षः प्रजापतिः ॥

इति श्रीकाश्यपप्रोक्तं धर्मशास्त्रं समाप्तं ॥

For the same, or a similar treatise (*Upakāśyapasmṛiti*), see Burnell, Index Tanj. MSS., p. 124*b*. [H. T. Colebrooke.]

1318.

723e. Foll. 9; size and writing as in preceding MS.

Dāksha-Dharmaśāstra, in seven adhyāyas.

It begins:

सर्वशास्त्रार्थतत्त्वज्ञः सर्ववेदविदां वरः ।
पारगः सर्वविद्यानां दक्षो नाम प्रजापतिः ॥ १ ॥
उत्पत्तिः प्रलयश्चैव स्थितिः संहार एव च ।
आत्मा चात्मनि तिष्ठेत आत्मा ब्रह्मण्यवस्थितः ॥ २ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एतेषां तु हितार्थाय दक्षः शास्त्रमकल्पयत् ॥ ३ ॥ ०

For the same treatise see Calc. Dh. I., pp. 383–402; Burnell, Index Tanj. MSS., p. 125*a*.

A. I. consists of 15 *ślokas*; II., of 43; III., of 31; IV., of $14\frac{1}{2}$; V., of 14 (the last five *ślokas* of the Calc. Dh. being omitted);

VI., of 15; beg.:

अशौचं तु प्रवक्ष्यामि जन्ममृत्युनिमित्तिकं ।
यावज्जीवं तृतीयं तु यथावदनुपूर्वशः ॥ १ ॥

It ends:

यज्ञकाले विवाहे च देवयागे तथैव च ।
हूयमाने तथा चाग्नौ नाशौचं नापि सूतकं ॥

VII., $53\frac{1}{2}$ *ślokas*, ends:

श्रावयित्वा त्विदं शास्त्रं श्राद्धकालेऽपि यो द्विजः ।
अक्षयं भवति श्राद्धं पितृंश्चैवोपतिष्ठते ॥

इति दाक्षे धर्मशास्त्रे सप्तमोऽध्यायः ॥

[H. T. Colebrooke.]

1319.

3245f. Foll. 16*b*–22*a*; size $15\frac{1}{4}$ in. by $9\frac{1}{2}$ in.; folio; European paper; Telugu character; 36–38 lines in a page.

Daksha-smṛiti. In part different from the text of the Calc. Dh.

It begins as above. After the *sūtaka* chapter (5th), here ending:

न सूतकं यमुच्यं (!) स्याद् यावज्जीवं तु सूतकं ।
त्रिविधं सूत[कं] प्रोक्तं मरणं च तथाविधं ॥

Digitized by Microsoft®

It proceeds:

अतः परं प्रवक्ष्यामि योगशास्त्रस्य निर्णयं । ०

It ends: आत्मसंस्थापनं कृत्वा न किंचिदपि चिंतयेत्॥ इति दक्षस्मृतिः समाप्ता ॥

[MACKENZIE COLL.]

1320.

2489e. Foll. 10; size 11 in. by 5¼ in.; fairly written, in Devanāgarī, about 1780 A.D.; ten lines in a page.

Daksha-smṛiti. This text again differs considerably from that of the Calc. Dh., especially as regards arrangement of the matter. It consists of 197 *ślokas*, not divided into chapters.

The beginning is the same; *śloka* 79*b* coincides with the beginning of Adhy. III. सुधा ०; *śl.* 98–110 correspond to Adhy. V.; *śl.* 111–121 to the last 12 *ślokas* of Adhy. III.; *śl.* 122–133 to Adhy. IV., 1–15; *śl.* 135–148 to Adhy. VI. Then it proceeds:

अतः परं प्रवक्ष्यामि योगस्य विधिमुत्तमं ।
लोको वशीकृतो यैस्तु यैरात्मा च वशीकृतः ॥ ०

śl. 149–194 corresponding on the whole to Adhy. VII., 1–51.

For the last four verses of the edition, the MS. has the following:

अत्रात्मव्यतिरेकेण द्वितीयं नैव पश्यति ।
अतः शास्त्राण्यधीयंते श्रूयंते ग्रंथविस्तरात् ॥ ९४ ॥
योगमभ्यस्यमानस्य ध्रुवं कश्चिदुपद्रवः ।
विद्या वा यदि वाविद्या रशरंतु (!) जनार्दनः ॥ ९५ ॥
कृत्वा पर्यंकवंधं करकमलपुटे न्यस्य हृत्संज्ञदेशे [यः ।
नासाग्रे स्थाप्य दृष्टिं स्थिरनिभृतपदं निश्चलं स्वस्यका-
इच्छन्नोंकारमेकं स भवति सुकृती योगमार्गानुकारी
तत्त्वज्ञानेन सर्वं भुवि भुवनमिदं मंडलं याति भित्त्वा॥९६॥
य इदं पठेत् (r. पठते) शास्त्रं विप्रेभ्यश्च प्र[य]च्छति ।
सर्वपापविशुद्धात्मा ब्रह्मलोके न हीयते ॥ ९७ ॥

इति श्रीदक्षप्रजापतिप्रणीतं धर्मशास्त्रं समाप्तं ॥ दक्षस्मृतिः समाप्ता ॥

[GAIKAWAR.]

1321.

69d. Foll. 11 (51–61 of vol.); size 10¾ in. by 3 in.; large, indifferent Devanāgarī writing of 1791 A.D.; five lines in a page.

Devala-smṛiti, consisting of 79 *ślokas* on defilement and purification.

It begins: अथ देवलस्मृतिः ॥

सिंधुतीरे समासीनं देवलं मुनिसत्तमं ।
समेत्य मुनयः सर्वे इदं वचनमब्रुवन् ॥ १ ॥
भगवन् म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः ॥ २ ॥
कथं स्नानं कथं शौचं प्रायश्चित्तं कथं भवेत् ।
किमाचारा भवेयुस्ते तदाचक्ष्व सविस्तरं ॥ ३ ॥
देवल उवाच । त्रिशंकुं वर्जयेद्देशं सर्वं द्वादशयोजनं ।
उत्तरेण महानद्या दक्षिणेन तु कीटकं (!) ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः ।
मृतं सूते (!) तु दासीनां पत्नीनां चानुलोमिनां ॥ ५ ॥
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकं ।
अपेयं येन संपीतम[भ]क्ष्यं चापि भक्षितं ॥ ६ ॥
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतं ।
तस्य शुद्धिं प्रवक्ष्यामि यावदेकं तु वत्सरं ॥ ७ ॥ ०

It ends:

उदरं प्रविशेद्यस्य पंचगव्यं विधानतः ।
यत्किंचिद् दुष्कृतं तस्य सर्वं नश्यति देहिनः ॥ ७८ ॥
पंच सप्ताष्ट दश वा द्वादशोहोपि (!) विंशतिः ।
म्लेच्छैर्नीतस्य विप्रस्य पंचगव्यं विशोधनं ॥ ७९ ॥

इति श्रीदेवलर्षिप्रोक्तं धर्मशास्त्रं ॥

See Burnell, Index Tanj. MSS., p. 125*a* (96 *ślokas*).

[H. T. COLEBROOKE.]

1322.

1300. Foll. 45; size 13½ in. by 6 in.; good, large Devanāgarī writing of 1800 A.D.; ten lines in a page.

Nāradīya-Dharmaśāstra.

1251b. Foll. 44; size 9 in. by 4 in.; fair Bengalī handwriting, of the earlier part of last century; eight lines in a page.

Āhnikapaddhati, a manual of daily ceremonial observances, with chapters on obsequial rites. Perhaps a section from some larger work, or intended as a practical manual to *Raghunandana's Āhnika-* and *Śrāddha-tattva.*

It begins: अथाह्निककृत्यं ॥ प्रमाणं आह्निकतत्त्वेऽनुसंधेयं । तत्र प्रयोगः । ब्राह्मे मुहूर्ते उत्थाय°

अथाचमनविधिः fol. 2*a*; अथ पद्मपुराणीयस्नानप्रयोगः fol. 3*b*; अथ पुराणीयतर्पणप्रयोगः fol. 4*b*; अथ वलिकर्म fol. 7*a*; अथ गोग्रासः fol. 8*b*; अथ रात्रिकृत्यं fol. 9*b*; अथ शयनविधिः fol. 10*a*; अथ दारोपगमनं fol. 10*b*; अथ शौचान्तद्वितीयदिनश्राद्धप्रयोगः fol. 11*a*; अथ सपिण्डीकरणं fol. 15*b*, etc.; अथान्त्येष्टिपद्धतिः fol. 40*a*.

It ends: इत्यन्त्येष्टिपद्धतिः ॥

[H. T. COLEBROOKE.]

Digitized by Microsoft®

1621.

1274b (& **1492b**). Foll. 129; size 13 in. by $4\frac{3}{4}$ in.; fairly good Bengalī handwriting, of 1806 A.D.; seven lines in a page.

Kṛityacintāmaṇi, a treatise on religious observances, compiled under directions of *Caṇḍeśvara* (son of *Vīreśvara*, and grandson of *Devāditya*), minister of *Harasiṃha Deva*, King of Mithilā. It begins:

विश्वेषां हितहेतवे यदपिवत्तत् कालकूटं पुरा
तज्ज्वालोपशमाय मूर्धनि धृते गाङ्गे ऽपि वारां भवे ।
उत्तंसोपकृते तुषारकिरणे तन्मान्तरः पातु वः
शर्वाणीमुखपङ्कजाधरसुधापानेन सुस्थो हरः ॥ १ ॥

आसीन्मैथिलतीरभुक्तिविषये मन्त्रप्रभावादृतः
प्रत्यर्थिक्षितिनायकान्धतमसः शत्रुर्द्विजानां प्रियः ।
नित्योल्लासितमण्डलः सुमनसामर्घेश्च पद्माशयो
देवादित्य इति त्रिलोकमहितो मन्त्रीन्द्रचूडामणिः ॥ २ ॥

श्रेष्ठोऽसौ राज्यलक्ष्म्याः सचिवकुलगुरुश्चेतसा विश्वसाक्षी
क्षीणानाथानुकम्पापरवशहृदयो जङ्गमः पारिजातः ।
तृष्यत्सेनापतीनामपथगतिमतां बुद्धिसिन्धोरगस्त्यो
ऽक्षीवध्वान्तभानुर्निखिलनिजगुणैस्तोषयामास विश्वं ॥३॥

अस्माद्भूद्वसुमतीतलकल्पवृक्षः
प्रख्यातकीर्तिनिचयः सचिवावतंसः ।
वीरेश्वरो विविधदानकृतार्थितार्थि-
सानुः सपाथ इव निर्जितवैरिवीरः ॥ ४ ॥

धैर्याचर्यविचक्षणः कृतधियामाश्वासविश्रामभूर्
भूमीन्द्रान्यसुवैरिवारणविधावद्वैतदीक्षागुरुः ।
दाता दक्षिणमानसः प्रतिदिशं विख्यातकीर्तिः सदा
शत्रोरप्युपकारकः क्षितितले कारुण्यरत्नाकरः ॥ ५ ॥

अस्मादसावहिमरश्मिरिवोदयाद्रेर्
अम्भोजिनीपरिवृढादुदितादिवांशुः ।
अंशोः प्रकाश इव विश्वहिते प्रसूतश्
चण्डेश्वरो विजयते महनीयकीर्तिः ॥ ६ ॥

अस्मिन्मन्त्रिणि मैथिलेश्वरभुजस्तम्भप्रतापानल-
ज्वालोद्दीपनमारुते प्रतिपदं के कल्पिता न द्विषः ।
दुष्टानां फलिनामिवावनिभृतां वीर्योदयध्वंसिनी
दत्ता येन शिरःसज्जादिनिपतत्खाङ्गेव सिद्धौषधिः ॥७॥

वङ्गाः संजातभङ्गाश्चकितकविघटाः कामरूपा विरूपाश्
चीनाः कुञ्जादिलीनाः प्रमुदितविलसत्किंकरोताः ।
नेपालाद्भूमिपालाद् भुजबलदलितास्ते चलाटाश्च लाटाः
कर्णाटाः केन दृष्टाः प्रसरति समरे मन्त्रिरत्नाकरस्य ॥८॥

यस्य प्रभानलतापितानामरातितन्वीस्तनपर्वतानां ।
भियेव भूमिर्विषमापि युक्तावलीभिः करताडने सः(l. न)
[॥ ९ ॥

स्रवदमृतमहाभिषेकभाजं
शुभचरितैः सुमनोभिराप्तवालां ।
अयमधित पुरं पुरारिपाद-
प्रणतिपरो नगरीमिवामराणां ॥ १० ॥

फूत्कारोपहता फनीन्द्रशिरसि क्रोडानने दंष्ट्रया
विद्धा कूर्मकठोरपृष्ठकषणैः पीडामुपेता चिरं ।
कर्णाटाधिपमन्त्रिणि प्रविलसत्कीर्तिप्रदाने महा-
ज्ञानैकव्यसनेन येन सुहृदि क्षौणी सुखं वर्तते ॥ ११ ॥

न्यायोपार्जितविभवैर्बहु यदा दानप्रदाता कृती
मीमांसानयतर्ककर्कशधिया सृष्ट्वा समाजं सतां ।
तात्पर्यं परितः परीक्ष्य बहुशो दृष्ट्वा निबन्धानसाव्
आम्नायस्मृतिनिर्णयाय कृतवांस्तान् सप्त रत्नाकरान् ॥
[१२ ॥

श्रीचण्डेश्वरमन्त्रिणा मतिमतानेन प्रसन्नात्मना
नेपालाखिलभूमिपालपरिखाधर्मेन्दुदुग्धाब्धिना ।
वाग्वत्याः सरितस्तटे सुरधुनीसाम्यं दधत्या[ः] शुचौ
मार्गे मासि यथोक्तपुण्यसमये दत्तस्तुलापूरुषः ॥ १३ ॥

गर्गो वराहमिहिरः स च भोजराजः
स श्रीपतिर्मुनिवरः सपराशरादिः ।
एकेन को ऽपि न जगाद पुरा समस्तं
ग्रन्थेन कर्म सकलं किल संकलय्य ॥ १४ ॥

प्रचुरतरनिबन्धान् वीक्ष्य विख्यातकर्मा
बहुतरमुनिवाक्यान्येष सम्यग्विचार्य ।
सुरुचिरघटनाभिः संकलय्यात्र सर्वं
प्रचरदिह विदित्वा सत्यजीवेश्वरादीन् ॥ १५ ॥

सत्कीर्तिपूरपरिपूरितदिङ्मुखः श्री-
चण्डेश्वरो जयति जङ्गमपारिजातः ।
श्रीमान् समस्तजगतां स हिताय कृत्य-
चिन्तामणिं सचिवमौलिमणिः करोति ॥ १६ ॥

शशाङ्कतारयोः शुद्धिः कर्तव्या सर्वकर्मसु ।
ग्रहाणामपि सर्वेषां तच्छुद्धौ हि विशुद्धता ॥

जन्म त्रिषडेकादशदशसप्तमगः शशी शुभदः ।
द्विचतुःषडष्टनवगतास्ताराः शुभा मताः ॥ °

इति ° तारादिशुद्धिप्रकाशः fol. 6*a*; ° द्वितीयो गोचरप्रकाशः fol. 16*a*; ° वेधशुद्धिप्रकाशः fol. 18*a*; ° संव-

Digitized by Microsoft ®

त्सरादिप्रकाशः fol. 26*a*; ॰करणप्रकाशः fol. 32*b*; ॰नक्षत्रप्रकरणप्रकाशः fol. 41*b*; ॰मुहूर्तप्रकाशः fol. 43*a*; ॰तपग्रहणताप्रकाशः fol. 43*b*; ॰समयाशुद्धिप्रकरणं fol. 46*b*; ॰अधिमासप्रकाशः fol. 51*a*; ॰वालबन्धनप्रकाशः fol. 53*b*; ॰गर्भाधानप्रकाशः fol. 56*b*; ॰सीमन्तोन्नयनप्रकाशः fol. 59*a*; ॰मातृपितृहायोगः प्रकाशः fol. 67*b*; ॰रिङ्गप्रकाशः fol. 69*b*; ॰कनकदण्डयोगादिप्रकरणं fol. 73*a*; ॰मूलशान्तिप्रकाशः fol. 76*a*; ॰वालतन्त्रप्रकाशः fol. 87*b*; ॰आभ्युदयिकप्रकाशः fol. 88*a*; ॰षष्ठिकापूजाप्रकाशः fol. 89*a*; ॰नामकरणप्रकाशः fol. 90*b*; ॰निष्क्रमणप्रकाशः fol. 92*b*; ॰पूगप्राशनप्रकाशः fol. 93*a*; ॰अन्नप्राशनप्रकाशः fol. 97*a*; ॰चूडाकरणप्रकाशः fol. 100*b*; ॰शनैश्चरचारप्रकाशः fol. 105*b*; ॰दिग्दाहप्रकाशः fol. 106*a*; ॰संक्रान्तिप्रकाशः fol. 111*b*; ॰ग्रहणफलप्रकाशः fol. 118*b*; ॰ग्रहणशान्तिप्रकाशः fol. 126*a*.

It ends: इति कृत्यचिन्तामणौ नग्नप्रकरणप्रकाशः ॥

शाके सिन्धुरदोर्महीधरमहीमाने मनोज्ञं सतां
भेशाशेषभशोधनाद्यपरलग्नाद्यैक्रियं कश्चन ।
भूभृद्राजसुतांघ्रियुग्मकमलं सत्कृत्यचिन्तामणिं
चिन्त्यं देवगणैर्विचिन्त्य नभसि ग्रत्यक्षि मे व्यालिखत् ॥
चण्डेश्वरेण कविना कृत एष सारं
ग्रन्थः सभापतिवरेण विलोक्य राज्ञः ।
नानाप्रबन्धघ[ट]नाटनशास्त्रसंघात्
मान्यो हि पण्डितवरैर्विनिवेदनं मे ॥

Regarding the author's date see above, no. 1390. [H. T. COLEBROOKE.]

1622.

70. Foll. 199; size 10½ in. by 5¼ in.; modern, legible Bengalī handwriting; European paper; nine or ten lines in a page.

Krityarāja, a calendar of ceremonial observances for the different months of the year, compiled by order of *Rājā Krishnacandra* of Navadvīpa (Nādiyā, Nuddea). It begins:

नत्वा हेरम्बगौरीगिरिशहरिहरिद्राजिनः पञ्च देशान्
वाग्देवीकेलिगङ्गोज्ज्वलवलयनवद्वीपराज्याधिपस्य ।
राज्ञः श्रीकृष्णचन्द्रक्षितिपतितिलकस्याज्ञया प्राज्ञवर्गो
धर्मस्य स्थापनार्थं विदधति सुधियः पुस्तकं कृत्यराजं ॥

अपि च ॥

दृष्ट्वा तन्त्राणि यत्नाद्विविधबुधगणैः सार्धमत्राग्निहोत्री
श्रीलश्रीकृष्णचन्द्रो भरतभुवि महा[राज]राजेन्द्रनामा ।
तेने यं कृत्यराजं कलिकलुषमहाध्वान्तविध्वंसनार्थं
धर्माणां स्थापनार्थं परमकृतिमतां तोषणार्थं च हृद्यं ॥
आलोक्य ग्रन्थसर्वान् विबुधबुधगणैः सार्धमाकृष्य सारं
वार्षीयं नित्यकृत्यादिकमिह विदुषां संशयोत्सारणार्थं ।
तेने वेदप्रभेदोदितमपि महतां श्रौतकर्मादिकं च
गौडीयस्मृत्यबोध्यं यदकरणवशात् प्रत्यवायस्तदत्र ॥
अध्यापयत निःशङ्कं कुरुध्वं धर्मसंचयं ।
तनुध्वं स्मृतिशास्त्रार्थं ग्रन्थं ज्ञात्वा मनीषिणः ॥

अथ शुचि तत्कालजीवी कर्म कुर्यादित्यादि श्रौतस्मार्तकर्मणि अधिकारितावच्छेदकतया कालस्य श्रुतेः । वरमेकाहुतिः काले नाकाले लक्षकोटयः । ॰

अथ व्रतविधिः fol. 52*b*; इति चैत्रराज्यं 55*b*; इति वैशाखराज्यं 66*b*; इति ज्यैष्ठकृत्यानि 73*a*, etc.; इति फाल्गुणकृत्यं । अथ मलमासकृत्यं 173*a*; अथ संक्रान्तिनिर्णयः 174*a*; अथ ग्रहणस्य व्यवस्था 176*b*.

It ends:

काशीकाञ्चीगयोद्र(l. यौड्र)द्रविण(ड)धटमहाराष्ट्रसौराष्ट्रवीरैर्
आरूढोद्दामदन्तावलमतनिकरे शुभ्रसंशुद्धशास्त्रे ।
भूपालालोलचूडामणिरवनिपतिः श्रीयुतः कृष्णचन्द्रो
दम्भोलिं वारणार्थं ग्रहणविधिमहाराष्ट्रमेतच्चकार ॥

इति ग्रहणनिर्णयः समाप्तः ॥

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 212.

[H. T. COLEBROOKE.]

1623.

2558. Foll. 84; size 13 in. by 5 in.; well written, in Devanāgarī; nine lines in a page.

Krityaratnāvalī, a calendar of religious duties, compiled, in 1648 A.D., by *Rāmacandra Bhatta* (with the family name of *Tatsat*), son of *Vitthala Bhatta*, and grandson of *Bālakrishna Bhatta*. It begins:

नमस्कृत्य रमानाथं भट्टविट्ठलसूनुना ।
कृत्यरत्नावली रम्या रामचन्द्रेण रच्यते ॥

Digitized by Microsoft®

तत्र तिथिकृत्ये तु कृष्णादिं व्रते शुक्लादिमेव चेति वचना-
चैत्रकृष्णप्रतिपदमारभ्य तिथिकृत्यान्युच्यन्ते ।
तत्र चैत्रकृष्णप्रतिपदि कृत्यविशेषः पद्मपुराणे । ०

It ends:

गृहे तस्य स्थिरा लक्ष्मीर्यो दद्यात्सूर्यसंनिधौ ।
दारिद्र्यं न भवेत्तस्य रोगक्लेशविवर्जित इति ॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यबालकृष्णभट्टांग-जविठ्ठलभट्टाभिधबुधवरसूनुधर्मशास्त्रपारावारीणश्रीमद्रामचंद्र-भट्टविरचिता कृत्यरत्नावली संपूर्णा ॥ ० संवत् १९६४ ॥

[MACK. COLL.]

1624.

527. Foll. 91; size 9½ in. by 4 in.; legibly written, in Devanāgarī, in 1734 A.D.; ten lines in a page.

Kṛityaratnāvalī. [H. T. COLEBROOKE.]

1625.

2781. Foll. 107; size 10½ in. by 3½ in.; legibly written, in Devanāgarī, about the middle of last century; eight lines in a page.

The same work.

[COLL. OF FORT WILLIAM.]

1626.

397. Foll. 84; size 12¼ in. by 4½ in.; indifferent, modern Devanāgarī handwriting; nine lines in a page.

The same work. [H. T. COLEBROOKE.]

1627.

1720. Foll. 114; size 8½ in. by 3¾ in.; legibly written, in Devanāgarī, in 1798 A.D.; ten lines in a page.

The same work. [H. T. COLEBROOKE.]

1628.

2362. Foll. 50; size 10¼ in. by 6 in.; well written, in Devanāgarī, in the former part of last century; twelve lines in a page.

Kṛityaratnāvalī.

At the end this MS. has the following verses:

भूतशून्यर्षिचंद्रमिते ऽब्दे (*i.e.* Saṃv. 1705)
माघकृष्णमहरौ रविवारे ।
ग्रंथपूर्तिमकरोत्किल रामः
श्रीरमापतिसमर्पणबुद्ध्या ॥

तत्सद्वंशप्रसूतो यो रामचंद्रेति विश्रुतः ।
तेनेयं निर्मिता सम्यक् कृत्यरत्नावली शुभा ॥

अनया प्रीयतां लक्ष्मीनृसिंहो भक्तवत्सलः ।
कुलदैवतमित्येतद्दृष्टॄणां स्याच्छुभा मतिः ॥

इति श्रीमद्वेदतदर्थाभिज्ञतत्सद्वालकृष्णभटसुतविठलभटसूरि-सूनुभटरामचंद्रविरचिता कृत्यरत्नावली समाप्ता ॥

For another copy of this work, see Rāj. Mitra, Bikāner Cat., no. 872.

[GAIKAWAR.]

1629.

800b. Foll. 90; size 10¼ in. by 4¼ in.; fairly written, in Devanāgarī; 10 or 11 lines in a page.

Saṃskāramayūkha, a manual of initiatory rites, by *Bhaṭṭa Siddheśvara*, son of *Bhaṭṭa Dāmodara*, and grandson of *Bhaṭṭa Śaṅkara.*

It begins:

नत्वा रामं निबंधाब्धीन्निर्मथ्य धिषणाद्रिणा ।
संस्कृतावुद्धरत्येष भट्टसिद्धेश्वरो ऽमृतं ॥

तत्र तावदंगिराः । अतः परं द्विजातीनां संस्कृतिर्नियतोच्यते ।

संस्काररहिता ये तु तेषां जन्म निरर्थकं ॥
पंचविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्याश्च श्राद्धादिषु सुयंत्रिताः ॥
गर्भाधानं पुंसवनं सीमंतो बलिरेव च ।
जातकृत्यं नामकर्म निष्क्रमो ऽन्नाशनं परं ॥
चौलकर्मोपनयनं तद्व्रतानां चतुष्टयं ।
स्नानोद्वाहौ चाग्रयणमष्टका च यथातथं ॥
श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणं ।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषत इति ।

श्राद्धादिष्वित्यादिशब्दाद्यजनादेर्ग्रहणं । ०

Digitized by Microsoft®

इति संस्कारोद्देशः fol. 2*b*; इति गर्भाधानं 12*a*; पुंसवनानवलोभने 13*a*; गर्भरक्षणं 13*b*; सीमंतोन्नयनं 14*a*; विष्णुबलिः 15*a*; जातकर्म 16*b*; नामकरणं – खट्वारोहणं – दुग्धपानं 21*a*; कर्णवेधः – निष्क्रमणं 22*b*; इत्युपवेशनं – अन्नप्राशनं – जीविकापरीक्षा 23*b*; इत्यब्दपूर्तिविधिः 24*b*; इति चूडाकर्म 26*a*; इत्यक्षराभ्यासः 26*b*; इत्यनुपनीतधर्माः 27*b*; इत्युपनयनं 42*a*; इति ब्रह्मचारिधर्माः 44*b*; इत्यग्निकार्यं 45*a*; इत्यभिवादनप्रत्यभिवादने 46*a*; भिक्षाटनं 47*b*; अध्ययनधर्माः 53*a*; इति समावर्तनं। अथ विवाहः 56*b*.

It ends: इति श्रीमद्विद्वद्ग्रगण्यभट्टशंकरपौत्रभट्टदामोदरसुतभट्टसिद्धेश्वरकृतः संस्कारभास्करः [स]मानं। संवत् १७३६ ॥ The second part of the title (भास्कर), in the colophon, is a correction, apparently for orig. मयूखः, the leaves of the MS. being also marked throughout सं॰ म॰

Of comparatively recent, and less common works and writers, are mentioned: *Aparārka*, fol. 26*b*; *Karmapradīpa*, 3*a*; *Kapardikārikā*, 37*b*; *Kārikā*, 37*b*, 47*b*; *Kālanirṇaya*, 14*a*; *Caṇḍeśvara*, 30*a* (*Vyavahāracaṇḍeśvara*, 33*b*); *Jyotisharatna*, 11*b*; *Dharmaprakāśa*, 25*a*; *Prayogapārijāta*, 13*b*; *Prayogapārijāte Utpalaparimale*, 6*a*; *Prayogapārijāte Saṃgrahe*, 12*a*; *Prayogapārijāte Saṃhitādīpe*, 37*a*; *Baijavāpagrihyam*, 13*a*; *Muhūrtacintāmaṇi*, 37*a*; *Muhūrtasaṃgraha*, 22*b*; *Rājamārtaṇḍa*, 25*a*; *Śrīdhara*, 26*a*; *Śrīdharīya*, 17*a*, 21*a*; *Saṅkaṭe*(?) *Medhātithiḥ*, 39*a*; *Sārasaṃgraha*, 17*b*; *Smṛiticandra*, 6*b*; *Smṛitidīpikā*, 27*a*; *Smṛitibhāskara*, 13*a*; *Smṛitiratna*, 6*b*; *Smṛitiratnāvalī*, 39*a*; *Smṛityarthasāra*, 90*b*.

For another MS. of this work see Weber, Berl. Cat., no. 1032.

[H. T. COLEBROOKE.]

1630.

160a. Foll. 27; size 12 in. by 4½ in.; fairly good Devanāgarī writing, of 1799 A.D.; eleven, sometimes ten, lines in a page.

Saṃskārakamalākara, a treatise on initiatory rites, by *Kamalākara Bhaṭṭa*, son of *Rāmakrishṇa Bhaṭṭa*.

It begins:

श्रीरामकृष्णतनयः कमलाकरसंज्ञितः।
श्रीरामं पितरौ नत्वा संस्कारान्वक्ति सांप्रतं॥

गौतमः। गर्भाधानं पुंसवनं अनवलोभनं सीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं विवाहः पंच यज्ञा अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्तपाकसंस्था [अ]ग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणं पशुः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रोप्तोर्याम(!) इति सप्तसोम इति सप्त सोमसंस्था इति चत्वारिंशत्संस्था(?) दया क्षांतिरनुसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्काराः॰ अथ स्वस्तिवाचनं॰

अथ गर्भाधानं fol. 6*b*; अथ पुंसवनानवलोभनसीमंताः fol. 7*a*; अथ जातकर्म fol. 8*b*; अथ नामकर्म fol. 9*a*, etc.; इत्यौपासनप्रयोगः। अथ स्थालीपाकः fol. 24*b*.

The treatise probably forms part of the author's Digest, called *Dharmatattva-Kamalākara*, for which see no. 1650.

The author wrote his *Nirṇayasindhu* in 1611-12 A.D. [H. T. COLEBROOKE.]

1631.

3009c, d. Foll. 3 and 5 resp.; size 13 in. by 8 in.; well written, in Devanāgarī; fifteen lines in a page.

Saṃskāramārtaṇḍa, by *Mārtaṇḍa Somayājin*. Two chapters only, viz.:

a) *Sthālīpāka*; which begins:

अथ स्थालीपाक[ो] लिख्यते॥ ततः कर्ता शुचिरलंकृत[ः] पवित्रपाणिः बद्धशिखो यज्ञोपवीति भूत्वाचम्य त्रिः प्राणानायम्य देशकालौ संकीर्त्य॥ ओं तत्सत्परमेश्वरप्रीत्यर्थे अमुककर्मांगभूतं पंचभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्ये॥॰

It ends: आज्याहुतिमापनिमग्नधारा हुताशनस्योपरि षोडशांगुलैः॥ इति मार्तंडसोमयाजीकृतसंस्कारमार्तंडे स्थालीपाक[ः] समाप्तः॥ शके १७१३॥ विरोधकृतनामसंवत्सरे अश्विनकृष्णपंचम्यां भौ[म]वसरे लेखनं समाप्तं इत्युपनामक अध्यापककाशिनाथमहादेवकरेण लिखितं॥

Digitized by Microsoft®

b) *Nava-graha;* begins:

आयोत्मज नमस्तुभ्यं रविसोमादिकान्ग्रहान् ।
नवग्रहप्रयोगश्च क्रियते सर्वसंमतः ॥

आदौ मंडलं विरचयेत् । तत्प्रकारमाह ॥ ०

It ends: ब्रह्मयामले तु ॥ ताम्रं तु कारयेद्भानुं रजतेन निशाकरं । कुजन्न(l. कुजं) सुवर्णेन तु कारयेत् ॥ इति मार्त्तंड-सोमयाजीकृतनव(वि)ग्रहविधिः ॥ शके १७७३ ॥ ०

[?]

1632.

94. Foll. 184; size $9\frac{3}{4}$ in. by $3\frac{3}{4}$ in.; fairly good, modern Devanāgarī writing; seven or eight lines in a page.

Smārtānushthānapaddhati (*Anantabhaṭṭī*), a manual of initiatory rites, with the formulas of prayers and rites of expiation required on these occasions, by *Ananta Bhaṭṭa*, son of *Viśvanātha*.

The MS. begins with the three introductory *ślokas* of the *Prayogaratna* श्रीरामं सपरिवारं ० (see no. 471), after which it continues:

नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकं ।
क्रियत उपकाराय स्मार्तानुष्ठानपद्धतिः ॥ ४ ॥
दीक्षितानंतविज्ञेन विश्वनाथस्य सूनुना ।
प्रयोगो रच्यते सम्यग् मंत्रविस्तारपूर्वकं ॥ ५ ॥ [शतं ।
आश्वलायनशास्त्रे ऽस्मिन्संततिः पद्धयः (l. संति पद्धतयः)
विना पुस्तकमार्गेण कर्म [क]र्तुं न शक्यते ॥ ६ ॥
तदर्थं क्रियते यत्नः पाठबोधहिताय च ।
सुलभोपायसिद्ध्यर्थं वैदिकानां तदुच्यते ॥ ७ ॥
पंचविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयंत्रिताः ॥ ८ ॥
गर्भाधानं पुंसवनं सीमंतो बलिरेव च । बलिर्विष्णुबलिः ।
जातकृत्यं नामकर्म निष्क्रमो ऽन्नाशनं परं ॥ ९ ॥
चौलकर्मेपिन (l. कर्मोपनयनं) व्रतानां च चतुष्टयं ।
स्नानोद्वाहौ चाग्रयणमष्टका च यथातथं ॥ १० ॥
श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणं ।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः ॥ ११ ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषत इति ॥ १२ ॥

अथ स्वस्तिवाचनं । तद्यत्र कर्तव्यं तदुच्यते । व्यासः । ०

पुण्याहवाचनविधिं वक्ष्यामः fol. 2*a*; अथ विवाहोत्तर-कर्तव्यो ऽपि स्थालीपाकः fol. 14*b*; अथ पर्वनिर्णयः fol. 15*a*; इति स्थालीपाकप्रयोगः । अथेष्टिप्रायश्चित्तानि fol. 25*a*; अथ परिभाषा fol. 30*a*; अथ गर्भाधानाद्याः संस्कारा वक्ष्यंते। तत्रादौ रजोदर्शनशांतिः fol. 32*a*; अथ गर्भाधानं fol. 61*b*; अथ विष्णुबलिप्रयोगः fol. 66*a*; जातकर्म fol. 77*b*; नाम-करणप्रयोगः fol. 84*b*; निष्क्रमणं fol. 86*b*; अथोपदेशना-न्नप्राशनविधिः fol. 88*a*; अथ चौलोपनयनप्रयोगः fol. 91*a*; इति संक्षेपेण अनंतभट्टकृतौ ब्रह्मचारिव्रतलोपप्रायश्चित्तं । अथ समावर्तनप्रयोगः fol. 112*a*; इति वाग्दानविधिः । ततो वैवाहिके ० fol. 126*a*; इति कन्यादानप्रयोगः । अथ वि-वाहहोमः fol. 142*a*;—इति वधूसहितगृहप्रवेशः । अथ प्रायश्चित्तानि लिख्यंते fol. 169*a*.

It ends: इति यज्ञोपवीताभिधानश्रीविश्वनाथसूनुना दीक्षितानंतेन सर्वोपकाराय समंत्रकः प्रयोगः प्रायश्चित्तांतो विरचितः ॥ इत्यनंतभट्टी समाप्ता भवति ॥

For another MS. of this work, actually calling it *Prayogaratna* in the colophon (but without the three introductory *ślokas* of that work), see Rāj. Mitra, Notices, VII., p. 155.

[H. T. COLEBROOKE.]

1633.

1239. Foll. 38; size $10\frac{1}{4}$ in. by 3 in.; fair Devanāgarī writing; seven lines in a page.

Gargapaddhati, a manual of domestic rites (for the *Pāraskara-Gṛihyasūtra*).

It begins: श्रीगणेशाय नमः ॥ गुर्लैमंडलं परिलिख्य पंच भूसंस्कारान् कृत्वा ततः उल्लिख्योद्धृत्य हिरण्यनिधानं । अपामपूकरनिर्वापः । ० स्थालीपाकहोमः । ० सोदकं बलिदानं fol. 3*a*; पिंडपितृयज्ञविधानं fol. 6*a*; श्रवणाकर्म fol. 8*b*; सस्तरारोहः fol. 13*b*; शूलगवः fol. 18*a*; वैश्वदेवः fol. 20*b*; मासश्राद्धं fol. 22*a*; चूडाकरणं fol. 26*b*; उपनयनं fol. 29*b*; सब्रह्मचारीव्रतानि fol. 30*b*; सीतायज्ञः fol. 34*a*; शालाकर्म fol. 35*a*, *etc.*

It ends: श्मशाने पितृपदेति विशेषः । गौस्थाने सकृत्पिंडं ॥ इति गर्गपद्धति समाप्तमिति ॥ संवत् १५७५ समये चैत्र-सुदि १० सोमवासरे ॥

3 x 2

Digitized by Microsoft ®

For a similar treatise of the same title, see Rāj. Mitra, Notices, V., p. 236.

[H. T. Colebrooke.]

1634.

1815a. Foll. 45; size 12 in. by 4 in.; well written, in Devanāgarī; nine or ten lines in a page; European paper.

Gṛihyāgnisāgara, or *Prayogasāra,* a compilation of rites regarding the maintenance of the sacred fire, and rules of expiation in cases of neglect, by *Nārāyaṇa Bhaṭṭa,* surnamed *Āraḍa,* son of *Lakshmīdhara Bhaṭṭa* (A).

Perhaps only a portion of the complete work.

It begins:

नत्वा कृष्णपदांभोजं गणेशं शंकरं शिवं ।
लक्ष्मीधरं च पितरं भट्टनारायणं तथा ॥ १ ॥
यथाज्ञानं विचार्याथ पद्मशिष्टैरनुष्ठितं ।
त्रीणि सूत्राणि तद्व्याख्यानालोच्यान्यांश्च भूरिशः ॥ २ ॥
आरडेत्युपनामा* वै भट्टनारायणः सुधीः ।
गृह्याग्निसागरं चैव कुरुते शिष्टतुष्टये† ॥ ३ ॥

तत्रादौ प्रायश्चित्तं‡ । तच्च आधानात्प्राक् क्रियमाणं । याज्ञिकैराचरितत्वादत्रापि ज्ञेयं । य आहिताग्निधर्मः स्यात्स औपासनिकस्य किंचिदुक्तत्वात् । अग्नीनाधास्यमानो यजमान आधाने ऽधिकारार्थं प्रागाधानात् प्रायश्चित्तं कुर्यात् । तत्रादौ प्रायश्चित्तकर्तव्यसूचकानि मूलभूतान्यापस्तंबादिश्रौतविषयकग्रन्थस्थानि प्रमाणानि लिख्यन्ते । In what immediately follows, the MSS. differ entirely. MS. B. continues: तानि तु । संशोध्यात्मानं तपोजपैर्होमैर्भार्या मैत्रं कृत्वा सर्वभूतैरिति । आपस्तंबसूत्रभाष्यस्य धूर्तसंज्ञकस्येयं फक्किका तस्या इयं रामांडारव्याख्या । ०

इति मृत्तिकास्नानं । ० अथ पंचगव्यस्नानानि fol. 5*a* (fol. 9*a* in B.); इति श्रीमदारडोपनामकनारायणभट्टकृते प्रयोगसारे (गृह्याग्निसागरे B.) प्रायश्चित्तनिरूपणं fol. 7*a* (fol. 13*a*, B.); इति भट्टोजिदीक्षितकृतग्रंथोक्तमायतनलक्षणं 7*b* (13*b*); अग्न्याधाननक्षत्राणि 8*b*; अथाग्निद्वयसंसर्गविधिः 9*a* (16*b*); अथ विच्छिन्नाग्निपुनःसंधानविधिः 11*a* (19*b*); इति ० गृह्याग्निसागरे (both MSS.) आयतनादिपुनःसंधानांतनिमित्तनिरूपणं 13*a*;—अथ होमः 16*a*; इति होमविधिः 29*a*; इत्यग्निसमारोपविधिः 32*a*;—इति ० प्रयोगसारे होमविषयनिरूपणं । अथ स्थालीपाकारंभः 36*a*; इति ० प्रयोगसारे स्थालीपाकादिप्रायश्चित्तविषयनिरूपणं । अथ द्रव्यशुद्धिः 43*b*.

It ends: इति प्रयोगपारिजातोक्तद्रव्यशुद्धिः ॥ इत्यारडोपनामकलक्ष्मीधरभट्टसूनुनारायणभट्टकृतो गृह्याग्निसागरः समाप्तः ॥ शके १७४१ प्रमाथीनामसंवत्सरे ० ॥

Besides *Smṛitikāras* and *Purāṇas,* the author quotes freely: *Aparārka, Kārikā, Candrikā, Chandogapariśishta, Trikāṇḍamaṇḍana, Nirṇayasindhu, Prayogapārijāta, Prayogaratna, Baudhāyanīyaprāyaścittapradīpa* (fol. 17*a*), *Madanapārijāta, Vijñāneśvara* and *Smṛityarthasāra.*

The leaves are marked गृ· सा in the margin.

[Dr. John Taylor.]

1635.

48a. Foll. 52; size 9½ in. by 4 in.; legibly written, in Devanāgarī, about the middle of last century; nine lines in a page.

The same treatise (B). Incomplete. It leaves off at the end of the *homavidhi.*

The last leaf has been supplied by a more modern hand. The leaves have the title *Prayogasāra* in the margin.

The colophon runs thus: इति श्रीमत्सकलविद्याविशारदश्रौतस्मार्तकानुष्ठानभट्टनारायणसुतेन नारायणभट्टेन कृते गृह्याग्निसागरनामको ग्रंथः समाप्तिमगमत् ॥

[H. T. Colebrooke.]

1636.

1815b. Foll. 95 (marked 46–140); size 12 in. by 4 in.; well written, in Devanāgarī; European paper; ten lines in a page.

---

* MS. A. reads आरत्युप ०; a second hand having supplied डये (ड्ये) in the margin, between र and तु.

† Thus B.: प्रयोगसारं कुरुते याज्ञिकानां सुखाय वै ॥ A.

‡ B. reads here as follows: तत्रादौ केषुचित् कर्मसु प्रायश्चित्तं विनाधिकाराभावात्तद्विषयं तत्प्रयोगः च तावदुच्यते ॥ अग्नीनाधास्यमानो ०

Digitized by Microsoft ®

Another portion(?) of *Ārada Nārāyaṇabhaṭṭa's Gṛihyāgnisāgara.*

The beginning of the section is wanting.

Fol. 46 begins: खलं बुधैः स्मृतं । प्रादेशमात्रं वा । पूर्वं तृणमयं कुर्यात् । ° and lower down in the page: अथाग्निमुखप्रयोगादिपरिभाषा ।

इति श्रीमदरडोपनामकलक्ष्मीधरात्मज ° गृह्याग्निसागरे स्थालीपाकप्रयोगः । अथ स्थालीपाकलघुप्रयोगः fol. 55*b*;—इति श्रवणकर्म 66*a*; इति सर्पबलिः 67*a*; इति ° आश्वयुजीकर्मव्रीहिश्यामाकाग्रयणानां समानतंत्रत्वेन प्रयोगः ॥ श्राद्धं । 71*a*; इति ° सागरे पार्वणश्राद्धप्रयोगे नवमः खंडः श्राद्धप्रयोगः समाप्तः ॥ अथ पिंडपितृयज्ञव्यतिषंगेन संक्षिप्तपार्वणश्राद्धप्रयोगः 92*b*;—इति ° माध्यावर्षाद्येतद्दर्तं श्राद्धनिरूपणं । अथाग्निमासिकप्रायश्चित्तानि 103*a*; इति° औपासनहोमविषयकं प्रायश्चित्तनिरूपणं 115*a*; इति ° स्थालीपाकादिप्रायश्चित्तविषयकनिरूपणं 137*b*; part of this, and the following leaf, is torn off;—इति ° द्रव्यशुद्धिः । अथास्थिशुद्धिविधिः 139*b*;—Some parts in this MS. (*e.g.* the *dravyaśuddhi*) agree with the corresponding sections in MS. A., above.

Could this be part of the *Gṛihyāgnisāgara*, and the other two MSS. the *Gṛihyāgnisāgarasāra?* A *Smṛitisāgarasāra* is quoted elsewhere. It ends: एवमस्थिशुद्धिः॥ इति श्रीगृह्याग्निसागरः समाप्तः॥

[Dr. John Taylor.]

1637.

1536. Foll. 258; size 10¾ in. by 4½ in.; well written, in Devanāgarī, about the end of the 17th century; 11 or 12 lines in a page.

Varṇāśrama-dharmadīpa, a treatise on the duties of the different castes and orders, by *Krishṇa*, of Kāśī, son of *Govinda*, and grandson of *Rāghava*, of the *Bhāradvāja-gotra.*

It begins:

भवानीशश्रीशांघ्रिकमलयुगं श्रीगणपतिं
गिरामीशां नत्वा ऽभिमतफलसिद्धेककरणं ।
विलोक्यार्षं मार्गं तमहमनुसंलक्ष्य च यथा-
मति द्वैजान्धर्मान् प्रकटयितुमिच्छामि कतिचित् ॥ १ ॥

भारद्वाजीयगोत्रः सकलगुणनिधी राघवाख्यो बभूव
पारावारात्मसारः क्षितिसुरभजनायाप्तकीर्तिप्रतीतः ।
तस्यासीत्पुत्र इंदुप्रतिमवरयशाः श्लाघनीयो गुणौघैः
श्रीमद्गोविंदनामा समजनि च ततः पंडितः कृष्णनामा
[॥ २ ॥

क्षेत्रे श्रीकाशिकाख्ये ऽनवरतवसता तेन कृष्णाभिधेन
यत्नाल्लोकोपकृत्यै विमतिहरहरप्रीतये संविचार्य ।
सन्मार्गस्यावबोधः प्रभवति हि यदालोकनेनेह पुंसां
दीपाख्यो वर्णधर्मप्रकटनपटुको रच्यते ऽयं निबंधः॥३॥

अत्र यल्लिख्यते किंचिन्मया तत्साध्वसाधु वा ।
पंडितैः कृपया सर्वं विवेच्यं हि प्रयत्नतः ॥ ४ ॥

तत्र चादौ निबंधे ऽस्मिन् ग्रंथानुक्रम उच्यते ।
ग्रंथहार्दावबोधाय स्वरूपकथनाय च ॥ ५ ॥

प्रथमं गर्भसंभूतिवर्णधर्मनिरूपणं ॥

त्रयो वर्णा द्विजाश्चेति तेषां संस्कारपद्धतिः ।
तत्र गर्भस्य चाधानं दुष्टतिथ्यादिशांतिकं ॥

ततः पुंसवनं प्रोक्तं सीमंतोन्नयनं ततः ।
जातकर्म ततः प्रोक्तं षष्ठीपूजनमेव च ॥ °

38 *ślokas* specifying the contents.

इति° ग्रंथानुक्रमः fol. 3*a*; ° गर्भोत्पत्तिप्रकरणं 7*a*; ° गर्भाधानं 9*a*; ° दुष्टतिथ्यादिप्रथमरजोदर्शनशांतिः । अथ पुंसवनानवलोभनयोः प्रयोगः 11*a*; ° अन्वारोहणं 15*a*; इति उपयोगिनीनिर्णयः 17*b*; इति नारायणबलिः 20*a*; ° वृषोत्सर्गः 24*a*; ° शय्यादानं 25*a*; ° समुद्रोक्तसामुद्रिकलक्षणं 27*a*; ° विवाहनिर्णयः 28*b*; ° गोत्रप्रवरनिर्णयः । अथ स्थालीपाकः 40*a*; ° लक्षहोमविधिः,—कोटिहोमः, तुलापुरुषमहादानपद्धतिः 78*b*; इति वास्तुविधिः 87*a*;—इति° दानानां च व्रतानां च विधिः । अथाह्निकं 120*a*; अथाचमनविधिः 122*b*, *etc.*; इति° आह्निकाचारधर्मशास्त्रप्रकरणं 129*b*; इति ° सर्वप्रायश्चित्तप्रकरणं 135*b*; then follow the duties of the several castes; worship of various deities and objects (*Śiva-Vishṇu*, fol. 190*b*; *grāmaśilā*, fol. 194*a*, *etc.*); इति चातुर्मास्यादिव्रतानि 197*b*; ° विष्णुमूर्तिप्रतिष्ठा 202*a*; ° शिवलिंगप्रतिष्ठा 207*a*; इति ° निबंधे जलाशयवापीकूपतडागप्रासादवृक्षारोपणआरामउद्यापनविधिपद्धतिर्नारायणभट्टकृतौ समाप्तः 256*b*; इति ° पतिव्रतालक्षणविधवाधर्माः 259*a*; इति° कालचिह्न° 266*b*; अथ याम्यनगरप्रमाणप्रशंसा गरुडपुराणे °

Digitized by Microsoft®

The last leaf (three lines, including the colophon) has been supplied by a modern hand.

It ends: इति श्रीमत्कृष्ण(?)गोविंदपंडितविरचिते वर्णाश्रमधर्मदीपाख्ये निबंधे याम्यनगरप्रशंसा समाप्तं संपूर्णम् ॥

The blank page of the first leaf has been filled, by a different hand, with a passage from the *Rudrayāmala;* beginning रुद्रकल्पे । अथात्र होमद्रव्यप्रमाणं ।

For another MS. of, apparently, the same work, see Rāj. Mitra, Bikāner Cat., p. 489.

[H. T. Colebrooke.]

1638.

1969. Foll. 28; size $7\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

Jātiviveka, an account of the castes, their subdivisions, their occupations and nomenclature, by (*Vyāsa-*)*Gopīnātha* (*Gopīśvara*) *Kavi*, son of *Śārṅgadhara*, grandson of (*Vyāsa-*) *Viśvanātha*, and great-grandson of (*Bhānu*)*Sāmarāja*, of Pratyaṇḍapura(?).

It begins:

सद्योजात इतः पुराणपुरुषो रुद्रो ऽपि शांतात्मवान्
ईशानो ऽपि च पश्चिमांगमपरः शुभ्रोपकृष्णांतरः ।
वामो दक्षिणतां गतो मखपतिर्दक्षाध्वरध्वंसकृद्
वेत्ता सच्चरितं भुजंगवलयो यस्तं नमामीश्वरं ॥ १ ॥

यां विना सच्चिदानंदो न विद्या[द्] विद्ययेश्वरः ।
इच्छाज्ञानक्रियारूपां वंदे तच्छक्तिमंबिकां ॥ २ ॥

ब्रह्मणो यन्मुखं नेति श्रुतिराह प्रपंचतः ।
भजे तमाद्यं पुरुषं वर्णावयवकारणं ॥ ३ ॥

नारायणसुतो(? स्ततो; ज्ञारायणस्तूतो MS.) भानुरीश्वरः
[सामसंज्ञकः ।
भट्टाभिधामवापुस्ते प्रत्यंडपुरवासिनः ॥ ४ ॥

चत्वारस्तनया आसन् सामराजस्य विश्रुताः ।
विश्वनाथो महादेवो भानुर्लक्ष्मीधरस्ततः ॥ ५ ॥

संख्यावानप्यसंख्यो ऽभूद् विश्वनाथो गुणव्रजैः ।
निवास[:] श्रीसरस्वत्यो रूपोदार्यकलाश्रयः ॥ ६ ॥

वासिष्ठान्वयसंभवः स च पुनः श्रीविश्वनाथो कलौ
व्यासत्वं स्वयमन्वगात् कृतिपरः(श्रुति° B.) किं तत्र
[चित्रं महत् ।
तस्माच्छार्ङ्गधरः कलासु कुशलः प्रादुर्भवत्तद्भवो
गोपीनाथकविः करोति सगुणं जातेर्विवेकं स्फुटं ॥७॥

मन्वादिस्मृतिशास्त्रवाक्यनिचयात् संगृह्य विस्तारितो
ग्रंथो जातिविवेक एष विदुषा गोपीश्वरेण क्षितौ ।
सूर्यः स्वीकुरुते रसं क्षितितलाद्वर्षासु वर्षेत्यलं
लोकानां हितकाम्ययैव सततं मान्यः सधन्यो यथा ॥८॥

जातिविवेकं धीराः कृतपदगुंफेन कलयंतु ।
जातिविवेकेनैवं ज्ञानंत्यलयो नु मकरंदं ॥ ९ ॥

येषां कार्यकलाकलापकथनं ज्ञानं सुसंस्तूयते
चेद्भूरिप्रसरो भविष्यति यतः संक्षिप्यते विस्तरः ।
गांगौघस्य सहस्रधा परिगतस्याप्यं तथैकामृतं
ज्ञात्वा ते कलयंतु काव्यरचनां संतो गुणग्राहिणः ॥१०॥

आचारे व्यवहारे च प्रायश्चित्ते विशेषतः ।
ज्ञात्वा जातिविवेकं तु द्विजः सत्यत्वमर्हति ॥ ११ ॥

ब्रह्मक्षत्रियविट्शूद्रा वर्णाः प्रोक्ताः स्वयंभुवा ।
तेषां धर्माः पृथक् ख्यातास्त्रयः पूर्वा द्विजातयः ॥ १२ ॥

वर्णेभ्यो ये समुद्भूताः प्रातिलोमानुलोमजाः ।
तान् प्राणिनः प्रवक्ष्यामि नामकार्यविभेदतः ॥ १३ ॥

वर्णानां स्त्रीषु ये जाता जारजाः प्रथमे मताः ।
परस्परं विवाहं च तासु जातास्तथा परे ॥ १४ ॥

मौंजीबंधादिलोपेन ते त्रिधा संप्रकीर्तिताः ।
आनुलोम्येन वर्णानां षण् नराः परिकीर्तिताः ॥ १५ ॥

प्रातिलोम्येन ते षट् स्युरिति द्वादश भेदतः ।
एते द्वादश मिश्रास्तु चातुर्वर्ण्यैर्विमिश्रिताः ॥ १६ ॥ °

इति° मिश्रजातिविवेचनं नाम प्रथम उल्लासः ॥ अथ जातिविवेचनं । fol. 4*b*; इति° द्वितीयोल्लासः fol. 25*b*.

It ends:

इति सकलकलानामेव संदोहरूपः
प्रथितपरमशास्त्रैर्व्यासगोपीश्वरेण ।
[सु]जनसुकृतवृत्तिज्ञानशीलाभिधानैः
कथितविह(l. °त इह)सदास्तामेष जातेर्विवेकः ॥

इति श्रीसकलागमाचार्यवर्यश्रीव्यासराजशार्ङ्धरात्मजस्य (!) शिवाभाहवशालिनः (शैवाहंभावशालिनः fol. 4*b*) कवेर्गोपीनाथस्य कृतौ जातिविवेके जातिविवेचनं नाम तृतीय उल्लासः समाप्तः ॥

[Dr. John Taylor.]

Digitized by Microsoft®

1639.

1061a. Foll. 28; size $6\frac{3}{4}$ in. by $3\frac{3}{8}$ in.; indifferent Devanāgarī writing; 7–10 lines in a page.

The same treatise.

This MS. differs greatly at the beginning. Omitting the first six introductory *ślokas*, it begins: वशिष्टान्वयवंशजा: स च पुन:° ॥ १ ॥ and then goes on with *śloka* 11: आचारे व्यवहारे च°॥२॥ Otherwise also it often differs considerably; and numbers the *ślokas* continuously 1–252, without dividing the matter into chapters.

At the end also it wants ten *ślokas*, as compared with the preceding MS., and ends thus (from the *Vishṇupurāṇa*):

वर्णाश्रमाचारवता पुरुषेण पर: पुमान् ।
विष्णुराराध्यते भक्त्या नान्यथा तोषकारक: ॥ २५२ ॥

इति श्रीनिबंधसारे जातिविवेक: समाप्त: ॥ ° शके १५६४ चित्रभानुसंवत्सरे आश्विनवदि १२ तद्दिने लिखित: समाप्त: ॥ इदं पुस्तकं झालगीकान्हभट्टसुतसोमनाथद्विजलिखितमस्ति ॥

For other (defective) MSS. of this treatise, see Rāj. Mitra, Bikāner Cat., p. 396; for a different *Jātiviveka*, by *Viśvanātha*, Notices, IX., p. 179. [H. T. Colebrooke.]

1640.

2321. Foll. 165; size $12\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; fairly written, in Devanāgarī; nine lines in a page.

Brāhmaṇasarvasva, an exposition of the duties of Brāhmans, compiled, chiefly from the *smṛitis*, by *Halāyudha*, son of *Dhanaṃjaya*, and chief justice to King *Lakshmaṇa Sena* of Bengal, whose era (and reign) began either in 1118-19 or in 1106-7. It begins:

दीपवद् द्योतयति यो भूर्भुव:स्वर्जगत्त्रयं ।
सवितुस्तं वयं भर्गमपवर्गकरं नुम: ॥ १ ॥
दधानं चतुराम्नायपूतां मुखचतुष्टयीं ।
मुनिमाद्यं नमामस्तं पंकजोदरवासिनं ॥ २ ॥
त्रिदिवाभरणज्वालत्रयहेतुस्त्रयीमय: ।
त्रिवर्गप्राप्तिसरणिस्तरणि: श्रेयसे ऽस्तु न: ॥ ३ ॥
त्रिलोकपूज्यां नमति त्रिसंध्यं यां त्रिलोचन: ।
त्रिवर्गफलनिर्मात्रीं गायत्रीं तामुपास्महे ॥ ४ ॥
वंशे वात्स्यमुनेर्मुनेरिव सदाचारस्य विश्रामभूर्
धर्माध्यक्षधनंजय: समजनि ज्यायान्परज्योतिष: ।
यस्मिन् जुह्वति जातवेदसि हविर्व्योमांगणव्यापिभिर्
धूमैर्धूपितमंबु सिद्धसरितो वृंदारकै: पीयते ॥ ५ ॥
वांछातिक्रमसंभृते ऽपि विभवे ज्योतिर्जटालीन्मणीन्
हित्वा यस्य जगत्त्रयस्य महसो जागर्ति कोप: कुश: ।
अप्येतस्य विलंघ्य शैलसदृशान् प्राग्द्वारि बद्धा द्विपान्
दूरोद्दंडितयज्ञयूपवृषभोत्कर्षेण हर्षो ऽभवत् ॥ ६ ॥
अंत:प्रमोदशबलीकृतपक्ष्मसूचि-
स्यूताश्रुमौक्तिकभरालसलोचनाभि: ।
गीतां पुर: सुरवधूभिरमुष्य कीर्तिम्
आस्थानसीमनि सुराधिपति: शृणोति ॥ ७ ॥
गोष्ठापंडी(l.गोष्ठीपंडो)दैवतयमनयमतिधैर्यसंपदां वसति:।
प्रकृतिरिव परमपुंसस्तस्यासीदुज्ज्वला गृहिणी ॥ ८ ॥
बभूव तस्या: प्रकृतेर्महानिव
श्रियो विलासायतनं हलायुध: ।
यत्कीर्तिरंभोनिधिवीचिदंड-
दोलाधिरोहव्यसनं बिभर्ति ॥ ९ ॥
लब्धं जन्म धनंजयाद्भगवत: श्रीलक्ष्मणक्ष्मापतेर्
आवृत्त्या सदृशी निजस्य वयस: प्राप्ता महापात्रता ।
शब्दब्रह्मकरोदरामलकवद्गोगोचरा सत्कृपे- [॥ १० ॥
त्यस्ति प्रार्थयितव्यमस्य कृतिन: किंचिन्न सांसारिकं
येनासीदर्जितं न सिंधुलहरीधौतांजलायां क्षितौ
यस्याज्ञातमभून्न सप्तभुवने नानाविधं वाङ्मयं ।
देव: स त्रिजगन्नमस्य महिमा श्रीलक्ष्मण: क्ष्मापतिर्
नेता यस्य मनीषिताधिकपुरस्कारोत्तरां संपदं ॥ ११ ॥
बाल्ये ख्यापितराजपंडितपद: श्वेतांशु बिंबोज्ज्वलच्-
छात्त्रोत्सिक्तमहामहस्त्वनुपदं दत्त्वा नवे यौवने ।
यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायण:
श्रीमाँल्लक्ष्मणसेनदेवनृपतिर्धर्माधिकारं ददौ ॥ १२ ॥
आचारप्रयतांतरा क्रतुविधावुत्साहमातन्वती
प्रायश्चित्तविकाशनाद्विदधती हर्षप्रकर्षं हृदि ।
गार्हस्थ्यांशपरिग्रहग्रहवती निर्व्यूढवर्णस्थिति:
प्राणेभ्यो ऽपि गरीयसी स्मृतिकथा यस्याभवत् प्रेयसी
[॥ १३ ॥

Digitized by Microsoft®

आसीत्कस्य न मंदिरे नयनयोर्जाता न कस्यातिथिः
कण्ठे केन धृता क्षणं न कुतुकाद्वेश्यांगनेव श्रुतिः ।
धर्माध्यक्षहलायुधस्य सदृशो नास्याप्रियः को ऽप्यभूद्
यः कृत्वा हृदये ऽनुरागतरलो नक्तं दिवा हृष्यति ॥ १४ ॥
कांता(? कर्णा)रोपितहैमकुंडलनिलन्नीलाश्मरश्मिच्छटा-
संसर्गं प्रतिपाद्य कृष्णमभवद्भूयो ऽपि कृष्णाजिनं ।
किं चान्यन्मुखरध्वनिष्कलयतो यस्येष्टिमग्न्यालये
लोलाक्षीकररत्नकंकणरणत्कारैः कृतो मात्सरः ॥ १५ ॥
पात्रं दारुमयं क्वचिद्विजयते हैमं क्वचिद्भाजनं
कुत्राप्यस्ति दुकूलमिंदुधवलं कुत्रापि कृष्णाजिनं ।
धूपः क्वापि वषट्कृताहुतिकृतो धूमः परः क्वाप्यभूद्
अग्नेः कर्मफलं च तस्य युगपज्जागर्ति यन्मंदिरे ॥ १६ ॥
निःस्वाध्याये व्यपगतवषट्कारशब्दोदये ऽस्मिन्
वृत्तिच्छेदव्यसनिनि कलावस्थिचर्मावशिष्टः ।
हुत्वा हुत्वा विधिवदमुना दीयमानं त्रिसंध्यं
धूमोद्गारं वितरति हविः प्राश्य मंदाग्निरग्निः ॥ १७ ॥
आपीय श्रुतिसंपुटेन हृदये संस्थापिताः सूरिभिर्
विन्यस्ताः सुरसद्मनिश्चलशिलाः पट्टांतरे शिल्पिभिः ।
आबद्धाः कविभिर्विशृंखलकथाबंधैः प्रबंधैरपि
भ्राम्यंति प्रतिपत्तनं प्रतिगृहं प्रत्यंगणं यद्गुणाः ॥ १८ ॥
मीमांसासर्वस्वं वैष्णवसर्वस्वमकृत शैवसर्वस्वं(?l. शैवं च)।
पंडितसर्वस्वमसौ सर्वस्वं सर्वधीराणां ॥ १९ ॥
आसन्नाः कति संति वा कति न किं क्ष्मामंडले पंडिता
व्याख्यातो मतिशालिना ऽप्युवटाचार्येण वेदः परं ।
अस्पष्टं तदपीत्यनेन विदुषा विश्वप्रसिद्धैः पदैः
संध्यादिद्विजकर्ममंत्रवचसां व्याख्यानमेतत् कृतं ॥ २० ॥
आस्ते वाक्पतिसन्निभो ऽपि न पुमांस्तस्मात्परः साहसी
यो वेदार्थविवेचनाय कुरुते सज्जं रसज्ञान् जनं(l. नान्)।
किं त्वस्मिन्नुवटेन वर्त्म रचितं प्रागेव चेद्विद्यते
व्याख्यानं कियदेकवेदवचसां तेनेदमारभ्यते ॥ २१ ॥
अर्थं येन विचारयन्त्यविदिते येषामृषिश्छंदसी
ये जानंति न देवतां परिचयो यैर्नोपयोगे कृतः ।
विज्ञायापि यदक्रमं फलबहिर्भावेन तैः प्रत्यहं
तादृग्दुर्वहवेदभारवहनक्लेशः परं प्राप्यते ॥ २२ ॥
अर्थावबोधेन विना न शब्दे
श्रद्धा समुन्मीलति वैदिके ऽपि ।
अकारि कर्मोचितवेदभाग-
व्याख्या विमृश्येति हलायुधेन ॥ २३ ॥
भ्राता पद्धतिमग्रजः पशुपतिः श्राद्धादिकृत्ये व्यधाद्
ईशानः कृतवान् द्विजाह्निकविधौ ज्येष्ठो ऽपरः पद्धतिं।
तेनास्मिन्नमुना फलस्तुतिपरा[:] प्रस्तुत्य नानास्मृतीः
संध्यादिर्द्विजकर्ममंत्रवचसां व्याख्या परं स्थापिता॥२४॥
मीमांसाव्यवसायिभिः स्मृतिपरामर्षप्रकर्षस्थितैर्
गायत्री द्विजपुंगवैः कति कियत्कृत्वो न वा व्याकृता।
प्रामाण्यस्य कृते विलिख्य वचनं नानामुनीनां मृदु
व्याख्याने ऽर्पयत क्षणं दृशमिह प्राज्ञाः प्रणीतो ऽञ्जलिः
दत्त्वार्थरूपं प्रथममदन्नमपरैर्भुवि । [॥ २५ ॥
सर्वस्वं ब्राह्मणानां वै शब्दरूपमिमं ददौ ॥ २६ ॥
सूक्ष्मावबोधकमदृष्टविनाशकारि(?l. विकाशकारि)
निस्तारकं किमपि भूषितकंठदेशं ।
एतन्निरावलिमकारि हलायुधेन
नेत्रद्वयीविसदृशं नयनं द्विजानां ॥ २७ ॥
इह प्रथममुद्दिष्टं ग्रंथारंभप्रयोजनं ।
वेदस्याध्ययनश्लाघा ततः परमुदाहृता ॥ २८ ॥
वेदार्थविज्ञानफलं तदनंतरमीरितं ।
ऋष्यादीनां ज्ञानफलं दंतधावनकर्म च ॥ २९ ॥
प्रातःस्नानं तथा प्रातःसंध्या च समुदाहृता ।
माहात्म्यं सप्रपंचं च प्राणायामस्य दर्शितं ॥ ३० ॥ °

It ends: ब्रह्मणे वरदानं । ब्राह्मणभोजनं । यथाशक्ति विंशत्यपरब्राह्मणभोजनं । अच्छिद्रावधारणं च । शतपरिमिताध्यसनं कुर्यात् ॥

इत्यावसथिकमहाधर्माध्यक्षहलायुधकृतौ ब्राह्मणसर्वस्वाभिधानपुस्तकं समाप्तमिति ॥ ° ॥ संवत् १८४५ इदं पुस्तकं भवानिरामेण लिखितं श्रीकाशीमध्ये गंगातटे मानमंदिरसोमनाथसमीपे °

The front page contains the following note: "Having inserted many notes for recollection, and some crude versions in the margin, while arranging tracts for publication on subjects connected herewith, I have replaced this book (as no longer fit for the publick) by a transcript. H.C."

[H. T. COLEBROOKE.]

1641.

1401. Foll. 182; size 13½ in. by 6 in.; large, clear, modern Devanāgarī writing; ten lines in a page.

Brāhmaṇasarvasva.

Digitized by Microsoft®

The transcript referred to in Colebrooke's note above. Though not always correctly copied, it is more easily consulted than the original.

इति० वेदाध्यापनवेदार्थज्ञानप्रशंसा fol. 10*a*; इति० दंतधावनं 10*b*; इति प्रातःस्नानं 15*b*, etc. (*sandhyā*, *gāyatrī*, *prāṇāyāma*, and *mantras*); इति० स्नानमंत्रव्याख्याप्रकरणं 69*a*; इति० सहस्रशीर्षाध्यायव्याख्या 88*b*; इति वैश्वदेवशांत्याध्यायः 99*b*; इत्यतिथिपूजाप्रकरणं 101*a*; इति० पार्वणश्राद्धमंत्रव्याख्या 110*b*; इति भोजनविधिः॥ अथ गर्भाधानं fol. 112*b*, etc. (*saṃskārāḥ*); इति० दशकर्ममंत्रव्याख्या 152*b*; इति० आवसथ्यांतेष्टिकर्मणां निर्बंधः 180*a*.

The authorities referred to in the work are limited to *Purāṇas* (incl. the *Vishṇudharmottara*) and *smṛiti*-treatises, incl. several *Gṛihyasūtras*, the *Bahvṛicagṛihyapariśishṭa*, fol. 153*b*; *Chandogapariśishṭa*, 13*a*, 19*a*,*b*, 20*a*, 40*a*, 63*a*, 85*b*, 86*b*; also *Kātyāyana's Yajñapārśva*, 153*b*, 155*b*, 156*a*, 158*a*; and frequently his *Chandogapariśishṭa* (छंदोगपरिशिष्टे कात्यायनः *i.e.* the *Karmapradīpa*), *e.g.* fol. 12*a* (*K.* 10, 1); 17*a*

संध्यालोपस्य चाकर्ता स्नानशीलश्च यः सदा ।
तं दोषा नोपसर्पंति वैनतेयमिवोरगाः॥ cf. *K.* 11, 16;

fol. 17*b* (-*K.* 11, 2*a*, 3*b*); 86*a* (*K.* 13, 10); 110*b*

मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां ।
नित्यमह्नि तमस्विन्यां सार्धं प्रथमयामतः॥ cf. *K.* 13, 9;

fol. 154*b* (*K.* 7, 1–14); 155*a* (*K.* 8, 12); 155*b* (*K.* 13, 14–16); 156*a* (*K.* 6, 11); ib. (*K.* 7, 6); 156*b* (*K.* 5, 2, 3); 157*a* (*K.* 5, 10); ib. (*K.* 8, 1–10); 158*a*

ब्रह्मणे दक्षिणा देया यथावत्परिकीर्तिता ।
कर्मांते ऽनुच्यमानायां (l. नापि) पूर्णपात्रादिका भवेत्॥
[*K.* 15, 1, 2.

fol. 159*a* (*K.* 13, 11–13); 159*b* (*K.* 14, 2, 3), etc.

Further, *Karkabhāshyakṛit*(!), viz. the comment on *Vāj. S.* III., 63, निवर्तयाम्यायुषे०, fol. 123*a*.

Some *Ṣmṛitis* are quoted at second hand from the *Rahasya* (? *Śivarahasya*), *e.g.* *Vṛihad-Yama*, 53*b*, 57*b*; *Rahasyaprāyaścitte Vṛiddha-yamaḥ*, 55*b*; *Vṛihan-Manu*, 29*b* (prose); also *Rahasye Manuḥ*: जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः (*M.* 11, 251)॥ Also simply '*Rahasye*,' 58*a* (prose).—The authorities most frequently referred to are *Yogi-Yājñavalkya*, and (on the *saṃskāras*) *Pāraskara*.

[H. T. COLEBROOKE.]

1642.

1547B. Foll. 18; size 10¾ in. by 3¾ in.; fairly good, recent Devanāgarī writing; nine lines in a page.

Saṃnyāsapaddhati, a manual of the duties enjoined on those entering the order of ascetics, ascribed to *Śaṅkarācārya*.

It begins: श्रीशंकराचार्येभ्यो नमः। परमहंसानां संन्यासविधिं व्याख्यास्यामः । तत्र

कृच्छ्रं च चतुरान् कृत्वा वपनार्थमनाश्रमी ।
आश्रमी चेत्प्रकृच्छ्रं संन्यासयोग्यतां व्रजेत्॥
आरूढपतिता यस्य कुनखी श्यावदंतकः ।
क्षीवः क्षीणांगविकलो न च संन्यासमर्हति॥ १ ॥ इति [अग्रे॥
व्रतयज्ञतपोदानहोमस्वाध्यायवर्जितं ।
शौचाचारपरिभ्रष्टं संन्यासं नैव कारयेत्॥ २ ॥
अज्ञातकुलशीलस्य निंदके द्विजदेवयोः ।
चौरचर्पटधूर्तेषु संन्यासं नैव दीयते (l. दापयेत्) ॥ ३ ॥
संप्रत्यवसितानां च महापातकिनामपि ।
व्रतानामभिशस्तानां (l. व्रात्या०) संन्यासं नैव दापयेत्॥४॥

इति दत्तात्रेयो सामान्यप्रयोगः॥

चरेच्चत्वारि कृच्छ्राणि न्यासं कुर्वन्ननाश्रमी ।
आश्रमी कृच्छ्रमेकं तु कृत्वा संन्यासमर्हति ॥ ५ ॥

अथ संन्यासविधिं व्याख्यास्यामः॥ पूर्वेद्युर्नांदिश्राद्धं कुर्यात्॥

दैवं चार्षं तथादित्यं पैत्र्यं मातृकमानुषी ।
भौतिकं चात्मनश्चेति अष्टौ श्राद्धानि निर्वपेत्॥

पूर्वोक्तदेशः सुमंगलो मनश्चक्षुःप्रसादकरः स्वस्तिद्यलंकृतः(!) श्राद्धद्रव्याणि च दूर्वाक्षतदधिघृतमधुलाजाप्रभृतीनि सुमंगलान्यन्यानि नांदिमुखवृद्धिश्राद्धं समानं कार्यं॥ ०

Fol. 3*b*: इति श्रीपरमहंसपरिव्राजकाचार्यविरचिते श्रीशंकराचार्यकृतसंन्यासविधिः समाप्त॥ सर्वेषां विधिः किंचित्किंचिद्भेदो ऽस्ति॥ अथ विरक्तकथनं॥

Digitized by Microsoft®

परमात्मनि यो रक्तो [ऽ]विरक्त[:] परमात्मने ।
सर्वैषणाविनिर्मुक्तो स भैक्षं भोक्तुमर्हति ॥

वैराग्यं त्रिविधं। एकं सहजं द्वितीयं मर्कटं तृतीयं श्मशानं॥० ... आचमनविधिः fol. 9b; अथ यतीनां स्नानविधिः 10a; अथ जलसंध्या 12a; अथ योगीनां संबंधीनां संध्या 12b; इति योगपट्टविधिः 15b.

Fol. 16b: इति शंकराचार्यकृतसंन्यासविधिः समाप्तोयं ग्रंथः॥ अथातुरसंन्यासविधिः॥ संन्यासयोग्यतां तप्तकृच्छ्रं चरेत्।०

It ends: उदङ्मुखो गुरुः नित्यशुद्धमुक्तसत्यपरमानंदाद्वयब्रह्मप्रतिपादकमप्रणवमुपदिशेत् प्रणवस्यार्थवचनेन बोधयेत्। आचार्यवचनं पंचीकरणं ॥ इति श्रीपरमहंसपरिव्राजकाचार्यविरचितं आतुरसंन्यासपद्धतिः समाप्तामगमत् ॥

For another work of the same title (or *Saṃnyāsavidhi*), ascribed to *Śaunaka*, see Rāj. Mitra, Notices, II., p. 101.

[H. T. COLEBROOKE.]

1643.

31. Foll. 73; size 9½ in. by 4 in.; good Devanāgarī writing of the earlier part of last century; eleven lines in a page.

Yati (or *Paramahaṃsa*) *-Dharmasaṃgraha*, a digest of the duties of ascetics, by *Viśveśvara Sarasvatī*, son (or pupil) of *Sarvajña Viśveśa*.

It begins:

प्रणम्य विष्णुमात्मानं सच्चिदानंदमुत्कटं ।
गुरुं सर्वज्ञविश्वेशं मायया धृतविग्रहं ॥ १ ॥
विश्वेश्वरसरस्वत्या क्रियते वेदमानतः ।
यतेः परमहंसस्य धर्माणामेष संग्रहः ॥ २ ॥

तत्र संन्यासाश्रमकालनिर्णयो जाबालश्रुत्या विहितः। ब्रह्मचर्यं समाप्य गृही भवेत्। गृही भूत्वा वनी भवेत्। वनी भूत्वा प्रव्रजेदित्याश्रमसमुच्चयः। तथा व्यवस्थितविकल्पो ऽपि यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति। अव्यवस्थितविकल्पो ऽपि गृहाद्वा वनाद्वेति। आरुण्युपनिषदि च। गृहस्थो०

अथ संन्यासविधिः fol. 4a; अथ ब्राह्मणलक्षणं 22a; इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीविरचिते परमहंसपरिव्राजकधर्मसंग्रहे ज्ञानांतरंगधर्मसंग्रहः प्रथमः॥ 29b.

अथ दंतधावनविधिः 32a; अथ आचमनविधिः 37a; अथ प्राणायामः 39a; अथ जपविधिः 40a; अथ श्रवणविधिः 41a; अथ भैक्षप्रशंसा 45b; अथ नमस्कारविधिः 55a; अथ पर्यंकशौचं 57a; अथ योगपट्टविधिः 57b; अथ निषिद्धानि ib.; अथ प्रायश्चित्तं 62a.

वेदस्मृतिपुराणेभ्यो वाक्यान्येतानि यत्नतः ।
विश्वेश्वरेण मुनिना संगृहीतानि भागशः ॥
यतिधर्मप्रकाशाय ज्ञानमोक्षप्रसिद्धये ।
एकत्र(!) परमहंसानां मुमुक्षूणां विशेषतः ॥

इति परमहंसपरिव्राजकविश्वेश्वरसरस्वतीसंगृहीते यतिधर्मसमुच्चये नित्याद्याचारः ॥

यतीनां प्रेतसंस्कारविधिं व्याख्यास्यामः fol. 72a.

It ends: अहं ब्रह्म भोक्ता ब्रह्म अन्नं ब्रह्म ॥ ब्रह्मार्पणं ॥ गीतापाठः ॥ तेषां वस्त्रालंकरणं दद्यात् ॥ इति नारायणबलिः समाप्तः ॥

Among the authorities cited by the author, are the following:—*Prayogasāra*, fol. 62a; *Medhātithi*, 17a, 37a, 45a, etc.; *Yatidharmasamuccaya*, 19b, 48a, 54a, 55a (cf. also fol. 72a, above); *Vāsudeva*, 72b; *Vyāsasūtra*, 29b, 42a; *Śaṅkarācārya*, 26b; *Śivagītāḥ*, 24a; *Shaṭtriṃśanmata*, 5a; *Sureśvarācārya*, 26b, 42a; *Smrityarthasāra*, 4a.

For another MS. of this treatise (*yatidharmasamuccaya*), see Rāj. Mitra, Notices, V., p. 75; for another treatise on the same subject, entitled *Yatisaṃskāraprayoga*, by the same author, ib., I., p. 173.

[H. T. COLEBROOKE.]

1644.

1696d. Foll. 40; size 9½ in. by 3¾ in.; fairly written, in Devanāgarī, towards the end of the last century; nine lines in a page.

The same treatise. Incomplete.

It ends: इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीविरचिते परमहंसपरिव्राजकधर्मसंग्रहे ज्ञानानांतरं धर्मसंग्रहः (fol. 29b of preceding MS.) ॥

[H. T. COLEBROOKE.]

Digitized by Microsoft®

1645.

1563. Foll. 93; size 11 in. by $6\frac{1}{2}$ in.; good, old Devanāgarī writing; 11–16 lines in a page.

Yati-Siddhāntanirṇaya, a very similar treatise on the same subject, by *Saccidānanda Sarasvatī.*

Unless the authors are the same, one of them has plundered the other wholesale.

It begins:

नमस्कृत्य गणाधीशं स्वाधारस्थितमीश्वरं ।
वक्ष्ये सारतरं शास्त्राद् यतिसिद्धांतनिर्णयं ॥ १ ॥
सच्चिदानंदयतिना क्रियते वेदमानतः ।
यतेः परमहंसस्य धर्माणामेष संग्रहः ॥ २ ॥

तत्रादौ सन्यासाश्रमकालनिर्णयः ॥ ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति जाबालश्रुतिविहितः ॥ अव्यवस्थितविकल्पो ऽपि गृहाद्वा वनाद्वेति ॥ आरुण्युपनिषदि च ॥ गृहस्थो ब्रह्मचारी वानप्रस्थो वा लौकिकाग्नीनुदराधीयाग्नौ (?l. °उदराग्नौ) समारोपयेदिति °

इति ° संन्यासग्रहणादिसर्वेषां कुटीचकादीनां संमिश्रितसकलधर्मसंग्रहः प्रथमोद्देशः fol. 29*b*; इति ° नित्याचारो द्वितीयः। 63*a*; इति ° निबंधक्रमरचनाप्रकारः समाप्तः ॥ यतिधर्मं संपूर्णं ॥ 80*a*; इति ° संन्यासग्रहणविधिः 84*b*; इति ° कुटीचकादित्रयाणां शौचादिविधिः 89*a*; इति ° परमहंसविधिः 91*a*.

It ends: इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्सच्चिदानंदसरस्वतिना संगृहीते यतिसिद्धांतनिर्णये यतेः प्रेतसंस्कारःक्रमः समाप्तः ॥ अन्यत्सर्वं पूर्ववत् ॥ इति श्रीसोद्धांतसारसप्तसूत्र संपूर्णं ॥ ° ॥ संवत् सके पंद्धारावरषे(!) नलनामसंवत्सरे। पूस वदी वारतोष रवोवार शप्तमी(!) संपूर्णं ॥

[H. T. Colebrooke.]

1646.

1062. Foll. 34; size $6\frac{3}{8}$ in. by 3 in.; clear Devanāgarī handwriting of the latter part of the last century; seven lines in a page.

Saṃnyāsi-paddhati, a manual for religious mendicants of the *Vaishṇava* sect.

It begins: अथ संन्यासग्राह्यपद्धतिः ॥ प्रथमे गृहमातापिताभ्राताभगिनीपुत्रं प्रार्थयति। हो सर्वपरिवाराः अहं संन्यासं करोमि। तदनंतरमात्मगृहग्रामादि प्रदक्षिणा कृत्वा तत्र ग्रामांतरं गत्वा क्रोशप्रमाणं। तत्र स्नानं कुर्यात्। देवार्चनादिकं कृत्वा। देवपित्रादिस्मरणं कृत्वा। पुनर्गुरुदर्शनं कुर्यात् °

इति संन्यासप्रार्थनविधिपद्धतिः fol. 3*a*; इति दशनामसंन्यासः 4*a*; इति तर्पणप्रयोगः 5*b*; इत्यष्टश्राद्धविधिः 7*b*; इति यज्ञोपवीतिमंत्रः 12*a*; शिखाहोममंत्रः 12*b*; दीक्षामंत्रः 13*b*; परिष्यामंत्रः 15*a*; -- इति चत्वार संध्याया विधिः 22*a*; -- इति श्रीदत्तात्रेयविरचिते महाज्ञानयोगपटं संपूर्णं। अथाश्रमविवेक लिख्यते 31*b*; इति श्रीमच्छंकराचार्यविरचितं सप्तसूत्रदीक्षासारविवेकः। अथ संकल्पमाह। 33*a*.

It ends: वेदऋषिपितृतर्पणादि शुभकर्म श्राद्धाष्टकं कृत्वा वीर्याहोमपूर्वकं संन्यासग्रहणमहं करिष्येति(!) संकल्पः ॥ इति सप्तसूत्रमहावाक्यार्थविधिपूर्वकं पंचीकरणं समाप्तं ॥

[H. T. Colebrooke.]

1647.

619a. Foll. 16; size $9\frac{1}{2}$ in. by 4 in.; fair Devanāgarī writing; 12 or 13 lines in a page.

Yatisaṃskāravidhinirṇaya, an exposition of the purificatory ceremonies prescribed for ascetics.

There are some *lacunæ,* especially after fol. 7*a* (when a fresh paging begins), on fol. 8*b*, and 12*a*.

The MS. begins: यतिसंस्कारविधिः।

सिद्ध्यनंतरं पुत्रादिः शिष्यो वा स्नात्वा अधिकारसिद्ध्यर्थं वपनसूत्रावरणे कृत्वा देशकालौ संकीर्त्य ब्रह्मीभूतं नारायणरूपिणं भिक्षुं शौनकोक्तविधिना संस्करिष्य इति संकल्पाव्रणं नवं कलशमानीय तीर्थोदकेनापूर्य तदुदकं ॥

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधु कावेरि जले ऽस्मिन् सन्निधिं कुरु ॥
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयते ऽपि वा ।
अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

नारायणः परं ब्रह्म तत्वं नारायणः परः। °

इति यत्यौर्ध्वदेहिकविधिः। fol. 2*b*; °बौधायनशौनकयमस्मृत्यनुसार्याचारानुगृहीतो नारायणबलिप्रयोगः। 6*a*;

Digitized by Microsoft®

° नागरखंडानुसार्याचारानुगृहीत आराधनप्रयोगः । 7*b*; यागकालः । 10*a*.

It ends: एवं कुर्वतः अश्वमेधादिफलं। इति यतिसंस्कारविधिनिर्णयः समाप्तः । सं १७२५ ॥

[H. T. Colebrooke.]

1648.

554. Foll. 103; size 13 in. by 4½ in.; fairly, written in the Bengalī character, in Śaka 1710 (A.D. 1788); nine lines in a page.

Ācāracandrikā, a compendium of the duties of *Śūdras*, by *Śrīnātha Ācāryacūḍāmaṇi*, son of *Śrīkarācārya*. The *pūrvakhaṇḍa*.

It begins:

विचार्य मन्वादिमुनीन्द्रसंहिता
हिताय यत्कर्मनिविष्टचेतसां ।
आचार्यचूडामणिना वितन्यते
तुरीयवर्णाखिलकर्मपद्धतिः ॥
आचारचन्द्रिका चित्तकुमुदामोददायिनी ।
भूयात् परगुणानन्दश्रीजुषां विदुषामियं ॥

अत्र यद्यपि विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते। यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलमिति मनुवचनाद्विप्रसेवाव्यतिरिक्ते कर्मणि शूद्रस्य फलाभावादप्रवृत्तिरेवावगम्यते । तत्तत्संहितापुराणादिषु शूद्राणामपि कर्मविशेषेषु शौचाचमनपञ्चयज्ञादिष्वधिकारश्रुतेरन्यत्रापि प्रवृत्तिरनुमीयते। मनुवचनस्य तु विशिष्टं प्रकृष्टं निष्फलमल्पफलं फलशून्यमेवेति व्याख्यानमिति पारिजातकारादयः । °

अथ शूद्राणां संक्षेपतो विहितनिषिद्धकर्माणि fol. 2*a*; अथाचमनविधिः 9*a*; अथ दंतधावनं 16*a*;—अथ भोजनप्रयोगः 45*b*; अथ स्त्रीसंयोगः 55*a*; इति आह्निकविधिः समाप्तः । इदानीमन्त्येष्ट्यादिसकलौर्ध्वदेहिकविधिनिरूपणमारभ्यते । 57*b*; अथ वृषोत्सर्गः 91*a*.

It ends: इति महामहोपाध्यायश्रीमच्छ्रीकराचार्यात्मजश्रीमच्छ्रीनाथाचार्यचूडामणिकृतायामाचारचन्द्रिकायां पूर्वखंडः समाप्तः ॥

शाके विन्द्विन्दुसिन्धुग्मौमाने श्रीशिवशर्मणा।
अलेखि काशिवासिश्रीमनसाचारचन्द्रिका ॥

For the author's *Śrāddhacandrikā*, see no. 1734, his commentary on *Jīmūtavahana's Dāyabhāga*, no. 1513. [H. T. Colebrooke.]

1649.

2515. Foll. 147; size 11 in. by 4 in.; excellent Devanāgarī writing of about 1550 A.D.; 7 or 8 lines in a page.

Smṛitikaumudī, an exposition of the religious duties of *Śūdras*, composed (by *Viśveśvara*) under the patronage of *Madanapāla*.

It consists of four books (*kalollāsa*) of 2, 4, 5, 5 chapters (*kiraṇa*) resp.

For the introduction नमः सकलकल्याणकारणाय ° see Aufrecht, Cat. Bodl., no. 653.

It ends:

जयत्यखिल[–⏑–]भुवनगीतकीर्तिः सुत[:]
महाराण(? r. महारण or सधारण)महीपतेर्मदनपाल-
[पृथ्वीपतिः ।
अनेन कृतिना कृता स्मृतिपदांकिता कौमुदी
महार्णवसहोदरी मदनपारिजातानुजा ॥

इति श्रीकृतिमनोहरायां कौमुद्यां श्रीमदनपालराजेंदोः आम्नायकल्लोल्लासे पंचमः किरणः समाप्तोयं ॥

For other MSS. of this work, see Burnell, Tanjore MSS., p. 133*b*; Rāj. Mitra, Bikāner Cat., p. 466. [H. T. Colebrooke.]

1650.

2514. Foll. 179; size 10½ in. by 5 in.; clearly written in Devanāgarī, about the middle of last century; nine lines in a page.

Śūdradharmatattva (or *Śūdrakamalākara*), a compendium of the religious duties of the fourth caste, by *Kamalākara Bhaṭṭa*, son of *Rāmakrishṇa Bhaṭṭa*. It begins:

प्रणम्य रामं पितरौ कमलाकरशर्मणा ।
रामकृष्णतनूजेन शूद्रधर्मो निरूप्यते ॥

तत्र शूद्रत्वमूढसवर्णाजत्वं विप्रत्वादिवत् । यद्यपि सर्गाद्यकालीने विश्वामित्रादौ च नैतत्तथापि तत्रादृष्टविशेषारब्धशरीरत्वमेव ब्राह्मणत्वमन्यत्र तु पूर्वोक्तमेवं शूद्रेऽपीति दिक् । °

For an analysis of the work, see Aufrecht, Cat. Bodl., no. 654.

Digitized by Microsoft®

According to Rāj. Mitra, Cat. of Bikāner MSS., p. 499, this treatise forms part of *Kamalākara Bhaṭṭa's* General Digest of Law, entitled *Dharmatattva-Kamalākara*, consisting of the following ten sections:—1. *Vratakamalākara;* 2. *Dānak.;* 3. *Karmapāka;* 4. *Śāntikam.* (or *Śāntiratna*, see no. 1741); 5. *Pūrtak.;* 6. *Ācārak.;* 7. *Vyavahārak.;* 8. *Prāyaścittak.;* 9. *Śūdradharma(tattva);* 10. *Tīrthavidhi.* — See also the author's *Saṃskārakamalākara* above, no. 1630.

The author wrote his *Nirṇayasindhu* in 1611–12 A.D. [GAIKAWAR.]

1651.

1444. Foll. 89; size 12 in. by 4 in.; legibly written, in Devanāgarī, in 1801 A.D.; ten lines in a page.

The same work. [H. T. COLEBROOKE.]

1652.

2800. Foll. 173, the first of which is missing; size 9 in. by 4 in.; indifferent Devanāgarī handwriting; eight lines in a page.

Śūdra(dharma)-uddyota, another treatise on the duties of *Śūdras*, by *Viśveśvara Gāgābhaṭṭa*, son of *Dinakara Bhaṭṭa*, and nephew of *Kamalākara Bhaṭṭa*.

The treatise is intended as a supplement to *Dinakara's Dinakaroddyota* (see no. 1606).

The second leaf begins: ति चतुष्कान्यतमत्वं जातिचतुष्पव्यापकजात्यंतरं वा ०

इति प्रतिलोमषट्कं fol. 3*b*; इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टसूनुगागाभट्टापरनामकविश्वेश्वरभट्टकृते शूद्रधर्मे जातिविवेकनिरूपणं 22*a*; इति ० शूद्रधर्मनिरूपणे सामान्यधर्मनिरूपणम्॥ विश्वेश्वरेण विदुषा नत्वा श्रीराममादरात्। निरूप्यंते च शूद्रस्य संस्कारा गुरुमार्गतः॥ 35*a*; इति ० शूद्रसंस्कारनिरूपणं 38*a*; इति ० शूद्रधर्मे पुण्याहवाचननांदीश्राद्धादिविधिः 43*a*; इति ० शूद्रनांदीश्राद्धप्रयोगः 50*a*; इति गागाभट्टकृतशूद्रकृत्ये सर्वहोमसाधारणविधिनिरूपणं 51*a*; इति गर्भाधानं 51*b*; इति पुंसवनं 52*a*; इति जातकर्म 53*a*; इति नामकर्म 56*b*; इति ० शूद्रविवाहप्रयोगः। अथ संस्कारत्वाच्छूद्रांत्येष्टिप्रयोगः 78*b*;—इति तर्पणविधिः। अथ शूद्रस्य देवपूजाविधिः 126*a*; इति ० शूद्रधर्मनिरूपणे सकलाह्निकोपयोगिविचारः। अथ शूद्राह्निकप्रयोगः 134*b*; इति ० प्रातःकृत्यं 137*a*; इति ० शूद्रोद्योते देशाचारानुरोधेन शूद्रस्य नित्यतर्पणप्रयोगः 144*b*; इति ० विश्वेश्वरपूरितदिनकरोद्योते शूद्राह्निकनिरूपणं। ० अथ शूद्रश्राद्धमिहोच्यते 161*a*.

It ends: इति श्रीगागाभट्टपूरितशूद्रोद्योते श्राद्धोपयोगिनिर्णयः शूद्राशौचे अन्ये विशेषाश्चास्माभिर्दिनकरोद्योताशौचकांडे (Rāj. Mitra, Notices, II., p. 114) कृत्स्नप्रपंचिता इत्यलमतिविस्तरेण [॥] इति श्रीमद्विद्वन्मुकुटरत्नसन्माणिक्यमरीचिमंजरीपुंजपंजरितपदद्वंद्वारविंदश्रीमद्रामेश्वरभट्टसूरिसूनु-श्रीमन्नारायणात्मजश्रीमद्रामकृष्णभट्टतनयजगद्गुरुधौरेयमीमांसा-वतंसदिनकरतनूजगागाभट्टापरनामकविश्वेश्वरभट्टपूरितदिनकरोद्योते शूद्रधर्मनिबंधः समाप्तः ० मार्गसुदि १४ रवौ संवत् १८५७ ०

[?]

1653.

3009m. Foll. 31; size 13 in. by 8 in.; good Devanāgarī writing of A.D. 1830; European paper; fifteen lines in a page.

Kāyasthadharmadīpa, a manual of rules of conduct for men of the *Kāyastha* caste, by *Viśveśvara Gāgābhaṭṭa*.

From the political allusions, in the introduction, to the emperor *Aurungzebe* (*Avrañjeva*) and to *Sivajī* of Rājagiri (? Rājagriha), the founder of the Maratha power, the work would seem to have been composed about 1660 A.D.

It begins:

सिंदूरं नयनं तृतीयकमतिश्यामं गलं कज्जलं
 स्वच्छांगं मुकुटं निशाकरकलामाभुग्नमुक्तास्रजं।
गंगांबूनि निबद्धपिंगलजटापेटीस्थिता मालतीर्
 बिभ्राणो गिरिजामिवार्चितुमसौ देवः शिवायास्तु वः [॥ १ ॥
या वीतिहोत्ररजनीच[र]वेष्टिता पि-
 प्पल्या सरोजसुहृदात्मभुवा सहैव।
संसेवते मलयचंदनगंधवाहं
 तस्यां हरित्यहह राजगिरिश्चकास्ति ॥ २ ॥

Digitized by Microsoft®

तत्रास्ति राजनगरी शिवराजधानी
यत्सौधशेखरगताश्चटकाः प्रभाते ।
पारावता अपि च तांडवयंति तुंडं
तारासु तंडुलधियाप्य(?l. च) निवर्तयंति ॥ ३ ॥

तत्राभवच्छाहनराधिराजः स क्षत्रधर्मस्य नवावतारः ।
सुरद्रुपुष्पोच्चयकामिनीभिः संगीयते यस्य यशःप्रशस्तिः [॥ ४ ॥

कादंबिनीव जनजीवनदानहेतुः
सौदामिनीव सकलारिविनाशनाय ।
आलंबिनी भवति राजगिरेरिदानीं
जीजाभिधा जयति शाहकुटुंबिनी सा ॥ ५ ॥

तत्पुण्यराशिरभवच्छिवराजनामा
यस्य प्रतापसविता क्रमते दिगंतं ।
अस्तोदयाचलपराधभुवि स्थितानाम्
उद्योतपारणमिवाकलङ्किलानां ॥ ६ ॥

प्रतापतपनो महत्प्रकुरुताहिनं ब्रह्मणः
पराभवितुमीहतामपरकोत्तुंडूनि क्षणात् ।
इदं तु महदद्भुतं दहति सातपत्रानयं
न तापयति यैः स्वकं कृतमनातपत्रं शिरः ॥ ७ ॥

दृप्योद्दीप्यद्यवनदितिजो क्रांतिदानाय लोक-
त्राणायोग्रो बहुलकरुणासिंधुराशिर्बभूव ।
मन्ये यस्माद्बहलदितिजाधीशवक्षो विदार्य
स्थाने स्वीये निखिलविबुधान्स्थापयामास भूयः ॥ ८ ॥

द्यावापृथिव्योर्हि समिद्धवत्योर्
धाय्येव मध्ये किल यस्य कीर्तिः ।
दिल्लीश्वरक्रोधधनंजयस्य
प्रकाशयत्याशु समिंधनं या ॥ ९ ॥

यस्योत्पत्तिस्त्रिदशभवने दुंदुभिध्वानकल्पा
को[ऽ]पि स्पष्टो यवनभवनेंद्रादिनीपात स्मः ।
नाम्नश्चैवं सकृदपि जयो [ऽ]व्रंगजेबस्य कंपोत्-
कर्षं नित्यं जनयति चिरं जीवताच्छाहसूनुः ॥ १० ॥

स्येमालंबीभवति भगवान्भानुमान्नः(?l. न्ना)कविद्यद्
गेहारंभीभवति गहने दाववैश्वानरो ऽपि ।
किं चाप्यश्वावदनजनितः सागरे मज्जते यत्
सो ऽयं सर्वो जयति महिमा यत्प्रतापानलस्य ॥ ११ ॥

यत्र क्षात्रमियाय भार्गवभयत्रस्तं परं विश्रमं
वंशो [ऽ] 'गमहीपतेरपि महान्यस्मिन्पतंगायितः ।
यन्नाम त्रिदशास्यहतिपटुताग्रासीभवद्यावना-
वक्षीणोपमितोष्णभूतहृदयो वर्वर्ति दिल्लीश्वरः ॥ १२ ॥

मयातवगिरेर्भृगुं(?) भजति गोलकुंडाधिपः
स दक्षिणदिगीश्वरं श्रयति दक्षिणाशाधिपः ।
महापथमुपासितुं हिमगिरिं च दिल्लीश्वरः
शिवो [ऽ]यमवमन्यतां जयति राजराजश्रिया ॥ १३ ॥

स्ववपुर्व्ययशंकया सुमेरुर्
वपुरर्धव्ययशंकितैरमेयः ।
सुदशान्व्यवधाय भूभृदग्नीन्
सृजतः स्वानि शिवाय दीपवंतौ ॥ १४ ॥

त्वयि दित्सति याचकान्धनेशान्
ददति त्वय्यथ वीक्ष्य व्रात्रमेशान् ।
शिवराजनिजाभिभूतिभीत्या
स्वपमाशांबरतामगान्महेशः ॥ १५ ॥

पीताः शास्त्रमहार्णवा भसिततां प्राप्ताः समुल्लासिता
विश्वं भानुमतेव दीधितमिदं कात्स्न्र्येन लब्धा श्रुतिः ।
नष्या सृष्टिरकारि सृष्टिविरहे त्राता द्विजौघाः क्षमा
वासिष्ठी त्वयि जामदग्न्यसदृश त्वय्येव संभाव्यते ॥ १६ ॥

समस्तसामंतकिरीटरत्नानुबिंबिता यच्चरणोर्ध्वरेखा ।
सीमंतिनीनां समुवाच तेषां सीमंतसिंदूरशिरस्थिरत्वं ॥ १७ ॥

दानोद्यते यत्करपद्मगर्भे रत्नप्रभासं वुलितांबुदर्भे ।
कल्पद्रुदेशः सुरसुंदरीणां संप्राप संकेतनिकेतनत्वं ॥ १८ ॥

पुरा निबिडगर्जनैर्भृशमपाकृतं यैर्घनैर्
जितं सखि मया स तान् प्रियतमो गृहीत्वा गतः ।
विलोक्य गजसंवृतं पतिमुपेदमारादिदं
वदंति सकुतूहलं पुनरहो यदर्थिप्रियाः ॥ १९ ॥

अकब्बरकुलोद्भवादुदिततापसंतापिता
दिवाकरकरा दिवप्रथितकीर्तुपप्लादपि ।
यदंबुवहगर्जितश्रवणनिश्चयात्ते ऽधुना
तपक्षयविनिश्चयात्परमनिर्वृतिं भेजिरे ॥ २० ॥

पिधाने दीनानां श्रियमिह ददाने धनकृतां
लसद्गर्भे यस्य स्फुरति करगर्भे मृतमति(?) ।
हरेरेषा योषा सपदि कमला हंत कमलाद्
उपेत्येतद्भिक्षावधिवसति लक्षाधिकधने ॥ २१ ॥

अवरंगजेबयवनाधिपभीतविप्र-
त्राणाय यः परिगृहीतनवावतारः ।
अन्यो ऽस्ति वा मलयभूवलयात्समुद्रा[त्]
सुत्रामभीतगिरिरक्षणदीतककः(?गिरिरीक्षणदीनकर्कः) [॥ २२ ॥

शिशुंगवंशोद्भववीरसंधे
यः क्षत्रजातिं प्रकटीचकार ।
विजित्य सर्वान्धरणीपतींश्च
यो ऽधारयच्छत्रमथावदातं ॥ २३ ॥

Digitized by Microsoft®

अज्ञानसिंधौ पतितान्स्मृतींश्च
समुद्दधाराज्जुनया स्वकृत्या ।
वेदान्निमग्नानुदधौ युगादौ
यथैव विष्णुः कमठः स्वरूपः ॥ २४ ॥

कायस्थप्रभुवंशजः समभवत्तस्य प्रधानो धिया
बालाजीति समस्तकार्यकरणोदारो महोत्साहकृत् ।
यस्याज्ञामुपयाति राज्यमखिलं सामाद्युपायैः स्फुटैर्
नीत्याद्यैश्च सुगोपितैरपि रिपून्संबाधते ऽहर्निशं ॥ २५ ॥

आवर्ज्जि(?)प्रभुतो मनीषया
यो मनीषिगणनाम्यतामियात् ।
किं च धैर्यगणशिरोपिधिकृतिं(!)
नीतिमार्गगधिया स्वयाकरोत् ॥ २६ ॥

तेन श्रीशिववर्मणा नृपतिना स्वाध्यक्षतां प्रापितो
बालाजी समकारयच्छुभमतिः कायस्थधर्मोदयं ।
मीमांसार्णवसारगामिव च सा विश्वेश्वरेणादरात्
गागाभट्टपराभिधेन सुकृतानुष्ठानसंसिद्धये ॥ २७ ॥

ततो निबंधानवलोक्य भूयो भूयश्च हेमाद्रिमतं विचिंत्य ।
कायस्थधर्माचरणप्रदीपं गागाभिधस्तं प्रकटीचकार॥२८॥

ब्रह्मांडाखंडदंडाच(l. च) श्रीबल्लालशुभेच्छया ।
कायस्थधर्मदीपो ऽयं गागाभट्टेन निर्मितः ॥ २९ ॥

नत्वाभीरकिशोरं चोरं विद्युद्वतो ऽप्यभिख्यायाः ।
कायस्थधर्मदीपं गागाभट्टस्तनोति लीलातः ॥ १ ॥

गागाभट्टपराख्यस्य विश्वेश्वरमनीषिणः ।
सुमनोमानसे शर्म मम निर्मातु निर्मितः ॥ २ ॥

तदुपोद्घातत्वेन आदौ जातिनिर्णयः क्रियते ॥ तत्र चातुर्वर्ण्य-प्रयोजकमाह याज्ञवल्क्यः ॥ °

इति कायस्थाचारदीपिकायां जातिविवेकनिरूपणं ॥
गागाभट्टेन विदुषा नत्वा श्रीराममादरात् ।
जातिं विविच्य संस्कारः कायस्थानां निरूप्यते ॥

कायस्थभेदकथनं तद्धर्मनिरूपणं ॥ निरूपणं च पद्मपुराणे रेणुकामाहात्म्ये ॥ ° fol. 10*a*; इति गागाभट्टकृते कायस्थ-धर्मदीपे सामान्यधर्मनिरूपणं ॥ fol. 12*b*; इति ° संस्कारनि-रूपणं ॥ fol. 15*b*; इति ° स्वस्तिवाचनविधिः fol. 16*b*; इति ° पुण्याहवाचनादिप्रयोगः fol. 21*b*; इति ° सर्वहोमसा-धारणप्रयोगः fol. 22*b*; इति ° नवग्रहमखप्रयोगः fol. 26*a*; इति गर्भाधानं । ° पुंसवनं । ° अनवलोभनं । ° सीमंतः । fol. 27*b*; ° जातकर्म । ° षष्ठीपूजा । fol. 28*a*; इति दत्तकपुत्रविधिः fol. 28*b*; इति नामकर्म । ° दोलारोहः । ° कर्णवेधः । fol. 29*a*; ° उपवेशनं fol. 29*b*; ° अन्नप्राशनं fol. 30*a*.

It ends: इत्यब्दपूर्तिप्रयोगः ॥ [?]

1654.

411. Foll. 393 (fol. 162 of which is missing); size $12\frac{3}{4}$ in. by $5\frac{3}{4}$ in.; clear, modern Bengalī handwriting; eight lines in a page.

Varshakaumudī, a calendar of religious observances enjoined for the different days of the lunar year, by *Govindānanda Ācārya*, son of *Bhaṭṭa Gaṇapati*. The treatise forms a section of the author's *Kṛityakaumudī*.

It begins:

चिन्ताऽश्मीयति धातरि व्रजवधूचित्तेषु पाशीयति
स्वाराजि स्तुवति प्रसादविहितश्यामासुजन्मीयति ।
यन्नेत्राञ्जनचातुरी जलधिजावक्त्राम्बुजे ऽलीयति
क्षोणीभारहराय यादवकुलोत्तंसाय तस्मै नमः ॥ १ ॥
धुनोतु ध्वान्तमस्माकमन्तश्चिन्ताभिसंभृतं ।
गोविन्दवदनोद्भूत्पाञ्चजन्यजयध्वनिः ॥ २ ॥
येन ज्योतिषपङ्कजेषु नितरां मार्तण्डबिम्बायितं
श्रीगोविन्दपदारविन्दयुगले लीलामरालायितं ।
वेदान्तस्मृतिसंततित्रिपथगोन्मेषे हि मात्रीयितं
केषां नोपरिशीलितो गणपतिर्भट्टः स तादृग्विधः॥३॥
तत्तनुजन्मा विदुषामनुरागमधूलिकाभिरासिक्तः ।
मधुरिपुपदारविन्दश्रद्धामृतमाधुरीरसाभिज्ञः ॥ ४ ॥
आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगथो विविच्य मुनिभिर्मन्वादिभिः संहिताः।
श्रीमत्तातपदारविन्दविलसद्भूलीभवोद्देशतः [॥ ५ ॥
श्रीगोविन्दकविः करोति ललितां वर्षक्रियाकौमुदीं

अथ संवत्सरकृत्ये निरूपणीये प्रायशः कर्माधिकरणतया विहितायां तिथीनां प्राधान्यात् प्रथमं तावत्तिथिस्वरूपनिरूप-णपूर्वकं कर्मोपयुक्तभागा निरूप्यन्ते । °

It ends:

गोविन्दानन्दकृतिना कृतेयं वर्षकौमुदी ।
इमां – – – भजन्तु कृतकृत्यतां ॥
सर्वान्तर्यामिने तस्मै गोविन्दाय नमो नमः ।
यत्कृपा विदुषामस्यामनुरागप्रवर्तिनी ॥

इति श्रीगोविन्दानन्दाचार्यकृता वर्षकौमुदी समाप्ता ॥

Digitized by Microsoft®

Then follow five leaves containing a table of contents in parallel columns.

For the author's *Śuddhikaumudī*, see no. 1744; his *Arthakaumudī*, (MS. 493), further on (Astronomy). [H. T. Colebrooke.]

1655.

2705. Foll. 131 (the first of which is missing), paged (1)–262; size 8½ in. by 7½ in.; 4to.; modern Telugu handwriting; 13–18 lines in a page.

Kālādarśa, a treatise on the times and seasons suitable for the performance of religious rites, by *Āditya Bhaṭṭa* (also called *Kavivallabha*, disciple of *Viśveśvarācārya*).

A MS. described by Rāj. Mitra, Notices, VII., p. 243, begins:

ब्रह्मादयो यद्वशगा युगादिकालप्रभेदाश्च यदीयभेदाः ।
कालात्मकं सान्तकमूर्तये ऽहं नित्याय तस्मै नियतं नतो [ऽस्मि ॥ १ ॥ °

विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी कालं विनिर्णेष्यति मन्दबुद्धै [॥ ३ ॥

The present MS. begins: ° स वृद्धिविधिस्तूपेत्याब्दिकादिविषयस्तदुत्तरत्र विविच्यते । षट्त्रिंशन्मते ऽप्युक्तं ।

त्रिमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी ।
षण्मुहूर्तेन कर्तव्या या तिथिः क्षयगामिनी ॥

On the fly-leaf, and outside, the work is wrongly marked as *Kālamādhavīya*.

इति कालादर्शे एकादशीप्रकरणं समाप्तं ॥ अथ पर्वनिर्णयः । fol. 53*a*; इति ° महालयनिर्णयः fol. 66*a*; इति ° अष्टकानिर्णयः fol. 67*a*; इति ° अलभ्ययोगप्रकरणं fol. 113*a*.

P. 146*a*:

दृष्ट्वा पुरातनपुराणवचांस्यशेष-
मन्वादिकस्मृतिवचांसि विविच्य तत्त्वं ।
सांवत्सरागमवचांसि च कालतत्त्वं
निर्णीयते स्म कृतिना कविवल्लभेन ॥

इति श्रुतिस्मृतीतिहासपुराणमीमांसादिविचार्यमाणत्रितय-विकारनिर्णयेत्यर्थः ॥ इति कालादर्शे यज्ञकालनिर्णयप्रकरणं समाप्तं ॥

कौविदाकृतदितयः (? l. कौविद्यकृत्त्ववितथाः) कवि-
विज्ञापनं शृणुत लोकचितप्रणामाः । [वल्लभस्य
कालस्य निर्णयकरीं कृतिमस्मदीयाम्
एनां निरस्तमदमत्सरमाद्रियध्वं ॥

विज्ञानयोगिनो विश्वरूपाचार्यस्य निश्चयः ।
गृह्येस्य धार्मयोर्भोष्यं (!) तथा स्मृतिमहार्णवे ॥

विश्वादर्शं नित्यादर्शं मदनं स्मृतिचंद्रिकां ।
अपरार्कं कल्पतरुं शिवस्वामिमतं तथा ॥

बालरूपं स्मृतिरत्नं मंजूषां मानवं मतं ।
स्मृतिसंग्रहणं धर्मप्रदीपं कारणागमं ॥

ज्योतिषाणां च तंत्राणि वास्तुतंत्रं समीक्ष्य च ।
न्यायैः सम्यग्विचार्यायं कालादर्शो मया कृतः ॥

अतंत्रवचनानां ये मूलं पृच्छंति पंडिताः ।
तेषां प्रेक्ष्या इमे ग्रंथा इति दत्तं मयोत्तरं ॥

इत्यादित्यभट्टोपाध्यायस्य सूनुः (! l. सूरेः) कविवल्लभापरनाम्नो गर्गकुलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयः समाप्तः॥

This might seem to be the end of the work, as is the case in the Calc. MS., referred to (which, however, omits the six *ślokas*). The present MS., however, after two blank pages (148-9), proceeds:

प्रबुध्ये (!) च शुक्लपक्षे हरेर्दिन इति ।
तत्कुत्र श्रवणोपेते पावने परिकीर्तिते ॥ °

इति ° अपाकर्मनिर्णयप्रकरणं । अत्र चंद्रदर्शनवर्जमाह पराशरः । fol. 156*a*; इति ° पर्वद्वयनिर्णयः fol. 251*a*; इति ° अमावास्यानिर्णयः ॥ अथ मन्वन्तरादीनां युगादीनां निर्णयः । ° fol. 261*a*.

In this second portion several lacunæ occur, esp. at foll. 229-30, 237-38, which are left blank.

It ends rather abruptly: आवृता प्रकारेण । तमाह बृहन्मनुः ॥ --

For another (incomplete) MS., see Bikāner Cat., p. 399.

The work must have been composed prior to the middle of the 14th century, as it is quoted in the *Kālamādhava* (ed., p. 83).

[Mack. Coll.]

Digitized by Microsoft®

1656.

2490. Foll. 203; size 11 in. by 4½ in.; excellent Devanāgarī writing; nine lines in a page.

Mādhavīya-Kālanirṇaya, also called *Kālamādhava* or *Kālamādhavīya*, another work, in five chapters (*prakaraṇa*), on the same subject, by *Mādhavācārya* (? *Sāyaṇa*).

The work was written (probably about 1360 A.D.) after the completion of the author's commentary on the *Parāśarasmṛiti* (and his *Vyavahāramādhava*), to which it forms a kind of supplement. It has been edited, in the Bibliotheca Indica, by Paṇḍit Candrakānta Tarkālankāra (1885–88). See also Weber, Cat. Berl., no. 1166-67; Aufrecht, Cat. Bodl., no. 642.

The MS. is dated; संवत् १६७९ वर्षे आषाढवदि ११ बुधवासरे लिखितम् ।

[GAIKAWAR.]

1657.

2056. Foll. 186; size 11½ in. by 5 in.; fairly good, modern Devanāgarī writing; 9 or 10 lines in a page.

The same work. [GAIKAWAR.]

1658.

1097. Foll. 113; size 12½ in. by 4½ in.; fair Devanāgarī writing, of 1790 A.D.; 10 lines in a page.

Mādhavīya-Kālanirṇaya.

[H. T. COLEBROOKE.]

1659.

116b. Foll. 32; size 10 in. by 3¼ in.; legibly written, in Devanāgarī, about A.D. 1750 (foll. 1–6 by a different hand from the rest); 7–11 lines in a page.

Kālanirṇayadīpikā, a summary, in 300 couplets, of the subjects treated in the preceding work, by *Rāmacandrācārya* (son of *Kṛishṇācārya*, and grandson of *Anantācārya*), pupil of *Gopāla*.

According to Prof. Bhandarkar, Report for 1883-84, pp. 58–60, *Rāmacandra*, who was also the author of the *Prakriyākaumudī* (see nos. 613 seq.), lived in the 15th century (c. 1450).

It begins:

कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरून् ।
धर्मज्ञानार्थमातन्मः कालनिर्णयदीपिकां ॥ १ ॥
यद्यप्यर्थवशात्प्राप्तं स्पष्टतायै क्वचित् क्वचित् ।
प्रपंच्यते स्वशब्देन मूलग्रंथानुसारतः ॥ २ ॥
मासाः सावनसौरचांद्रभभुवोह्नां त्रिंशता संक्रमाद्
आसंक्रांतिसितादिपक्षयुगतः सर्वर्क्षयुक्त्या क्रमात् ।
नाडीषष्टिमितार्कराश्यनुगतत्रिंशांशभाक्तिथ्यव-
च्छिन्नो भावधिरेवमेव दिवसः प्रोक्तश्चतुर्धा बुधैः ॥ ३ ॥

It ends:

दुर्बोधग्रंथसिद्धांत[ध्वांत]संघातभंजिका ।
सुश्लक्ष्णा ऽकारि रामार्यैः कालनिर्णयदीपिका ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यकृता कालनिर्णयदीपिका समाप्ता ॥

[H. T. COLEBROOKE.]

1660.

2513. Foll. 157; size 10½ in. by 4¾ in.; well written, in the Devanāgarī character; mostly ten lines in a page.

Kālanirṇayadīpikā, with a commentary (*vivaraṇa*), by *Rāmacandra's* son *Nṛisiṃha* (A).

The commentary begins:

श्रीविठ्ठलं श्रुतिशिरःप्रथितप्रभावं
भावार्द्रमानससरोवरराजहंसं ।
श्रीरामचन्द्रगुरुमेकमनेकशास्त्र-
पारीणकोविदधुरीणमहं नमामि ॥ १ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तानुमता च वैष्णवमहासिद्धान्तसद्दीपिका ।
कालज्ञानविधौ व्यधायि विबुधानन्दप्रबन्धत्रयं
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥२॥

Digitized by Microsoft ®

श्रीरामचन्द्रकृतिना निधिना कलानां
आनीतमेतमधुना वसुधासुतायाः (? ° सुधायाः) ।
श्रीकालनिर्णयकृदुक्तिसुधाब्धिसारम्
आपीय कर्णपुटकैः कलयन्तु कालं ॥ ३ ॥

तत्सूनुना समयनिर्णयदीपिकायां ।
गाम्भीर्यगर्भपदपद्यगुणान्वितायां ।
निर्णीयते विवरणं कणशः प्रवीणैर्
आचूलमूलमवलोक्य विवेचनीयं ॥ ४ ॥

It ends:

इति विवरणमेतद्दीपिकाया मया यत्
कृतमनुसृतवाक्यं न्यायविन्यासगर्भं ।
स्वमतिसदृशतत्तद्दर्शितानेकभावं
सुजनजनमनस्तद्वीक्ष्य वैलक्ष्यमेतु ॥ १ ॥

श्रीरामस्वामिनामा रघुपति(*)रकरोन्मन्त्रशास्त्रे ऽभिषेकं
यस्याचार्याभिधां च स्वयमदित ततो ज्ञातसर्वागमार्थः ।
यश्चक्रे पञ्चरात्रागमहृदयमयं वल्लभानां त्रयं सो
ऽनन्ताचार्यः कुलेशः शमयतु दुरितं मे विमुक्तार्यसूनुः॥२॥

तत्सूनुः श्रीशसेवाचरणविबुधगणानन्दि यो न्याययुक्तं
भाष्यं सारं श्रुतीनामकृत नृपसभे वादिवृन्दं विजित्य ।
गोपालाचार्यमुख्यान् सुतरतिरभवद्यस्य सो ऽस्मान्नृसिंहा-
चार्यो ऽव्यात् कल्पवर्त्ति† प्रभवति सततं यस्य गोत्रं
[पवित्रं ॥ ३ ॥

तत्पुत्रः पात्रभूतो निगमनयसुखाष्टदशानां गिरां यो
व्याकृत्यां सूत्रवृत्तिं सदसि नरपतेः संदधौ रामनाम्नः ।
यस्याभूतां सुतौ द्वौ द्विजकुलतिलकौ श्रीनृसिंहार्यरामा-
चार्याख्यौ सो ऽवतान्नो निजजनसुखकृत् कृष्ण आ-
[चार्यवर्यः ॥ ४ ॥

तत्पुण्यानां फलं यः सुतमयमभवद् भ्रातृभक्तिप्रसक्तो
गोपालाचार्यदीक्षाक्षपितकलिमलोऽनेकविद्याविदग्धः।
प्रख्याताः सर्वविद्वत्सदसि बहुविधा यस्य ते ते प्रबन्धाः
सो ऽन्तर्वाणिप्रणम्यो मम मनसि सदा वर्ततां राम-
[चन्द्रः ॥ ५ ॥

तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्
काव्यानां येन टीका व्यरचि स करुणाम्भोनिधिर्दी-
[नसिन्धुः ।
श्रीकृष्णाचार्यसंज्ञो गुरुरयमवतान्मां कृपां प्राप्य यस्य
श्रीरामाचार्यसूनुर्विवरणमकरोद्दीपिकाया नृसिंहः॥६॥

* नरपति ° D. † कल्पवृत्तिं A.

इति श्रीमत्सर्वशास्त्रज्ञसकलसदागमाचार्यपरमहंसपरिव्राजकश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यसुतश्रीनृसिंहाचार्यविरचितं कालनिर्णयदीपिकाविवरणं समाप्तं ॥

[GAIKAWAR.]

1661.

1323. Foll. 82; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, by two hands, in 1805 A.D.; eleven lines in a page.

Nṛisiṃha's Kālanirṇayadīpikā-vivaraṇa (B).

[H. T. COLEBROOKE.]

1662.

2644. Foll. 145; size 10 in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, ten lines in a page.

The same work (C).

Dated: संवत् १६०४ वर्षे माघवदि ११ रवौ लिखितं ॥

[GAIKAWAR.]

1663.

181a. Foll. 134; size $10\frac{1}{2}$ in. by 4 in.; legibly written, in Devanāgarī, A.D. 1678; foll. 105–131 by a different hand from the rest; ten lines in a page.

Kālanirṇayadīpikā, with *Nṛisiṃha's* commentary (D).

For other MSS. of these works see Rāj. Mitra, Notices, I., p. 75; VII., 53 (without the final verses 2–6).

[H. T. COLEBROOKE.]

1664–1666.

885, 886, 887. Foll. 1–179, 180–380, 381–558, the first 36 of which were apparently lost, and replaced by 35 leaves in a more modern handwriting, as was also the last leaf (including the date); size $10\frac{1}{2}$ in. by 4 in.; on

Digitized by Microsoft®

the whole fairly written, in Devanāgarī, by different hands, about the middle of the last century; 7–10 lines in a page.

Rāmaprakāśa, a commentary on *Rāmacandra's Kālanirṇayadīpikā*, composed by (order of) *Kripārāma(nripati)*.

The real author probably was *Rāghavendra*, son of *Kāśīnātha;* see his digest of matters relating to *ācāra* (nos. 1600–1602), bearing the same title as the present commentary.

It begins: श्रीसांबमवलंबे ॥

यतः सर्वं विश्वं भजति जनिसत्त्राल[य]मिदं
य आत्मा सर्वेषां स्थिरचरजडानामपि विभुः ।
तमेतं भास्वंतं विधिहरिमहेशानवपुषं
नमस्यामः कामं परमकमनीयं सुकृतिनां ॥ १ ॥
अज्ञानध्वांतहर्तारं कर्तारं सर्वसंपदां ।
आनंदामृतदातारं सवितारं भजामहे ॥ २ ॥
लोकाभिरामं श्रीरामं भक्तानां कामदं परं ।
नीलोत्पलदलश्यामं सरामं तं भजामहे ॥ ३ ॥

धर्मज्ञानार्थमित्यनेन धर्मजिज्ञासुरत्राधिकारीति निर्धारितं कालनिर्णयविधानेनैव कालनिर्णयार्थस्या ऽस्याश्च प्रकाश्य प्रकाशभावलक्षणः संबंधो ऽबोधि । दीपिकेत्यनेन स्पष्टार्थता सूचितेति भाव इति ०

इति गौरक्षत्रकुलोद्भव(l. गौड०)० नृपतिश्रीकृपारामविरचिते विधेयाविधेयविचारमहातरंगितकालतत्त्वार्णवसंचारोपायसेतुतरणिभूते रामप्रकाशनामग्रंथे संवत्सरांतकालस्वरूपनिर्णयः fol. 90*b*; इति ० घटिकामुहूर्तादिविभागादिकसामान्यतिथ्यंतनिर्णयप्रकरणं fol. 133*b*; इति० व्रतादिविषये तिथ्यादिकालनिर्णयः fol. 511*b*.

It ends: अत्र वर्ज्यान्याह परिशिष्टे ।

शाकमांसं मसूरं च चणकान्कोरदूषकान् ।
मांसं मधु परान्नं च वर्जयेदौपवस्तके इति ॥

इति गौडक्षत्रकुलोद्भवमाणिक्यचंद्रान्वयमहामतिकपरमज्ञानविराजमानमानोन्नतकीर्तिप्रतापोर्जितनृपतिश्रीकृपारामविरचिते इष्टकालनिर्णयसेतुभूते रामप्रकाशनामग्रंथ समाप्तिमफाणीत् ॥ संवत् १८६२ ॥

[H. T. Colebrooke.]

1667, 1668.

2104, 2105. Foll. 493; size 9¾ in. by 4½ in.; written, in Devanāgarī, by different hands, in the earlier part of the last century; 8–17 lines in a page.

Kālatattvavivecana, another treatise on the times and seasons suitable for the performance of religious and civil obligations, compiled by *Bhaṭṭa Raghunātha* (*samrāṭ-sthapati*), son of *Bhaṭṭa Mādhava*, grandson of *Bhaṭṭa Rāmeśvara* and nephew of *Bhaṭṭa Nārāyaṇa* (and *Śrīdhara*), in the year Saṃvat 1677 (A.D. 1620).

It begins:

पितरं माधवमंबां ललितां नारायणं पितृव्यं च ।
सहजमथ विश्वनाथं गणपतिमीशां च शारदां नत्वा॥१॥
रामं च सीतयोपेतं रघुनाथेन रच्यते ।
सम्राट्स्थपतिना सम्यक् कालतत्त्वविवेचनं ॥ २ ॥
तत्रादौ बहुवाच्यत्वान्निथितत्त्वं विविच्यते ।
पश्चान्मासाधिमासादि यथामति विवेक्ष्यते ॥ ३ ॥

तत्र तिथिर्नामामासंज्ञकसर्वानुस्यूतनित्यकलाव्यतिरिक्तानां प्रतिपद् ०

It ends:

अज्ञस्य शोकमग्नस्य कृत्ये ऽस्मिन्नतिदुःशके ।
यत्पारगमनं तत्र हेतुर्गुरुकृपैव मे ॥ १ ॥
सप्त[सप्त suppl. B.]रसभूमिमिते ऽब्दे
कार्त्तिकासितमुनौ रविवारे ।
ग्रंथपूर्तिसुकृतिं रघुनाथो
राघवस्य परमर्पयति स्म ॥ २ ॥
चतुःसमुद्रीपरिखा धरित्री
शिष्यप्रशिष्यैर्गृहिभिक्षुवर्यैः ।
यस्याचिता ब्रह्महरीशकल्पैः
स्वसूनुभिर्यश्च तुरीयरूपः ॥ ३ ॥
नारायणश्रीधरमाधवाख्यै
रामेश्वरः सो ऽजनि गाधिवंशे ।
तस्यांतसूनो रघुमाधवस्य
षड्दर्शनीसागरपारगस्य ॥ ४ ॥
वर्णाश्रमाचारसमूलसंवित्
तत्पूर्वकानुष्ठितिविश्रुतस्य ।
मध्यः सुतो ऽजायत विश्वनाथ-
प्रभाकराभ्यां जनुषा गुणैश्च ॥ ५ ॥

Digitized by Microsoft ®

सम्राट्स्थपतिर्यज्ञीयो रघुनाथ इति श्रुतः ।
तेनेदं निर्मितं सम्यक् कालतत्त्वविवेचनं ॥ ६ ॥
तत्संतो द्रष्टुमर्हंति सदसद्व्यक्तिहेतवः ।
मीमांसाधर्मशास्त्रेषु सम्यक्कृतपरिश्रमाः ॥ ७ ॥ ॰ ११ ॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीभट्टमाधवविद्वद्वर्यात्मजस-म्राट्स्थपतिभट्टरघुनाथकृतं कालतत्त्वविवेचनं संपूर्णं ॥

[GAIKAWAR.]

1669.

1840. Foll. 392; size 13⅓ in. by 6 in.; fair, modern Devanāgarī writing; twelve lines in a page.

Kālatattvavivecana.

[DR. JOHN TAYLOR.]

1670.

1468. Foll. 174 (and 2 *śuddhipattras* between foll. 9 and 10); size 9 in. by 3¾ in.; indifferent Devanāgarī writing; eleven lines in a page.

Kālanirṇayaprakāśa, another treatise on the same subject, by *Rāmacandra* (son of *Viṭṭhala Bhaṭṭa*, and grandson of *Bālakrishṇa Bhaṭṭa*, with the family name of *Tatsat*).

It begins:

श्रीनृसिंहपदद्वंद्वं नत्वा गणपतिं गुरूं ।
रामचंद्रो ऽतिसंक्षिप्तं कुरुते कालनिर्णयं ॥

तत्र कालो द्विविधः । नित्यः खंडश्च । नित्यस्त्वीश्वररूप एव । अनादिरेष भगवान् कालो ऽनंतो ऽजरो ऽमर इति वचनात् । खंडः क्षणादिपरार्धांतः । तत्र नित्यस्य न निर्णयो ऽनुपभोगात् । खंडस्तु संवत्सरायनर्त्वृतुमासादिरूपेणानेकविधिः । तत्रादौ संवत्सरो निर्णीयते । स च द्वादशमासात्मकः काल-विशेषः । द्वादश मासाः संवत्सर इति श्रुतेः । ॰

The arrangement is similar to that adopted by *Mādhava*, who is frequently quoted by the author.

Date of MS.: शंवत् १८५६ वैशाषकृष्णपक्षे परिवा १ शांण १२०६ । ॰

For other MSS., see Rāj. Mitra, Notices, IV., p. 284; Bikāner Cat., p. 401.

According to Prof. Bhandarkar, Report for 1883-84, p. 50, the mother of this *Rāmacandra* was the daughter of *Raghunātha Bhaṭṭa*, the son of *Mādhava Bhaṭṭa*, and grandson of *Rāmeśvara Bhaṭṭa*. If so, the author's date would be approximately determined (latter part of 17th century) by that of his grandfather, who wrote his *Kālatattvavivecana* (nos. 1667-68) in 1620 A.D.

[H. T. COLEBROOKE.]

1671.

2044. Foll. 124; size 11 in. by 5 in.; well written, in Devanāgarī; 7–13 lines in a page.

Kālanirṇayasiddhānta, a summary of the rules laid down by some of the preceding writers, in 114 *ślokas*, with a commentary, composed in 1653 A.D. (by *Mahādevavid*, son of *Śrīkālajit*; from materials compiled) by *Raghurāma*, son of *Jayarāma*, and grandson of *Vaikuṇṭha* of Velāvatapura near Sihor in Kathiawar (A).

It begins:

शिवं कालतनुं नत्वा विपश्चिज्जनतुष्टये ।
कालनिर्णयसिद्धांतं वक्ष्ये ग्रंथानुसारतः ॥

The commentary begins with three *ślokas*, the first of which is:

प्रणम्यैकरदं देवं शारदां गुरुमेव च ।
कालनिर्णयसिद्धान्तं व्याकुर्वे विशदोक्तितः ॥ ॰

अथ ग्रन्थकर्ता स्वाभीष्टं प्रतिजानीते । ॰ । ग्रन्थानुसारत इति । ग्रन्था माधवाचार्यरामचन्द्राचार्यरघुनाथवाजपेयिप्रभृतिर-चिता निबन्धाः ॰

At the end the following account is given of the author:

श्रीनृसिंहपुरांतिके द्विनिगमो वेलावटाख्ये पुरे
श्रौतस्मार्तविधानसारचतुरो वैकुंठनामाभवत् ।
तत्सूनुर्जयराम आद्य उदितः श्रीरामनामापरस्
तत्पृष्ठे हरिराम इत्यभिधया ब्रह्मेशविष्णूपमाः ॥ ११५ ॥

Digitized by Microsoft®

तत्र श्रीजयरामजेन रघुरामेणात्र बुद्ध्या स्वया
ज्ञात्वानेकनिबंधकान् विलिखितं निश्चित्य यद्यत्नतः ।
तद् दृष्ट्वा गिरिनारराजमहितः श्रीकालजित् तत्सुतो
वृत्तैस्तर्कहरोन्मितैर्व्यरचयद्ग्रंथं महादेववित् ॥ ११६ ॥

स्वस्त(!) श्रीमन्नृपविक्रमान्नववियत्सप्तेंदुसंख्ये ऽब्दके
मार्गे मासि सिते दले स्मरतिथौ वारे भृगोर्वह्निभे ।
साध्ये युज्यथ तैतलाख्यकरणे श्रीमद्भुजाख्ये परे
दृष्ट्वार्थं रघुरामकॢप्तमकरोद्ग्रंथं महादेववित् ॥ ११७ ॥

शाके विक्रमभूपतेर्गगनभूसप्तेन्दुसंख्ये ऽयने
सौम्ये माधवमासि उज्ज्वलदलभानोस्तिथौ पुष्यभे ।
जीवारे युजि गंजनाग्नि करणे पश्चे भुजे पत्तने
व्याख्येयं जयरामजेन रघुणा ग्रंथस्य बुद्ध्या कृता ॥ ११८ ॥

Commentary thereon: अथ ग्रंथकर्ता स्वात्मानमुपदिशति। श्रीमत्सिंहपुरस्य लोकप्रसिद्धशीहोरपुरस्यांतिके समीपे वेलावटाख्ये पुरे लोकप्रसिद्धवेलावटपुरे* द्विनिगमी द्विवेदी वैकुंठनामा द्विजो ऽभवत् ॥ ११५ ॥

° अनेकनिबंधकान् माधवकालतत्त्वविवेकादिनिबंधान् ज्ञात्वा ° ॥ तत्सर्वं दृष्ट्वा विलोक्य श्रीगिरिनारो रैवताचलः तस्य राजा तेन महितः पूजितः श्रीकालजिद् वाडवः तस्य सुतो महादेववित् तर्कहरोन्मितैर्वृत्तैः षोडशोत्तरशतैरिमं(!) ग्रंथं व्यरचयदिति ॥ ११६ ॥

° १७०८ संख्ये ऽब्दके ° स्मरतिथौ त्रयोदश्यां भृगोर्वासरे कृत्तिकानक्षत्रे साध्ये युजि साध्ययोगे तैतलाख्यकरणे एवं पंचांगे श्रीमद्भुजाभिधे पुरे रघुरामेण कॢप्तं रचितमर्थं विलोक्य महादेववित् ग्रंथमकरोदलिखच्च ॥ ११७ ॥

अथ टीकालिखनसमयं(!) व्याख्याता रघुरुपवदति ॥ १७१० ॥ एतादृशे समये भुजे नगरे द्विवेदिजयरामजेन रघुरामेण ग्रंथस्येयं व्याख्या बुद्ध्या मनीषया कृतेति ॥ ११८ ॥

इति श्रीद्विवेद्यग्निहोत्रिजयरामसुतरघुरामविरचितो निर्णयसिद्धान्तः सटीकः समाप्तिं समगमत् ।

[GAIKAWAR.]

1672.

2045. Foll. 124; the same size and handwriting.

The same work (B). [GAIKAWAR.]

* Thus A; ° उपदिशति । श्रीमत्सिंहपुरे लोकप्रसिद्धे वेलावटपुरे ॥ B.

1673.

2521b. Foll. 23; size $10\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; fairly good Devanāgarī writing of 1705 A.D.; 13 or 14 lines in a page.

[*Hemādri-*] *Kālanirṇaya-saṃkshepa* (or *saṃgraha*), by *Bhaṭṭoji Dīkshita*, son of *Lakshmīdhara Sūri;* on the divisions of time with reference to the observance of expiatory, obsequial and domestic rites, in accordance with *Hemādri's* digest.

It begins: मासश्चतुर्धा। त्रिंशता दिनैः सावनः। सूर्यस्य संक्रमादा संक्रांतिः सौरः। पक्षद्वयेन चांद्रः। अश्विन्यादिरेवत्यंतनक्षत्रपरिवर्तनेन नाक्षत्रः। दिवसो ऽपि चतुर्धा। अहोरात्रः सावनः। सौरमासत्रिंशांशः सौरः। तिथ्यवच्छिन्नश्चांद्रः। चंद्रसंबद्धनक्षत्रावच्छिन्नो नाक्षत्रः। अब्दस्त्रिधा। उक्तं हि ब्रह्मसिद्धांते। °

It ends:

मुख्यकालमुपाश्रित्य [गौण]मप्यस्तु सायनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् ॥

विस्तारो हेमाद्रौ बोध्यः ॥

भट्टोजिद्भट्टरचितः कालनिर्णयसंग्रहः ।
गुणगृह्यैर्बुधैः सो ऽप्यमादरेण विभाव्यताम् ॥

इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिद्दीक्षितेन हेमाद्रिकालनिर्णयसंक्षेपः समाप्तः ॥ संवत् १७६२ वर्षे कार्त्तिकमासे लिखितं देवभक्षिणा ज्येष्ठेन तृतीया भौमे स्तंभतीर्थवासिना राजनगरस्थेन ॥ अथ दानविधिः । तुलाग्रकोटीरथचक्रमध्ये ° a few more lines.

For another MS. of this treatise (there ascribed to *Hemādri*), see Rāj. Mitra, Notices, VIII., p. 28; for the author's *Tithinirṇayapradīpa* (or *saṃkshepa*), see no. 1677.

[GAIKAWAR.]

1674.

1597d. Foll. 14; size $9\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; fairly written, in Devanāgarī; twelve lines in a page.

Parvanirṇaya, a disquisition on the proper time for the Full and New Moon and cor-

Digitized by Microsoft ®

responding obsequial offerings, composed, in 1685 A.D., by *Gaṇapati Rāvala*, son of *Śrī Rāvala Hari*, and grandson of *Rāmadāsa*.

It begins :

श्रीशिवं सद्गुरुं नत्वा कर्कगर्गादियाज्ञिकान् ।
दर्शे च पौर्णमासे च यागकालो निरूप्यते ॥ १ ॥

वृष्णुक्तश्रुतिसूत्रभाष्यनिचयं श्रीकर्कदेवोदितान्
श्रीनंताभिधरामयाज्ञिकमतांस्तान् पर्वणो निर्णयान् ।
श्रीगंगाधरनिर्मितं हरिहरं रेणुं तथा मंडनं
श्रीकात्यायनयज्ञपार्श्वसहितं कर्मप्रदीपं तथा ॥ २ ॥

हेमाद्रिं प्रथितं च माधवमतं स्मृत्यर्थसारामृतं
[सारं]श्रीमदनस्य निर्णयमहासिंधुं तथा भास्करं ।
तत्त्वं कालविवेचनं स्मृतिगणान् श्रीकौस्तुभं ज्योतिषं
सिद्धांतस्मृतिचंद्रिकादिनिखिलग्रंथान् विचार्यादरात् ॥ [३ ॥
श्रुतिसूत्रस्मृतिभाष्यप्राचीननिबंधसागरानेतान् ।
गणपतिरावलविदुषा निर्मथ्यैषां विधीयते सारः ॥ ४ ॥

श्रौदीचद्विजगुर्जरेषु महितः श्रीरामदासो ऽभवद्
गौडाधीशमनोहरार्चितपदो यो याज्ञिकः कीर्तिमान्।
तत्पुत्रो हरिशंकरो ऽध्वरकृती श्रीरावलख्यातिभृत्
तत्सूनुर्यजुषां स्थितिर्गणपतिर्ब्रूते नयं पर्वणः ॥ ५ ॥

पर्वण्यखंडे स कथं विधेयः
खंडे ऽथवा पिंडयजिः कदा स्यात् ।
राकानुमत्योः सकलं तदेतद्
विचार्य वक्ष्ये सुगमैर्वचोभिः ॥ ६ ॥

धीरान्कुशाग्रधिषणान् धिषणप्रगल्भान्
संप्रार्थये मुहुरहं प्रहितप्रणामः ।
यत्पार्वकालिकविनिर्णयसारमेनं
सानुग्रहाः सुमनसः प्रविचारयितुं ॥ ७ ॥

दर्शपौर्णमासयागं प्रकृत्य श्रूयते । स यो हैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजत आमावास्येनामावास्यां क्षिप्र एव पाप्मानमपहत इति ॥ कात्यायनसूत्रे च । ०

Iti paurṇamāsīnirṇayaḥ, fol. 5*a*; *anvādhānapiṇḍapitṛiyajñakālanirṇayaḥ*, fol. 8*b*.

It ends :

सत्पर्वनिर्णयः पंथाः पुमर्थाध्वापि धर्मभूः ।
शिवसंप्रापको ऽकारि यज्ञेशः प्रीयतां ततः ॥ १ ॥

पर्वद्वयसमुल्लासी भाति सत्पक्षनंदनः ।
माधवाभ्युद्धृतश्चित्रः पर्वनिर्णयचंद्रमाः ॥ २ ॥

शतपथविकटेषु श्रौतमार्गेष्वटंतो
विविधविधिविकल्पध्वांतगूढेषु खिन्नाः ।
पथि गणपतिदिष्टे पर्वणो निर्णयेंदाव्
अमृतकिरणदीपे याज्ञिकाः संचरंतु ॥ ३ ॥

नेत्रांभोभिधराधरक्षितिमिते श्रीविक्रमार्के शके १७४२
मासीषे विजयातिथौ रविदिने माल्हेरदुर्गाचले ।
यागे पर्वविनिर्णयं गणपतिः श्रीरावलाख्यो मुदा
नानाग्रंथविलोकनाद्विमलधीरेनं समापूरयत् ॥ ॥ ४ ॥

इति श्रीमदग्निहोत्रचातुर्मास्यादियजनसमासादितपुरुषार्थसार्थश्रीरावलहरिसूनुगणपतिरावलकृतो ऽयं पर्वनिर्णयः संपूर्णः॥ संवत् १८०७ विक्रमसंवत्सरे माघमासे कृष्णपक्षे ५ पंचमी स्थिरवासरे समाप्तः ॥ [H. T. COLEBROOKE.]

1675.

1139b. Foll. 38 (the last but one of which is missing); size $8\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī; six lines in a page.

Another MS. of the same work, apparently copied from the preceding MS.

Dated : संवत् १८४२ मीती जेष्टशुदि ६ वारसोमारके ० [H. T. COLEBROOKE.]

1676.

1843. Foll. 11; size 12 in. by 4 in.; fair, modern Devanāgarī writing; eight lines in a page.

Tithisārasaṃgraha or *Tithinirṇaya*, an abstract of the rules regarding the lunar days appropriate for religious performances.

It begins : अथ तिथिनिर्णयः ।

स्मृत्यर्थसारं हेमाद्रिमाधवनिर्णयामृतं ।
वीक्ष्य निर्णयसिंधुं च स्मृतिदर्पणमादरात् ॥
निर्णयोदन्वतः सारमुक्तोद्धारं करोम्यहं ।
[राघवो विदुषां प्रीत्यै संक्षेपात्तिथिनिर्णयं ॥ Bomb. ed., 1864.]
तत्र तिथिर्द्वेधा । ०

It ends : फाल्गुनकृष्णप्रतिपदि श्वपचं स्पृष्ट्वा स्नायादिति निर्णयसिंधुः । ततो होळाकामंभेन(!) सिंचयेत् । तद्दिने चूतकुसुमप्राशनं च कुर्यात्। इति फाल्गुनः॥ इति संक्षेपेण तिथिसारसंग्रहः समाप्तः ॥ [DR. JOHN TAYLOR.]

Digitized by Microsoft®

1677.

1140. Foll. 42; size 7¾ in. by 3¾ in.; fairly good, modern Devanāgarī writing; nine lines in a page.

Tithinirṇaya-pradīpa (or *saṃkshepa*), a similar work, by *Bhaṭṭojidīkshita*, son of *Lakshmīdhara Sūri*.

It begins: चैत्रशुक्लप्रतिपदि वत्सरारंभः। तत्र औदयिकी तिथिर्ग्राह्या।

> चैत्रमासि जग्रद् (? l. जगद्) ब्रह्मा ससर्ज प्रथमे ऽहनि।
> शुक्लपक्षे समग्रं तु तथा (l. तदा) सूर्योदये सति॥

इति हेमाद्रौ ब्रह्मोक्तेः॥

> दिनद्वये ऽपि तद्व्याप्तौ अव्याप्तौ वा पूर्वैव [वा]।
> वत्सरादौ वसंतादौ बलिराज्ये तथैव च।
> पूर्वविधैव कर्तव्या प्रतिपत्सर्वदा बुधैः॥

इति गोविंदार्णवे वृद्धवसिष्ठोक्तेः। °

It ends: इति होलिकानिर्णयः॥ इति ° तिथिनिर्णयप्रदीपः समाप्तिमगमत्॥

See Weber, Cat. Berl., no. 1176. To the authorities there mentioned may be added: *Anantabhaṭṭa, Kālādarśa, Tristhalīsetu, Dhanvantarinighaṇṭu, Rāmārcanacandrikā, Smṛiticandrikā.*

See also Notices, IV., p. 264.

[H. T. COLEBROOKE.]

1678.

1052b. Foll. 14; size 16¼ in. by 3¾ in. (folded to half the length); modern Bengalī handwriting; seven lines in a page.

Tithisvarūpa, or *Sarvatithisvarūpa*, a manual of feasts and fasts to be observed on the several days of the fortnight; by *Sureśvara*.

It begins:

> नत्वा गुरूणां चरणं निधाय हृदीश्वरं सर्वशुभैकहेतुं।
> बुधप्रमोदाय सुरेश्वरेण वितन्यते सर्वतिथिस्वरूपं॥

अथ तिथिव्यवस्था। तत्र सर्वकर्मणि मुहूर्तान्यूनकालव्यापिनी तिथिर्योग्या कृष्णजन्माष्टम्यादौ तु मुहूर्तन्यूनकालो ऽग्राह्यः। तादृशकालबोधकवचनात्। एवं षष्टिदण्डात्मिकायां। परनिष्क्रान्ता च योग्या। °

Fol. 2*a*: अथ प्रतिपत् °॥ अथ द्वितीया। सा च शुक्ला परयुता कृष्णा प्रतिपद्युता ग्राह्या। आषाढशुक्लद्वितीयायां रथयात्रा पुष्याभावे ऽपि कार्या। तद्योगे फलातिशयः। तेन पुष्यादरेण न पूर्वेद्युः °

It ends: चातुर्मास्यव्रतस्योदीच्यकृत्पूजादक्षिणादिकं हरेरुत्थानात्परं द्वादश्यामेव दिवा कार्यं द्वादश्योत्तरोत्थाने तु बोधोत्तरं दिवा कार्त्तिक्यामेव तुलासंक्रान्त्यामारम्भपक्षे वृश्चिकसंक्रमणात्परं दिवा करणीयं शयने सत्युत्थानोत्तरपूर्ववद् द्वादश्यां कार्त्तिक्यां वेति॥ इति तिथिस्वरूपं समाप्तं॥

[H. T. COLEBROOKE.]

1679.

84d. Foll. 24; size 10¾ in. by 4¾ in.; indifferent Devanāgarī writing; nine lines in a page.

Sārasaṃgraha, an anonymous treatise on auspicious and unauspicious days for the performance of religious rites.

It begins:

> मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनाम्
> आत्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषां।
> लोकानां प्रलयो भवस्थितिविभुश्चानेकधा यः श्रुतौ
> वाचन्तः (वाचं वः) स ददात्वनेककिरणस्त्रैलोक्यदीपो [रविः॥ १॥
> काष्ठानिमेषैर्नवभिर्द्विकघ्नैस्
> त्रिंशत्कलास्ता दशपंचयुक्ताः।
> कलात्रयीशाद्विमितो मुहूर्तस्
> त्रिंशन्मुहूर्तं द्युनिशं वदंति॥ °

The treatise consists of 881 verses, ending thus: ° [८]७६॥ इति शिवरात्रिचतुर्दशीनिर्णयः। °

> पृथिव्यां यानि पापानि ब्रह्महत्यादिकानि च।
> अन्नमाश्रित्य तिष्ठंति तस्मादन्नं त्यजेन्नरः॥ [८]८०॥
>
> अनुराधा यतिपूज्या विष्णुः पूज्यो गृही सदा।
> रेवती वानप्रस्थेन पूज्या च हरिवासरे॥ [८]८१॥

इति सारसंग्रहः॥ संवत् १७७४ चैत्रवदि ११ सोमे पंप्रामाणिकेश्वरलिखितं °॥

For a MS. copied from the present one, see Aufrecht, Cat. Bodl., no. 668.

[H. T. COLEBROOKE.]

Digitized by Microsoft®

1680.

799. Foll. 142; size $10\frac{1}{2}$ in. by 4 in.; good Devanāgarī writing of A.D. 1604; nine lines in a page.

Samayāloka, a manual of rules regarding the times and seasons for religious observances, compiled—under the patronage of *Durgāvatī*, queen of King *Dalapati*, and mother of *Vīra Sāhi*—by *Padmanābha Miśra Bhaṭṭācārya*, son of *Balabhadra Miśra* and *Vijaya Śrī*.

The work apparently forms the first of seven sections of a general digest of Law, entitled (*Durgāvatī-*) *Prakāśa*.

It begins:

वामांशीभूय रागातिशयवशतया निर्भरं संगतायाः
प्रारंभे तांडवस्य त्रिपुरविजयिनः प्राप्तनृत्योद्यमायाः ।
सद्यःस्विद्यत्कपोलं चलदलकलसद्भालमामुक्तकेश-
प्रोद्वेल्लन्मल्लिमालं क्षपयतु दुरितासंगमंगं भवान्याः॥१॥०

यस्याः पुरः स्फुरति नर्म नृणां दिशंती
सा नर्मदेति तटिनी जगति प्रसिद्धा ।
या दृष्टितो ऽपि जनतामवधूय पापं
भूयः पदे नयति तत्तुहिनांशुमौलेः ॥ १७ ॥ ० १८ ॥

तस्यामविष्णुपृथिवीपतिवाधशास्त्र-
प्रामाण्यतः सकलदेवगणानुमत्या ।
संग्रामसाहिमिषतो द्विषतो निहन्ता
भागो हरेर्धरणिनाथतयाविरास ॥ १९ ॥ ० २५ ॥

तस्माद्बभूव निखिलक्षितिचक्रशक्रो
ऽलर्काधिको वृषदिवाकरतिग्मतेजाः ।
राजा भुजार्जितजयो ऽर्जितराज्यलक्ष्मीर्
मानोन्नतो दलपतिर्दलितारिवर्गः ॥ २६ ॥ ० ३१ ॥

तस्यात्मजो विजयते ऽयमसीमभूमी-
नाथः पृथातनयसाध्यशःकृतार्थः ।
आजानुबाहुरजनीकरकांतवक्त्रः
श्रीवीरसाहिनृपतिर्दिननाथतेजाः ॥ ३२ ॥ ० ३७ ॥

अस्रा श्रीवीरसाहेर्दलपतिनृपतिप्रेयसी कल्पवल्लिः
क्षोण्यामन्या वदान्यावधिरमलगुणा भाति दुर्गावतीह ।
या कन्या शालिवाहक्षितिरमणमणेर्या च मुख्या स्नुषासु
श्रीमत्संग्रामसाहेरपि च कविजनानन्दभूः पार्वतीव ॥
[३८ ॥ ० ४५ ॥

संग्रामविजयं वीक्ष्य यस्या दलपतिस्त्रियाः ।
मन्यंते मनुजास्तथ्यं दुर्गायाः समरे जयं ॥ ४६ ॥

तस्या निदेशेन विशेषभाजा श्रीपद्मनाभो बलभद्रसूनुः ।
निबंद्धृनिःपूर्वविवेचितेषु करोति धर्मेषु विवेचनानि ॥
दुर्गावत्या निदेशेन विजयश्रीतनूद्भवः । [४७ ॥
लिखितानि निबंद्धृणां विचारयति सादरः ॥ ४८ ॥
दुर्गावत्याः प्रकाशेन दूरीकृततमस्ततौ ।
विचरंतु जना धर्ममार्गे विगतमत्सराः ॥ ४९ ॥ ० ५२ ॥
आदिमः समयस्यायं व्रतस्योक्तस्ततः परः ।
आचारस्य ततः पश्चात् व्यवहारस्य तत्परः ॥ ५३ ॥
दानस्य पंचमः प्रोक्तः शुद्धेः षष्ठः प्रकीर्तितः ।
आराधनाय जगतामधीशस्य तदुत्तरः ॥ ५४ ॥
इत्यं श्रीपद्मनाभेन भट्टाचार्येण निर्मिते ।
दुर्गावत्याः प्रकाशे ऽस्मिन् समालोकाः प्रकीर्तिताः ॥५५॥

धर्मो विवेचितो ऽस्माभिर्विचार्याचार्यनिर्मितोः ।
दुर्गावत्या लसत्कीर्त्याः कल्याणानि प्रयच्छतु ॥ ५६ ॥

तत्र धर्मे विधिः साक्षान्मान स च विधिः क्वचिदपूर्वः यथा ० तत्रादौ समयो निरूप्यते fol. 10*a*; अथ मलमासनिर्णयः 14*a*; अथ संक्रांतिनिर्णयः 24*a*; अथ ग्रहनिर्णयः 29*b*; अथ युगादिनिर्णयः 34*b*; अथ तिथयो निर्णीयन्ते 36*a*; अथ नक्तव्रतनिर्णयः 50*a*; अथायाचितनिर्णयः 52*a*; अथ दानहोमादिदैवकालनिर्णयः 53*a*; अथ प्रतिपन्निर्णयः 54*b*; अथ द्वितीयानिर्णयः 63*b*, etc.; इति चतुर्दशीनिर्णयः ॥ अथ पौर्णमासीनिर्णयः 130*a*; अथोत्सर्गनिर्णयः 137*a*; इति होलिकानिर्णयः 138*b*; इति पौर्णमासीनिर्णयः॥ अथामावास्यनिर्णयः 139*b*; अथ नक्षत्रनिर्णयः 140*b*.

Colophon: इति श्रीमन्निरवद्यगद्यहृद्य ० महाराजाधिराजदलपतिप्रेयस्याः श्रीदुर्गावत्याः प्रकाशत्रिदशसिंधुबंधुरवाग्विलासोदयदूरीकृतनिःशेषदेशप्रभवविद्यार्थिस्तोमाज्ञानपंकपरमप्रतिष्ठितसन्मिश्रश्रीबलभद्रात्मजविजयश्रीगर्भसंभवसकलशास्त्रारविंदप्रद्योतनभट्टाचार्यमिश्रश्रीपद्मनाभकृते समय[ा]लोके प्रथमः प्रचारः पूर्णः ॥ संवत् १६६१ वर्षे फाल्गुनसुदि ७ गुरुवासरे पातिसाहकेब्बरभुंजमाने तस्मिन्काले वर्तमाने पोथी लिपाइ श्रीपोजापरमानंदसुपुत्रश्रीपोजामनोहरदास ॥ लिपापितं ठा श्रीपाडेनरायणदास । तापुत्र ठा श्रीपाडे राघौदास ॥ कायस्थ श्रीगौरकरलग्रामकोशालालिखी ॥

Whilst the colophon seems to indicate that this is only the first portion of the *Samayāloka*,

Digitized by Microsoft®

the colophon of a MS., in Rāj. Mitra's Bikāner Cat., p. 450, containing the same matter, represents it as the complete work.

Besides *Smṛitis* and *Purāṇas*, the following authorities have been met with: *Anantabhaṭṭāḥ*, foll. 55*a*, 120*b*, etc.; *Nirṇayāmṛita*, 55*a*, 69*b*, etc.; *Brahmasiddhānta*, 29*b*; *Madanapārijāta*, 136*b*; *Madanaratna*, 17*b*, 39*b*, etc.; *Mādhavācāryāḥ*, 42*a*, 46*b*, 49*a*, etc.; *Ratnamālā*, 23*a*; *Laghusaṃhitā*, 61*b*; *Viśvarūpanibandha*, 61*b*; *Śivarahasya*, 33*b*; *Śuddhamiśrabheda*, 79*b*; *Śuddhāvikā*(?), 83*b*; *Smṛitisaṃgraha*, 20*b*.

The author wrote his *Vīracampū* in 1578 A.D.; see Peterson, Report, I., p. 101.

[H. T. Colebrooke.]

1681.

416b. Foll. 21; 4to.; size 11¾ in. by 9 in.; large, thick, modern Devanāgarī handwriting; sixteen lines in a page.

Samayanirṇayoddyota, a calendar of religious feasts and fasts, being the first of seven sections (*uddyota*) which make up the *Madanaratnapradīpa*, a general digest of civil and sacred law, by *Madana Siṃha Deva*, son of *Śakti Siṃha*. Incomplete. It begins:

आदायेंदुकलां शंभोर्मुखे विसधिया क्षिपन् ।
द्वितीयरदनीकुर्वन् पातु बालो गजाननः ॥ १ ॥
उन्निद्रन्यमुनानिकुंजभवने सोच्छ्वासमभ्युन्नतः
शृङ्गारं परिभावयन्सखितयानीतश्च कुंठस्थलीं ।
इत्थं भगवानिव प्रियधुराधारीकृतो राधया
गोविंदस्य जगद्विमोहनरसो वंशीरवः पातु वः ॥ २ ॥
जामातुर्न पिता पितामहकथां कन्यापि न स्वीकरो-
त्येतस्मिन्गहने कथं नु भविता कन्याप्रदानं विधिः ।
इत्थं जल्पति नारदे सकुतुकं यस्तुस्थितेर्मौनिनोर्
गौरीशंकरयोस्तयोरवतु वो व्रीडाविनम्रं शिरः ॥ ३ ॥
तरुणतिमिरहन्ता पद्मिनीप्रेमरन्ता
गगनवनविहारी भक्तसाम्राज्यकारी ।
सुरविरचितसेवः स्वर्भुजामेकदेवः
स जयति दिननाथः सिद्धसङ्गीतगाथः ॥ ४ ॥
इष्टारंभविभावनीयचरणश्चिंतामिसन्नारणस्
त्रैलोक्याभयदानचित्रविभवस्तुद्य(?घ्य)द्विपत्संभवः ।
उद्यद्विघ्नतमोविघाततरणिर्भक्तेषु चिंतामणिः
पायाद्वः सुकृतैककर्मठमतिर्देवो गणानां पतिः ॥ ५ ॥
आस्ते देशः प्रशस्तद्विजवरललिताचारचिन्तानितांता-
राध्योऽवाध्यो विपद्यक्षितिपतिनिकरैर्निर्भरैः सङ्करेऽपि ।
दिल्लीनामा निकामाहववनवमहिमोद्दण्डद्दोर्दण्डदीप्यत्-
प्रारंभध्वस्तदंभप्रतिवलयरिपद्वीरनीराजितश्रीः ॥ ६ ॥
चत्वारो यत्र वर्णाः श्रुतिनियतविधेः स्वस्ववृत्तिं[भजन्ति]
यत्राचारो विशालो यदवधिविरता वीरवार्त्ता भवंति ।
दानं यत्राभिमानं हरति सुरतरो क्षत्रियाणां वराणां
सो ऽयं रम्यप्रदेशो जगति विजयते को ऽपि दिल्लीति
[देशः ॥ ७ ॥

तत्रा Here the MS. breaks off, leaving a blank of more than two pages, and resuming at *śloka* 22.

यो वेदाखिलवेदवोधितविधानाचारपारङ्गमो
येनाद्यापि च संस्कृतेरवधिना संध्या न वंध्या कृता ।
यो देवद्विजजातकर्मचितसद्धर्मक्रियातत्परः
सोऽयं श्रीमदनो नृपो विजयते विद्यावसिष्ठद्युतिः॥ २२॥
तेनाहूय मनीषिमंडनमणिं सन्मिश्ररत्नाकरं
गोपीनाथमनुत्तमं च सुधियं श्रीविश्वनाथं तथा ।
मुग्धं पंडितमुन्नतद्युतिमतिं भट्टं च गंगाधरं
राज्ञा शक्तनसूनुना सुकृतिना ग्रंथो ऽयमारभ्यते ॥ २३ ॥
अमुष्य परिनिर्मितान्मदनरत्नदीपादुधा(? *r.* धा)
विधाय मतिमंदतातिमिरजातघातक्रियां ।
श्रुतिस्मृतिविबोधिते विहितनिंदिते कर्मणी
निरीक्ष्य नृपतेः कृतः कलयतेह पुण्याशिषः ॥ २४ ॥
उर्वी यावदहीन्द्रदंडशिखरासीनातपत्रा[⏑]ते
यावन्नत्कृतकोचकुंभमुपमापुष्टाति(? ष्णाति) हेमाचलः ।
यावद्बालमृगांकमंजुलकलामौलौ मृडानीपतेर्
उद्योतैर्मदनप्रदीपमहिमा तावत्समुज्जृंभताम् ॥ २५ ॥
उद्योताः समयाचारव्यवहारविवेचकाः ।
प्रायश्चित्तस्य दानस्य शुद्धिशान्त्योश्च सप्तमे ॥ २६ ॥
तत्रादौ राजसिंहेन सर्वधर्मो ऽयं योगतः ।
तन्यते मदनेंद्रेण समयस्य विनिर्णयः ॥ २७ ॥ ०
सुखावगमसिद्ध्यर्थमस्मिन्समयनिर्णये ।
उद्योते विहिता येऽर्थाः क्रमस्तेषां निरूप्यते ॥ २८ ॥

Digitized by Microsoft ®

तत्रादौ समये मानं तत्स्वरूपमथोदितं ।
कर्मांगत्वमथास्योक्तं ततो वत्सरनिर्णयः ॥
अयनस्य तथर्तोश्च मासस्याथ विनिर्णयः ।
निर्णयो मलमासस्य तत्र वर्ज्यादिनिर्णयः ॥
सामान्यतः सर्वतिथिनिर्णयश्च ततः कृतः ।
एकभक्तस्य भक्तस्य तथैवायाचितस्य च ॥
तथैव दानहोमादेः कालस्य च विनिर्णयः ।
तत्तत्तिथ्युपवासस्य तत्तत्तिथिविनिर्णये ॥

etc., 77 more *ślokas*; the two last of which are (fol. 7*b*):

ततः कालविशेषेषु यद्वर्ज्यं तत्प्रपंचितं ।
निरूपितं ततः सम्यग्वर्जनीयं कलौ युगे ॥
एतावंतः क्रमेणार्था यथाशास्त्रं प्रपंचिताः ।
अस्मिन्प्रथम उद्योते समयस्य विनिर्णये ॥

इति श्रीकोदण्ड(श्रीकोदण्ड in some colophons)परशुरामेत्यादिविविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे समयनिर्णयोद्योते ऽनुक्रमणिका ॥

अथ निर्णयसमयसद्भावे किं प्रमाणं किं च तस्य स्वरूपं । उच्यते । श्रुतिस्मृतिपुराणानि तत्र प्रमाणानि । तत्रापि । °

The MS. ends with the disquisition on the intercalary month (*malamāsa*), and thus contains only a small portion of the treatise.

The complete digest thus consists of the following sections (*uddyota*): 1. *Samayanirṇaya;* 2. *Ācāra;* 3. *Vyavahāra;* 4. *Prāyaścitta;* 5. *Dāna;* 6. *Śuddhi;* 7. *Śānty-uddyota.*

The *Madanaratna*(*pradīpa*) was largely used by *Nīlakaṇṭha* for his *Bhagavantabhāskara;* see West and Bühler, Digest, 3rd ed., I., p. 20.

[H. T. Colebrooke.]

1682.

416a. Foll. 20; 4tô.; size 11¾ in. by 9 in.; European paper; fairly written, in Devanāgarī; fifteen lines in a page.

Samayaprakāśa, being the section on the times and seasons suitable for religious ceremonies, of a general Digest of Sacred and Civil Law, called *Kīrtiprakāśa*, by *Vishṇuśarman* (*svarāṭ samrāṭ agnicit*), minister of worship to King *Kīrtisiṃha,* son of *Kanakasiṃha,* and descendant of *Jaitrasiṃha,* of the *Gaura-vaṃśa.* The MS. contains only a small portion of this section. There are many lacunæ.

The MS. begins: अथ सर्वांगकर्मणां मुख्यांगरूपः कालो निर्णीयते ॥ तत्र केचित्प्रत्यवतिष्ठंते नित्यत्वव्यापकत्वाभ्यां प्राप्तत्वादेव कालस्य निर्णयो न संभवति। निर्णयो नाम नानाविरुद्धविधायकवाक्यानां व्यवस्थापनेन सिद्धो ऽर्थ उच्यते । °

इति कालस्य निर्णेयत्वविचारः fol. 7*b*; इत्यहोरात्रभेदाः 9*b*; इति मासस्वरूपं 10*b*; इति मासविनियोगाः 12*a*; इत्यृतवः 14*a*; इत्ययननिर्णयः 15*a*.

इति श्रीमद्गौरवंशावतंसमहारायश्रीजैत्रसिंहकुलतिलकमहारायश्रीकनकसिंहात्मजकोदंडपरशुराममानोन्नतमहारायश्रीकीर्त्तिसिंहप्रयुक्तस्वराट्संम्राडग्निचित्स्थपतिमहायाज्ञिकश्रीविष्णुशर्म्मविरचिते कीर्त्तिप्रकाशे निबंधराजे समयप्रकाशे क[ाल]स्य निर्णेयत्वमहोरात्रमासर्त्वयनसंवत्सरनिर्णयः ॥ १ ॥

अथ मासशुद्ध्यनुरोधेन प्रसंगान्मलमासो निर्णीयते fol. 16*b*.

The MS. breaks off abruptly in the middle of this chapter.

Among the authorities quoted in this fragment may be mentioned: *Maṇḍanamiśra,* fol. 7*a*; *Trikāṇḍamaṇḍana,* fol. 12*a*; *Jyotir-Gārgya,* fol. 11*a*; *Uttara-Saura,* fol. 16*a*.

[H. T. Colebrooke.]

1683.

18a. Foll. 68; size 9½ in. by 4 in.; fairly written, in Devanāgarī; ten lines in a page.

Samayapradīpa, a treatise on the proper time for the performance of *vratas,* or voluntary acts of ceremonial observance, in three chapters, by *Śrīdatta.*

It begins:

श्रेयः समादिशतु सालसपक्ष्मपाते
निद्राजिते अपि दृशौ भृशमुन्नमय्य ।
संवाह्यमानचरणांबुजजातहर्षो
लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥ १ ॥

Digitized by Microsoft®

निर्वंधेषु निवद्धानि वचनानि विचिन्वता ।
श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते ॥ २ ॥

तत्र पूर्वेदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेकवारं भुक्त्वा दंतान् संशोध्य व्रतदिने प्रातः स्नात्वा सूर्योदये व्रतं गृह्णीयात् ॥ तत्र प्रयोगः । अद्य सूर्यवारेत्यादिना प्रकारेण व्रतोपयुक्तं कालविशेषं निर्दिश्य भगवन्सूर्ये भगवत्यो देवताः उपवासं नक्तमयाचितं वाहं करिष्ये इत्यभिधाय संकल्पं कुर्यात् । अनेकाहसाध्ये व्रते अद्यस्थाने अद्यादीति प्रयोगः ॥ तत्र देवलः ।

अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः ।
सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥

प्रातर्व्रतमाचरेदिति संबंधः । प्रधानपदार्थान्वयस्याभिहितत्वात् ॥ अभुक्त्वाहारमित्यर्थात्पूर्वेदिने एकवचनानुरोधात्तु एकभक्तमायाति । ०

Ch. I., *Samayapariccheda* ends fol. 37*b*; II., *Saṃvatsarakṛityap.*, fol. 63*a*; III., *Prakīrṇakapariccheda*, ends:

गतिमिष्टां यथाकामं प्रददाति त्रिविक्रमः ।
विघ्नो न जायते तस्य यजेद्यस्तु विनायकं ॥

अपहंतु तमः सकलं सम्यक्क्रमप्रचारमपनयतु । [नूनं ॥
समयप्रदीप एष मेतितिथिमेतु (l. स्थितिमेतु) सतां गणे

इति श्रीमहामहोपाध्यायश्रीश्रीदत्तकृते समयप्रदीपे प्रकीर्णकपरिच्छेदस्तृतीयः समाप्तः ॥ संवत् १७७९ ० ॥

Besides *Purāṇas* and *Smṛitis*—incl. *Gauḍasmṛiti*, viz.:

उपवासे तथा श्राद्धे न खादे(?r. कुर्याद्) दंतधावनं ।
दंतानां काष्ठसंयोगो दहत्या सप्तमं कुलं ॥ fol. 7*b*;

सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
तस्यां स्नानं च दानं च महापातकनाशनं ॥ fol. 59*a*.

the author quotes *Hari*, fol. 64*b* [अत्र हरिर्मेषादिच्छिन्नस्यानिमित्तत्वमाह। ग्रासावच्छिन्नकालस्य गणितप्रमितत्वात्। दर्शनपदस्य तदुपलक्षकत्वात्। न च दर्शनविषयत्वमेव प्रयोजकं कर्मकाले तदभावात्। ०]; *Harihara*, fol. 67*a* [हरिहरस्तु पौर्णमास्यमावास्ययोर्युगादित्वे विकल्पमुक्तवान्। केचित्तु राजाद्यवाक्यबलात् ।]

For other MSS. of the work, see Rāj. Mitra, Notices, V., p. 259; Bikāner Cat., p. 452; for a different work of the same title, by *Harihara Bhaṭṭācārya* (the father of *Raghunandana*), Notices, III., p. 55. [H. T. COLEBROOKE.]

1684.

1889. Foll. 312; size 11½ in. by 5 in.; on the whole fairly written, in Devanāgarī, about the middle of last century; eleven lines in a page.

Vratārka, a favourite Digest of matters connected with vows or voluntary rites of penance, compiled by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*, and grandson of *Bhaṭṭa Śāṅkara*.

It begins:

दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

यो जाग्रद्विजकरमंदराद्रिमंथैर्
निर्मथ्य प्रथिततरांधकारसिंधुं ।
लोकेभ्यो वितरति सत्प्रकाशरत्नं
तं वंदे वनजवनीविनोदबंधुं ॥ २ ॥

नामं नामं प्रणामोद्गुरुभरतचलल्लोचनालिंगनेन
भ्राम्यद्भृंगाब्जभूरिभ्रमजननपरौ जानकीवल्लभांघ्री ।
तातश्रीनीलकंठामलपदकृपया लब्धशास्त्रार्थतत्त्वः
कुर्वे श्रीशंकरोऽहं सहृदयप्रीतये सद्व्रतार्कं ॥ ३ ॥

तत्र व्रतारंभकालः ॥ हेमाद्रौ गार्ग्यः । ०

अथ व्रतधर्माः fol. 4*a*; इति ० परिभाषा 19*b*.

अथादौ प्रतिपद्व्रतानि ib.; इति संवत्सरारंभविधिः 22*a*; ० आरोग्यप्रतिपद्व्रतं 22*b*; ० तिलकव्रतं 24*a*; ० श्रीशिवपुराणे बिल्वरोहणे बिल्वरोटकव्रतं 26*a*.

अथ [द्वितीयाव्रतानि। अथ] कार्त्तिकशुक्लद्वितीयाया यमद्वितीया। ib.; इति हेमाद्रौ भविष्ये यमद्वितीयाविधिः 26*b*.

अथ तृतीयाव्रतानि 27*a*; इति मात्स्ये सौभाग्यशयनव्रतं 28*b*; ० हेमाद्रौ स्कांदे अरुंधतीव्रतं 31*b*; ० भविष्योत्तरे अक्षय्यतृतीयाव्रतं 32*b*; ० स्वर्णगौरीव्रतं 35*b*; ० हरितालिकाव्रतं 40*a*; ० बृहद्गौरीव्रतं 42*a*; ० सौभाग्यसुंदरीव्रतं 46*a*.

अथ चतुर्थीव्रतानि ib.; इति स्कांदे संकष्टचतुर्थीव्रतं 49*a*; ० दूर्वागणपतिव्रतं 50*a*; ० सिद्धिविनायकव्रतं 54*a*; ० गौरीचतुर्थीव्रतं 65*b*.

अथ पंचमीव्रतानि 65*b*; ऋषिपंचमीव्रतं 67*b*; ० नागदष्टपंचमीव्रतं 72*b*; उपांगललिताव्रतं । इति ० पंचमीव्रतानि 79*a*.

Digitized by Microsoft®

अथ षष्ठीव्रतानि ib.; इति हेमाद्रौ स्कांदे कपिलाषष्ठीव्रतं 82*b*; ० स्कंदषष्ठीव्रतं ॥ इति ० षष्ठीव्रतानि 83*b*.

अथ सप्तमीव्रतानि ib.; इति हेमाद्रौ भविष्योत्तरे मुक्ताभरणसप्तमीव्रतं 88*b*; ० रथसप्तमीव्रतं 90*b*; ० अचलासप्तमीव्रतं 92*a*; ० पुत्रसप्तमीव्रतं ॥ 92*b*.

अथाष्टमीव्रतानि ib.; इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे बुधाष्टमीव्रतं 97*a*; ० दशाफलव्रतं 99*b*; जन्माष्टमीव्रतपद्धतिः 103*a*; ० जन्माष्टमीव्रतं 111*a*; भविष्योत्तरे ज्येष्ठाव्रतं 113*b*; महालक्ष्मीव्रतं 119*b*; अशोकाष्टमीव्रतं 124*b*.

अथ नवमीव्रतानि ib.; इति स्कंदपुराणे ० रामनवमीव्रतं 132*a*; दुर्गाभक्तितरंगिण्यां महाष्टमीमहानवम्योः पूजा 139*b*.

अथ दशमीव्रतानि ib.; इति भविष्योत्तर आशादशव्रतं 140*b*; ० दशावतारव्रतं 141*b*; इति मदनरत्ने गौपथब्राह्मणे विजयादशमीविधिः 143*a*.

अथैकादशीव्रतानि ib.; इति ० निर्जलैकादशीव्रतं 154*a*; ० शयन्येकादशीव्रतं 155*a*; ० गोपद्मव्रतं 158*a*; ० उत्थापनमहोत्सवविधिः 159*b*; ० हेमाद्रौ भीष्मपंचकं 161*b*; ० वैतरणीव्रतं 162*b*; कृष्णैकादशीव्रतं 164*a*; ० उभयैकादशीव्रतं 166*b*.

अथ द्वादशीव्रतानि ib.; इति ० हे ० भ ० श्रवणद्वादशीव्रतं 172*a*; ० भ ० वामनजयंतीव्रतं 174*b*; ० सुरूपद्वादशीव्रतं 177*a*.

अथ त्रयोदशीव्रतानि ib.; इति भ ० गोत्रिरात्रव्रतं 185*a*; ० भ ० अशोकत्रिरात्रव्रतं 187*b*; ० शनिप्रदोषव्रतं 191*b*; भ ० अनंगत्रयोदशीव्रतं 194*a*.

अथ चतुर्दशीव्रतानि ib.; इति हेमाद्रौ नृसिंहपुराणे नृसिंहचतुर्दशीव्रतं 197*a*; ० अनंतव्रतं 207*b*; इति भ ० कदलीव्रतं 210*b*; वैकुंठचतुर्दशी 211*a*; इति श्रीलिंगपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं 222*b*; ० स्कांदे शिवरात्र्युद्यापनं 224*a*.

० स्कांदे (ज्येष्ठपूर्णिमायां) सोद्यापनं सावित्रीव्रतं 233*a*; ० नारदीये गोपद्मव्रतं 235*a*; ० वाराहे कोकिलाव्रतं 241*b*; ० नारदीये कोकिलाव्रतोद्यापनं 242*b*; ० रक्षाबंधनविधिः 243*b*; ० शिवरहस्ये उमामहेश्वरव्रतं 249*b*; ० कोजागरव्रतं 253*a*; ० स्कांदोक्तमर्धोदयव्रतं 255*a*; इति भविष्ये सोद्यापनं सोमवत्यमावास्याव्रतं ॥ इति ० अमावास्यव्रतानि ॥ 260*a*.

अथ चातुर्मास्यादिव्रतानि 260*a*; इति श्रीभविष्योत्तरपुराणे चरलक्ष्मीव्रतं 265*a*; ० स्कांदे दानाफलव्रतं 267*a*; ० भविष्योत्तरे धारणपारणव्रतं 268*b*; ० विष्णुरहस्योक्तं मासोपवासव्रतं 274*a*; ० देवीपुराणे मलमासव्रतं 278*b*; इति मासव्रतानि 279*a*.

अथ वारव्रतानि 279*a*; इति सौरधर्मोक्तं सूर्यव्रतं 281*a*; ० स्कांदे आदित्यव्रतं 282*b*; ० स्कांदे सोमवारव्रतं 285*a*; ० हेमाद्रौ पाद्मे भौमवारव्रतं 288*b*; ० पद्मपुराणोक्तं मंगलव्रतं ॥ इति ० वासरव्रतानि ॥ 289*b*.

अथ संक्रांतिव्रतानि हेमाद्रौ स्कांदे। ib.; इति धान्यसंक्रांतिव्रतं 290*b*; लवणसंक्रांतिव्रतं ib.; रूपसं०, तेजसं० 291*a*; सौभाग्यसं०, तांबूलसं०, ० मनोरथसं० 291*b*; आयुःसं० 292*b*; ० संक्रांत्युद्यापनं 293*a*; इति धृतकंबलविधा 293*a*;

अथ व्यतिपातव्रतं वाराहे। ib.; इति व्यतीपातव्रतं 297*b*; इति लक्षपूजाविधिः 299*b*; ० भविष्योत्तरे ० लक्षनमस्कारविधा 301*a*; ० वायुपुराणे लक्षवर्त्तिकथा 304*b*; ० अगस्त्यार्घविधिः 306*b*; ० सोद्यापनं अश्वत्थव्रतं 308*a*; ० पार्थिवलिंगोद्यापनं 309*b*; इति व्रतार्के तुलसीविवाहः ॥ इति श्रीमीमांसापारावारपारीणभट्टशंकरसूरिसूनुभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के समाप्तिमगमत् ॥ 310*a*.

Then follows an *anukramaṇikā* in *ślokas*, beginning:

व्रतार्के विततग्रंथे सुग्रहार्थैविपश्चितं।
बहून्प्रपंचितानर्थान्दर्शयामि यथाक्रमं ॥ ०

It ends:

सनिर्णयानि यानीह कथितानि व्रतानि तु।
तेषां द्रुतामये भट्टशंकरो ऽनुक्रमं व्यधात् ॥

इति व्रतार्कस्यानुक्रमणीका नाम समाप्तव्रतार्कः ॥

The author wrote his *Kuṇḍoddyotadarśana* (or *Kuṇḍabhāskara*) in 1671 A.D. For the family tree see V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxxvi. [Dr. John Taylor.]

1685, 1686.

1630, 1631. Foll. 1–215, 216–426; size $9\frac{3}{4}$ in. by 4 in.; good Devanāgarī writing of 1796 A.D.; nine lines in a page.

Vratārka.

Colophon: इति श्रीमीमांसकभट्टश्रीमन्नीलकंठात्मजभट्टश्रीमच्छंकरकृतौ व्रतार्के अनुक्रमणिका समाप्तमगमत् ॥

[H. T. Colebrooke.]

Digitized by Microsoft®

1687, 1688.

2360, 2361. Foll. 1–224, 225–452; size 10¾ in. by 5 in.; good Devanāgarī writing of the latter part of the last century; nine lines in a page.

The same work. [GAIKAWAR.]

1689, 1690.

2784, 2785. Foll. 1–177, 178–343; indifferent Devanāgarī writing of the latter part of last century; ten lines in a page.

The same work.

[COLL. OF FORT WILLIAM.]

1691.

2485. Foll. 397 (253–263 of which are missing); size 11 in. by 4¾ in.; Devanāgarī character, legibly written in 1705 A.D.; ten lines in a page.

Another copy of *Bhaṭṭa Śaṅkara's Vratārka.*

For other MSS. see Weber, Cat. Berl. nos. 1178–80; Rāj. Mitra, Notices, IX., p. 303; Bikāner Cat., p. 499; Burnell, Tanjore MSS., p. 138*b*. [?]

1692, 1693.

2196, 2197. Foll. 1–344, 345–667; size 11 in. by 5 in.; well written, in Devanāgarī, towards the end of the last century; ten lines in a page.

न विशेषः क्वचिदस्ति सज्जनानां ।
इयतैव जितं मया यदेषाम्
अतिलोकेषु गुणेषु पक्षपातः ॥ २ ॥

इति श्रीपंडितपारिजातकभट्टारमल्लत्यादिविरुदराजीविराजमानश्रीमदनपालपुत्रस्य मांधातुर्निबंधे महार्णवाभिधाने कर्मविपाके ग्रहप्रकरणं समाप्तं ॥ समाप्तश्च महार्णवनामनिबंधः ॥

[H. T. Colebrooke.]

1764.

2152. Foll. 404; size 11 in. by 5 in.; good, large Devanāgarī writing, of about 1750 A.D.; ten lines in a page.

The same work [B].

This copy ends, foll. 395*b*-396*a*: इति मेषग्रहहरं॥

मतिर्येषां ° ॥ १ ॥

महार्णवाख्ये महिते प्रबंधे
मांधातृनाम्नो मदनात्मजस्य ।
सत्कर्मरत्नावलिभृद्य(!) चत्वा-
रिंशस्तरंगो ऽयमगादगाधः ॥ २ ॥

समाप्तो ऽयं महार्णवनामा निबंधः ॥

Then follow eight leaves, containing a list of contents, written in triple columns.

[Gaikawar.]

1765.

3251. Foll. 410; size $7\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; written, in the Śārada character, on birch bark, by two different hands; 15–17 lines in a page.

The same work [C].

The first leaf is missing, the second leaf beginning with the last *pāda* of verse 4 (प्रकृष्टचल °) of the introduction, viz. महः किमपि मोहनं कपटशैशवं -- this leaf, as well as the next, is however sadly injured through the bark having peeled off.

A facsimile of one of the pages of this MS. has been published in the Palæographical Society's Oriental Series, part IV., with a descriptive account by Dr. Haas. The writing material used being of a very delicate nature, the MS. has to be handled with extreme care. It is wrapped in a plain case of limp leather, stamped with an ornamental edging.

The MS. ends on fol. 401*a* with the same two *ślokas* as MS. A, but the second is slightly defective; whilst of the colophon the copyist only wrote इति श्रीपंडितः; which is followed by an *anukramaṇikā* to the work.

Several lacunæ occur in the body of the work, esp. one extending from fol. 149*b* to 160*a*.

[G. Bühler.]

1766.

201. Foll. 99; size $10\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly good Devanāgarī writing, of 1639 A.D.; ten lines in a page.

Karmavipākasāra, a digest of directions for the expiation and removal of the evils resulting from sins in a former existence, especially maladies of all kinds, by *Dinakara*, son of *Rāmakṛishṇa* and *Umā*, and grandson of *Nārāyaṇa Bhaṭṭa*. It begins:

प्रासूतोमा प्रसूयै तनयमिह पिता रामकृष्णश्च सो ऽयं
प्रायश्चित्तेषु सारं दिनकरविबुधः शांतिकानां च सारं ।

Digitized by Microsoft®

कृत्वाथो कर्मपाकेष्वखिलबुधमुदे सारमेतं तनोमि
श्रीरामांघ्रिप्रभावादयमपि भजतां ख्यातिमुच्चैर्धरायां॥१॥
ग्रंथे कर्मविपाकीये ये मयार्था निरूपिताः ।
तेषामादौ सुबोधाय क्रियते ऽनुक्रमः स्फुटः ॥ २ ॥
प्रारब्धनाशो दानादेः प्रायश्चित्तैः समुच्चयः ।
रोगाणां तारतम्येन द्वादशाब्दतदर्धकं ॥ ०

This *anukramaṇikā* consists of 50 *ślokas*, ending thus:

दारिद्र्यहारि धनदं मूर्तिदानं ततः परं ।
श्रीसूक्तस्य विधिस्तद्वद् रत्नदानं समृद्धिदं ॥

नन्वनिष्टहरत्वाविशेषाच्छांतिककर्मविपाकयोः को भेदः । उच्यते। भाव्यनिवारकर्म विपाकत्वं। कर्मविपाकशब्दश्च कर्मणां विशेषेण पचनमिति व्युत्पत्त्या व्याध्यादिषु मुख्यः। तद्विपाका जात्यायुर्भोगा इति पातंजलसूत्रात्। तन्निवर्तककर्मसु लाक्षणिकः।

It ends: इति श्रीसूक्तं हेमाद्रौ संवर्तः ॥

समुद्रजानि रत्नानि नरो विगतकल्मषः ।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियं ॥
श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः
क्षोणीपंडितमानखंडनजयी श्रीरामकृष्णस्ततः ।
मीमांसानयतत्त्ववित् दिनकरस्तस्मादभूत्तत्कृतिः
सेयं कर्मविपाकसारविषया रामाय दद्यान्मुदं ॥

इति श्रीमद्रामेश्वरसूरिसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णसुतदिनकरकृतः कर्मविपाकसारः समाप्तः ॥ संवत् १६९६ समये वैशाखवदी त्रैढशीवरशुभदी लिखितं क्षत्रपतीब्राह्मण कासिके वाशी(!) ॥

See Rāj. Mitra, Notices, VII., p. 303. A different work of the same title, Bikāner Cat., p. 405. [H. T. Colebrooke.]

1767.

2652. Foll. 250 (wanting foll. 1, 8, 31, 41, 43, 161, 163, 191, 218, 227–34; double nos. 99, 118, 144); size 10 in. by 6 in.; careless Devanāgarī writing, of 1533 A.D.; nine lines in a page.

Sāragrāha-Karmavipāka, a similar digest, by one who calls himself the eldest son of *Kāhnaḍa*, or *Kānhaḍa* (i.e. *Krishṇa*), and grandson of *Padmanābha*.

The work seems to have been compiled, in 1384 A.D., under the patronage of *Karṇasiṃha*, minister to King *Durgasiṃha* of *śrī-Nanda-padra*(?), son of *Maṅgala Bhūpāla*.

The present MS. commences in the fourth verse of the introduction; but the beginning, as well as some of the defective verses further on, are here supplied [in brackets] from a collation of four Bombay MSS. kindly sent by Professor R. G. Bhandarkar:

[यो देवः किल पूर्वसर्गसमये संस्मर्यते ब्रह्मणा
पश्चादौ सुरसिद्धदैत्यमनुजैरभ्यर्च्यते कर्मणा ।
विघ्नव्रातविघातजातकठिनं कुंठं कुठारं करे
बिभ्राणं तमुपास्महे गजमुखं सिद्धेः परं कारणं ॥ १ ॥
वंदे विश्वनुतां पितामहसुतां वाग्देवतामेव तां
यस्याः पुण्यपदप्रसाददलिताशेषोग्रजाड्यो जनः ।
उद्यत्पार्वणचंद्रसांद्रितसुधापाथोधिवीचिच्छटा-
निर्णिक्ताननवर्णवाक्यनिकरैर्विद्वत्सु संदीव्यति ॥ २ ॥
तमादिदेवं जगतामधीशं
चतुर्मुखं ध्यानजुषं प्रपद्ये ।
चराचरं यत्स्मरणाद्बभूव
विद्यास्तथाष्टादश यन्मुखेभ्यः ॥ ३ ॥
विश्वत्रातारमीशं दलितदनुसुतं मुक्तिदं भक्तिभाजां
विष्वग्रूपं विशुद्धं विबुधजनघनप्रीतिदं योगिगम्यं ।
विष्णुं कालग्रसिष्णुं करकहितग]दाशंखचक्राब्जचापं
पापं विद्रावयंतं भवजभयहरं ब्रह्ममूर्तं प्रपद्ये ॥ ४ ॥
देवं सुधाकरकलाकलितोत्तमांगं
त्र्यक्षं त्रिशूलधरमद्रिसुतावृतांगं ।
कोपप्रसादमतिवर्जितमुग्रवीर्यं
वंदे सुरर्षिगणं सिद्धतनुं वृषांकं ॥ ५ ॥
अथ ॥ दृष्टं यदत्र तत्तस्मान्नीत्वा सारं हि शास्त्रतः ।
ग्रंथकर्तुरथो व्यक्तिः प्रोच्यते परमार्थतः ॥ ६ ॥
[राजा] यत्र सुरे(l. पुरे) सुरेश्वरसमः श्रीदुर्गसिंहो महान्
श्रद्धा यस्य तनोः पदे च महिषी धन्यांबिका राजते*।
[यत्साचिव्य]धुरां परां कलयति श्रीकर्णकंठीरवः
कस्तद्वर्णयितुं क्षमः क्षितितले श्रीनंदपुत्रो(पद्रं Bo.)
[तस्मिन् ॥ [बुधः ॥ ७ ॥

* रापते MS. In the only Bomb. MS. which has this *śloka*, this *pāda* reads thus: अर्धांगे ननु यस्य पट्टमहिषी-यांबिका राजते ।

Digitized by Microsoft®

येनादौ] जगदीश्वरेण हिभना(जनता Bo.) मर्यादया
[स्थापिता
ये दायेन समुद्धृतावनिभृता धर्मद्रुहो नाशिताः ।
सोहं(l.ऽयं) संप्रति दुर्गसिंहनृपते(ति Bo.)र्गोत्रावतीर्णो-
[शतस्(ऽतस् MS.)
तत्तत्सर्वमिदं करोति यदहो नान्येन निष्पद्यते ॥ ८ ॥

तस्मिन् राज्ये
वेदव्यास इव प्रपंचचतुरस्तच्छिष्यतां नाटयन्
आसीद्विश्वपुराणपाठनिरतः स्वाचारवान् शुद्धधीः ।
विख्यातो भुवि चित्रकूट इति वै यो नागरज्ञातिषु
प्रज्ञागर्वितवाचकेषु धिषणः श्रीपद्मनाभाभिधः ॥ ९ ॥
तस्यात्मजः काह्णडदेवनाम्ना(l. नामा)
व्यासः प्रयासैकमतिः सुपुण्यै[: or ण्ये] ।
गयाप्रयागादि विगाह्य तीर्था-
न्यनेकशोंकं(l. गं) विमलीचकार ॥ १० ॥
[य]स्त्वगण्यकृतपुण्यसंचयै[रु]द्दधार निजपूर्वपूरुषान् ।
उद्यमै[क]निधिरुन्नमात्मधीर्ज्ञातिमंडनमिहावभासते॥११॥
तस्य वश्यमनसः सुतो ऽग्रजः
शास्त्रसारकृतसंग्रहव्रजः ।
लोकशोककरकर्मकृंतनः(नं v.l.)
शास्त्रशस्त्रमिदमाबबंध सः ॥ १२ ॥
शास्त्रेभ्यः सारमादाय केवलं ग्रंथधारणं ।
तस्मादस्मासु तुष्यार्थेतु(l. तुष्यंतु) सूरयः शास्त्रपारगाः॥१३॥
तद्यथा तथ्यमेव सिद्धं(द्ध v.l.)नृपतिभर्तृहरिवाक्यं ।
नमस्यामो देवान्ननु हतविधेस्ते ऽपि वशगा विधि०
तस्माद्ग्रंथकश्च । [(*Bh.*, *Nīt.* 92 or 94) ॥ १४ ॥
यदैहिकामुष्मिकभावसिद्धं
बुद्ध्वा वियुक्तमुत बुद्धिवृद्धं ।
यत्कर्म दैवाख्यमिह प्रसिद्धं
शुभाशुभं नौमि तदीशनद्धं ॥ १५ ॥
तत्र मादं(तत्राप्यरं Bo.) दुःखकरं नराणां
शुभेतरत्कर्म निरीक्ष्य पाके ।
यद्चुराद्या मुनयो विचार्य
निजार्यबुद्ध्या विविधप्रकारं ॥ १६ ॥
गर्गो मनुर्गौतमयाज्ञवल्क्यौ
बोधायनः सुश्रुतशालिहोत्रौ ।
शातातपः प्राणिगणानुकंपी
पुराणकर्ता यदुवाच वेधाः ॥ १७ ॥
नानाभेदेषु वेदेषु यद्यदुक्तं मनीषिभिः ।
धर्मशास्त्रपुराणेषु कर्म किं पाकलक्षणं ॥ १८ ॥
किंचिद्गर्गाद्गृहीतमाचापि किंचित्
किंचिन्नीत्वा सुश्रुताच्छालिहोत्रात् ।
मन्वादिभ्यः सत्यवत्याः सुताच्च
पौराणेभ्यः सा ॰ादाय किंचित् ॥ १९ ॥
विद्वज्जनविनोदाय हिताय भुविनां(l. भ०) भुवि ।
सारग्राहमिदं नाम्ना साम्रायं शास्त्रमुद्धरे ॥ २० ॥ ०

Fol. 5*b*: इति सारसंग्रहे(!) कर्मविपाके दैवकल्पना-प्रकरणं ॥ अथ प्रकरणाधिकारसंख्या ॥ तत्र
मौलगिनृपतिविरचितं कर्मविपाकं यतः पुरस्कृत्य ।
रचितो ग्रंथस्तस्मात्प्रथितं नाम तस्यापि ॥ १ ॥
ग्रंथे प्रकरणान्यत्र पंचपंचाशदेव हि ।
अधिकाराः पंच युक्ताश्चत्वारिंशत्समन्विताः ॥ २ ॥
शतत्रयं परिख्याता दानानां(!) शांतिकारणं ।
पंचाशद्भिरुपेतानि अष्टौ चैव शतानि तु ॥ ३ ॥
चत्वार्येव सहस्राणि ग्रंथवृत्तश्लोकानि संख्या प्रकीर्तिताः(!) ।
एवं ५२०० श्लोकसंख्या प्रकीर्तिता ॥
एवं मयाधिकाराणां संख्या ग्रंथस्य च स्मृता ।
न संशयो ऽत्र कर्तव्यो न न्यूनमधिकं भवेत् । अथ सारग्रहणं ।
षट्सप्ततिसमायुक्तं विज्ञानेशाच्छतद्वयं ।
पंच बोधायनीयानि गृहीतानि शतानि च ॥ ०

Thus the author states that his compilation is principally based on *Maulaji Nṛipati's Karmavipāka*, 1000 *ślokas* (in round numbers) having been taken therefrom, interlaced with quotations from other sources (*Vijñāneśa*, *Baudhāyana*, *Śātātapa*, *Dānakhaṇḍa*, *Ācāradīpa*, *Jñānamaṇḍala*, *Āyurveda*, *Bālacikitsā*, *Purāṇas* (of which he knows eighteen), and other works, the whole amounting to 5200 *ślokas*. After this statement he proceeds: अथ मौलगिः ।

नत्वा श्रीशमुमेशदंतिवदनौ शक्तिं ग्रहान् वाडवान्
पुण्यानां तु निजापराध[ज]नितं दंडं विधायाधुना ।
श्रीमान्मौलगिभूपतिः स्वविहितं धर्मं प्रजापालनं
सम्यक्कर्तुमपुण्यरोगशमनं ब्रूते विधिं शास्त्रतः ॥
शास्त्रत इति तदाह ।
पुराणन्यायमीमांसाधर्मशास्त्रागममिश्रिताः ।
वेदा स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ ०

Digitized by Microsoft®

अथोद्देशेन व्याधयः fol. 15*a*; अथ स्त्रीणामाचारवाक्यानि 16*b*; इति ज्ञानमंडलोक्तस्त्रीकर्मविपाकः 20*a*; इति ज्ञानमंडले पुरुषकर्मविपाकोद्देशः 21*a*; अथ प्रायश्चित्तलक्षणं 22*a*; इति श्रीमद्विरचिते सारग्राहे कर्मविपाके प्रायश्चित्ताधिकारः 54*a*; इति सारग्राहे कर्मविपाके॰ चांद्रायणविधिनिर्णयः 58*a*; इति श्रीमद्विर[चिते कर्म]विपाके ऐहिककर्मप्रायश्चित्तानि 63*b*; इति सर्वशास्त्रसारग्राहे(!) कर्मविपाके सद्विरचिते प्रायश्चित्तग्रहणे प्रायश्चित्ताधिकारः ॥ अथ दानप्रशंसा । 75*a*; इति दानसंकल्पप्रयोगविधिः 93*b*; इति श्रीमद्विरचिते कर्मविपाके सारग्राहे प्रतिकरणव्यवस्थाकरणं 102*a*, etc. It ends:

वदनं प्रसाद[सद]नं सदयं हृदयं सुधामुचो वाचः ।
करणं परोपकरणं येषां केषां न ते वंद्याः ॥

इति सारग्राहो नाम वृद्धकर्मविपाकः समाप्तः ॥ समाप्तं चेदं कर्मविपाकनाम धर्मशास्त्रं ॥ संवत् १५ आषाढादि ९० वर्षे अश्विनशुदि १ दिने ऽलेखि ॥

One of the Bombay MSS., which will be described in Prof. Bhandarkar's next Report, here adds the following verses kindly placed by him at my disposal: अथ समयः ॥

आदौ बभूव भुवि विक्रमभानुनामा
भूवल्लभान्यनृपसिद्धशिरोललाम ।
तत्प्राज्यराज्यसमयातिगतांतरिक्ष-
वेदान्विताग्निविभुसंख्यशरत्छतेषु (*Saṃv.* 1440) ॥
शाके रसोत्तरशतेषु गतेषु राम-
क्षोणीमितेषु (*Śaka* 1306) दयितेषु सहायिनेषु ।
मास्यर्कतापविषमे किल शुक्लनाम्नि
रक्षेशरश्मिरमणीयवलक्षपक्षे ॥
तिथौ स्कंदाश्विसंख्ये च भ्राजद्राजात्मजाहनि ।
शुभ ऋक्षे विशाखाख्ये योगे सति शिवाह्वये ॥
सुरपतिपुरधृतमुद्रे समुद्रे सकलकलाचंद्रे ।
श्रीनंदपत्तनगरे(!) पुण्यचयैरुल्लसद्भद्रे ॥
श्रीमन्मंगलभूमिपालतनये श्रीदुर्गसिंहे नृपे
राज्यं शासति शाश्वतं विजयिनि क्षोणींद्रतां तन्वति ।
तत्साचिव्यधुरंधरे सुचतुरे मन्त्रीश्वरे दातरि
व्यापारान्परिशीलयत्यनुदिनं श्रीकर्णसिंहे सति ॥
मन्येवं (l. मयैवं) सौम्यसमये विपाकः पूर्वकर्मणां ।
सारग्राहाभिधः श्रेष्ठस्तेनैवायं समुद्धृतः ॥
यादृग्ग्रंथेषु मे दृष्टं तत्रैवोद्धृतं मया ।
सुसंबद्धमसंबद्धं प्रसीदंत्वत्र सूरयः ॥

Cp. Bhandarkar, Report, 1882-3, p. 63, and Cat. of Deccan Coll., p. 251 (where the work is called *Sārasaṃgraha*, as at fol. 5*b* of the present MSS.); Cat., p. 139 (*Sārasaṃgrāhaka*).

[GAIKAWAR.]

1768.

84a. Foll. 109; size 10¾ in. by 4¾ in.; legibly written, in Devanāgarī, in 1770 A.D.; fourteen lines in a page.

Karmavipāka, another work on expiatory rites to be performed with the view of averting evil influences, by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha.*

It begins:

दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

See Aufrecht, Cat. Bodl., no. 659 (transcribed from the present MS.), where a list of authorities is given.

It ends: शीतज्वरनाशे गुडूचीसमिधः । कन्यार्थं मध्वक्ता लाजाः ॥ इति त्वरितरुद्रप्रयोगः ॥

इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ कर्मविपाकः समाप्तः ॥

Regarding the author, see above, no. 1464.

[H. T. COLEBROOKE.]

1769.

2700. Foll. 417, two of which (375 and 376) are wanting; size 9½ in. by 4½ in.; legibly written, in Devanāgarī; seven lines in a page.

Vidhānamālā, a treatise on ceremonies to be performed with a view to averting evil influences, by *Nṛisiṃha Bhaṭṭa.*

It begins:

प्रणम्य लंबोदरमुत्तमानां संतोषदं सर्वपुराणदृष्टं ।
धर्मार्थकामव्यवहारसिद्धै करोमि शुद्धार्थविधानमालां॥१॥

तत्रादौ पुष्पवतीविधानं निरूप्यते । प्रथमर्तौ दृश्यमानं रजः साध्वसाध्विति विविच्य साधुन[:] प्रतीकारः कथ्यते । ॰

Digitized by Microsoft®

इति ० प्रथमर्तौ रजोदोषहरविधानं fol. 4*b*; ० विकृतिप्रसवजनितविघ्ननाशनविधानं 6*b*; ० यामलोत्पत्तिविधानं 8*a*, etc.; ० नवग्रहपीडाशमनविधानं 20*b*; ० वायसग्रहविधानं 21*a*; ० हस्तिपादग्रहपीडाशांतिविधानं 22*b*; ० कर्णग्रहपीडाशमनविधानं 23*a*, etc.;--० विवाहव्रतबंधेषु मातृरजोदोषजनितविघ्नहरविधानं । अथ पुण्याहवाचनं 411*a*.

It ends: इति स्वस्तिवाचनं ॥ इति श्रीविधानमालायां श्रीमन्नृसिंहभट्टविरचितायां सर्वकामसिद्धिदं स्वस्तिवाचनाख्यं नाम विधानं २३९ ॥

प्रकरणानि द्विशतचत्वारिंशत्फलश्रुतिसहितं ॥

समाहृतमिदं शास्त्रं सर्वशास्त्रार्थसंग्रहात् ।
विधानमालिकाख्यं हि प्राणिनामुपकारकं ॥ १ ॥
धर्मार्थकामशास्त्रेभ्यः संगृह्यालंकृतं मया ।
उद्धृतं सर्वपुष्पेभ्यो यत्नत्स्यान्मधुमक्षिकं ॥ २ ॥
ग्रंथस्यास्यानुरागेण मयानुग्रहणेन वा ।
संतोषयंतु विद्वांसः सचेतांसि (l. स्व०) समंजसा ॥ ३ ॥
वैराटे विषये ऽस्ति चंदनगिरेर्गव्यूतिमात्रे पुरं
देव्याः प्राक् सुमनोहरं वसुमतीतीरे ऽग्रहारो महान् ।
तत्रत्यो ऽत्रिकुलोद्भवो गुणनिधिः श्रीमान्नृसिंहो द्विजश्
चक्रे शास्त्रमिदं नृणामुपकृतिं संधाय चित्ते निजे ॥ ४ ॥
विधानमालां ग्रथिता मयात्र
गुणानुसंधानविराजमानं ।
प्रमेयसारैः सुभगां पवित्रीं
कुर्वंतु कंठेषु निजेषु धीराः ॥ ५ ॥

इति श्रीनृसिंहभट्टविरचिता विधानमाला समाप्ता ॥ संवत् १७३२ समयनामकार्त्तिकसुदि ९ शनैश्वर समाप्त ॥

[MACK. COLL.]

1770.

921. Foll. 192; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, about the middle of last century; ten lines in a page.

A commentary on the preceding work (? by *Viśvanātha*, son of *Hari*). It begins:

यो धान्वंतरशास्त्रमर्थचतुरः कारुण्यरत्नाकर-
सौजन्यामृतपूर्णमानसलसच्छ्रीशंभुचित्तः सदा ।
भूपालालिकलालनीयचरणद्वंद्वस्य सूनुर्हरेर्
भूविस्तारियशाः सदा जयति स श्रीविश्वनाथः सुधीः॥१॥
प्रणम्य लंबोदरम् ० २ ॥

विधानमालेति ग्रंथं नामधेयं तच्चान्वर्थं विधानानां मालेव मालापरंपरेत्यर्थः । विधानं विधिः । ०

The commentary is not quite complete.

It ends: इति श्रीविधानमालायां पितामहस्मृत्युक्तं सर्वेदिव्येषु धर्मावाहनधर्मचारिकाविधानं संपूर्णं । this section (236) ends at fol. 402*b* of the preceding MS.

[H. T. COLEBROOKE.]

1771.

1745a. Foll. 40; size $8\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; good, old Devanāgarī handwriting; eleven lines in a page.

Lakshahoma-paddhati, a manual for the performance of the *Lakshahoma*, for the propitiation of the various planetary agencies, by *Kāśī Dīkshita*, son of *Sadāśiva Dīkshita*.

It begins: अथ लक्षहोमपद्धतिः ॥ तत्र तावत् नानादेवतोद्देशेन वक्ष्यमाणनानामंत्रैः सर्वपापक्षयार्थं परमसुखप्राप्त्यर्थं क्रियमाणस्त्वेक[ः ।] उक्तं च बृहत्पाराशरेण ॥

अथातः संप्रवक्ष्यामि द्विजेंद्राः श्रूयतामिदं ।
लक्षहोमविधिं पुण्यं कोटिहोमविधिं तथा॥० 22 *ślokas*

इति बृहत्पाराशरे शांत्यध्याये लक्षहोमविधिः ॥ प्रायश्चित्त्यर्थं गायत्र्या लक्षहोमः कार्यः । गायत्र्या तिलहोमसहस्रे चैकः प्राजापत्य इति । ०

अथ पुण्याहवाचनं ० मातृकापूजा fol. 6*a*; इति नांदीश्राद्धं । अथ वरणं 9*a*; इति ऋत्विग्वरणं । ततो वास्तुपूजनं 10*a*; अथ अग्निध्यानं 22*b*, etc.

It ends: सर्वान्कामानवाप्नोति स्वर्गे लोके महीयत इत्यादि प्रागेव लिखितं ॥ इति लक्षहोमपद्धतिः समाप्ता ॥ इति श्रीयाज्ञिकसदाशिवदीक्षीतसुतकाशीदीक्षितकृता लक्षहोमपद्धतिः समाप्ता ॥

[H. T. COLEBROOKE.]

1772.

2016. Foll. 6; size 9 in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī; nine lines in a page; worm-eaten and injured by wear.

[*Yati-*] *Ārādhanaprayoga*, a manual of rules and formulas for the propitiation of ascetics.

Digitized by Microsoft®

It begins: अथ यतीनां समाराधनप्रयोगः ॥ स च पार्वणश्राद्धानंतरं श्वः स--- स चैवं ॥ कृतनित्यक्रियः मध्याह्ने षोडशाष्टौ चतुरो वा ब्राह्मणानाहूय कर्ता--- राचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य श्रीनारायणप्रीत्यर्थं ब्रह्मीभूत--रोः आराधनं करिष्ये॥ तदंगेक्षणं पाद्यं च करिष्ये॥० The *mantras* are accented.

Fol. 5*b*: अनेन ब्रह्मीभूतस्य गुरोः आराधनाख्येन कर्मणा तेन श्रीनारायणः प्रीयतां न मम ॥ ततः सुहृद्युक्तो भुंजीतेति ॥ यतीनां पुण्यतिथिसमाराधनप्रयोगः ॥ ततः प्राप्तदशमीमहालयतीर्थप्रयुक्तादिश्राद्धानि कुर्यात् ॥ ० ४ lines ॥ वसिष्ठः ॥

चतुर्विधानां भिक्षूणां जातिबंधुसुतादिभिः ।
एकादशे हि(?ऽह्नि) कर्तव्यं श्राद्धं तेषां तु पार्वणं ॥

इति आराधनप्रयोगः समाप्तः ॥ शके १७१९ पिंगलनामसंवत्सरे कार्त्तिकशुद्धपौर्णिमा मंदवासरे इदं पुस्तकं नेनोपनामेन गणेशात्मकप्रभाकरेण लिखितं ॥

On the front and back pages the treatise is called "*Yatīnām puṇyatithisamārādhanaprayoga.*" [DR. JOHN TAYLOR.]

1773.

1217b. Foll. 6; size $11\frac{1}{2}$ in. by 5 in.; fairly written, in Devanāgarī, about 1700 A.D.; fourteen lines in a page.

Dānaphalavrata, a description of a ceremony to be performed, it seems, by unhappy wives who have become estranged from their husbands—like *Kuntī* (also called *Kusumāvatī* or *Pushpāvatī*) and *Damayantī*—or are in fear of losing their sons, like *Sumitrā*.

The names of these personages occur in a tale given (on the last three pages) in illustration of the preceding description, and ascribed to the *Padmapurāṇa*.

It begins: अथ दानाफलव्रतं (!thus always) ॥

संलिप्य गोमये भूमिं चतुरस्र[क]मंडलं(०लां) ।
तन्मध्ये ऽष्टदलं पद्मं शोभितं कर्णिकान्वितं ॥ १ ॥

प्राणायामत्रयं कृत्वा संकल्पं तु ततः परं ।
कलशं शंखपूजां च ततः पूजां समारभेत् ॥ २ ॥

तद्दक्षिणभागे त्रिकोणमंडलं कुर्यात् । तन्मध्ये गणपतिं पूजयेत् । ततो द्वारपूजा । पूर्वद्वारे वक्रतुंडाय नमः । एकदंष्ट्राय० दक्षिणे महोदराय नमः । गजाय· पश्चिमे लंबोदराय । विकटाय· उत्तरे । विघ्नराजाय · धूम्रवर्णाय · अग्रे वास्तुपुरुषाय । ऊर्ध्वभागे भारत्यै । अधोभागे रत्यै । मध्ये गणपतये ।

अत्रागच्छ गणाधीश इह स्थाने च याम्यहं ।
यावत्वां पूजयिष्यामि तावत्वां [सु]स्थिरो भव ॥ १ ॥

चतुर्भुजं महाकायं गजवक्त्रं सुदंतकं ।
शूर्पकर्णं त्रिनयनं ध्यायेत्सर्वार्थसिद्धये ॥ २ ॥

ध्यानं गणपतये० आवाहनं । एकदंताय · आसनं । गजवक्त्राय · पाद्यं । ० -- ॥ अथारुणपूजा । ० --

अथ महालक्ष्मीपूजा fol. 1*b*; अथ तुलसीपूजा 2*a*; अथ सूर्यपूजा 2*b*; अथांगपूजा 3*a*; अथ पुष्पपूजा 3*b*; अथ अष्टोत्तरपूजा 4*a*; इति पूजाविधिः 115*a*.

Fol. 5*b*: अथ कथा ॥ ऋषय ऊचुः ॥

पितुर्गृहे वर्तमानं कुंती व्यासं ददर्श ह ।
नमः कृत्वा तु सद्भक्त्या पाद्यार्घाचमनादिकं ॥ १ ॥

दृष्ट्वा संप्रार्थितं व्यासं कुंती मुकुलितांजलिः ।
पतिपुत्रान्न(?त्र)मोक्षार्थं व्रतं ब्रूहि महामुने ॥ २ ॥

व्यास उवाच ॥

शृणु दानाफलं नाम व्रते(?व्रतं) सर्वव्रतोत्तमं ।
कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ॥ ३ ॥
व्रतानां सर्वदानानामुत्तमं ब्रूहि तद्व्रतं(! some [omission]) ॥

श्रीशंकर उवाच ॥

साधु देवि त्वया पृष्टमुत्तमं सर्वतः शृणु ।
भूमौ तु भारते वर्षे पुण्ये च यमुनातटे ॥ ४ ॥ ० १२ ॥

स्त्रिय ऊचुः ॥

पुण्यव्रतमिदं देवि सौरं पापप्रणाशनं ।
सर्वसंपत्करं नृणां पतिपुत्रान्न(?त्र)मोक्षदं ॥ १३ ॥ ०

It ends:

तदा व्रतं कृतं सर्वं भूमौ दानाफलं(!) महत् ।
सुपुत्रांल्लभते कुंती त्वं कुरु व्रतमुत्तमं ॥

ये पठंतीदमाख्यानं शृण्वंति [प्र]श्रयान्विताः ।
सर्वपापविनिर्मुक्ताः यास्यंति परमां गतिं ॥ ५७ ॥

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे दानाफलव्रतं ॥

[H. T. COLEBROOKE.]

Digitized by Microsoft®

1774.

2129. Foll. 2; size 9¼ in. by 4¼ in.; fairly written, in Devanāgarī, about the middle of the last century; thirteen lines in a page.

Sahagamanavidhi, or *Satīvidhāna*, a short treatise (in 66 *ślokas*) on the rite of *Satī*, by *Govindarāja* (?). Rather incorrect.

It begins: श्रीकृष्ण उवाच ॥

अधान्यात्(?अधुना) संप्रवक्ष्यामि नारीणां परमो विधि:
[(l.°मं विधिं) ।
भर्त्रा वैव(?सहैव) मरणं स्त्रीणां चैव प्रशस्यते ॥ १ ॥
गच्छते सत्यलोकं तु संयुक्ता पतिना(!) सती ।
सर्वदेवमयो यस्मात् सर्वतीर्थमय: पति: ॥ २ ॥
नदीनां च यथा गंगा सुराणां च यथा हरि: ।
मुनीनां च परं ब्रह्म स्त्रीणां चैव तथा पति: ॥ ३ ॥

It ends:

उत्तमा मध्यमा लोका ये वान्ये तत्र संस्थिता: ।
ते सर्वे हरिमुच्चये करतालैं प्रदापयेत्(!) ॥ ६६ ॥

इति श्रीगोविंदपराज(!)विरचितसहगमनविधि: ॥ After which is added, by a different hand, सतीविधानं। Outside it is called संगमनविधि.

Perhaps it is an extract from a *Purāṇa* or some other work. [GAIKAWAR.]

1775.

1705b. Foll. 13; size 8 in. by 4 in.; clearly written, in Devanāgarī; ten lines in a page.

Nīlodvāhapaddhati, a manual for performing the ceremony of letting loose a bull, in connection with funeral rites.

It begins: अथ नीलोत्सर्गकाला उच्यंते ॥

ग्रहणद्वितये पुंये(*r.* पुण्ये) तीर्थे चैवायनद्वये ।
विषुवद्वितये श्राद्धे मृताहेष्वष्टकासु च ॥ १ ॥

इति सूत्रकाराणां वाक्यं। यथा। कार्त्तिक्यां फाल्गुन्यां वैशाख्यां माघ्यां आश्वयुजि अष्टकासु चंद्रसूर्यग्रहणयोर्विषुवति उदगयने दक्षिणायने प्रेतस्यैकादशाहे इति काला: ॥ तथा मत्स्यपुराणात्। आश्वयुज्यामषाढ्यां चैत्रवैशाखयोरपि। ०

It ends: अथ शांतिकोपहारा: ॥ इति श्रीनीलोद्वाहपद्धति: समाप्ता॥ संवत् १६४८ वर्षे माघवदि ७ भौमे लिखितं॥
[H. T. COLEBROOKE.]

1776.

2938. Fol. 1; size 10¾ in. by 5½ in.; good, modern Devanāgarī; 20 lines in all.

Hitasūtra, a string of 65 rules of conduct and moral maxims, prepared, for Ballantyne, by *Veṅkaṭ-rām*, on 10th July, 1860.

It begins: ओं धर्मोपादानं संतोष: श्रेष्ठ: १ ॥ अशीलस्याचारो न भ्राजते २ ॥ क्षेमवतो नास्ये दोषे नाशो ऽस्ति ३ ॥ शाम्येत्पापं शीलं यो ऽधिगच्छेत् ४॥ वामाचार: पितुरप्यनिष्ट:५॥ आचार्यस्याज्ञां कुर्वीत ६ ॥ मानित्वं मूर्खाणां मिथ्याचार: ७ ॥ ०

The sentences are divided into seven adhyāyas; viz. five of 10 each, and the last two of 9 and 6 resp. [J. R. BALLANTYNE.]

1777.

2316A. Foll. 65; size 13¼ in. by 4¾ in.; good Devanāgarī writing, of 1809 A.D.; nine lines in a page.

Gotrapravaramañjarī, an exposition of the genealogies of the several *gotras*, and of the rules by which intermarriage is forbidden on account of community of ancestors invoked in the *pravara*, or invocation to *Agni*; by *Purushottama Paṇḍita*. It begins:

यज्ज्ञं यत्स्थं यदीयं जगदिदमखिलं यन्नयं यत्प्रधानं
यन्मेयं यन्निवासं स्थिरचरहृदयं यत्पुरा संप्रभूतं ।
यत्क्रीडावस्तुभूतं यदनुभवसुखं यत्स्वरूपानभिज्ञं
यत्स्वापं यत्प्रबोधं यदतिहिततमं ब्रह्म तस्मै नमोऽस्तु॥१॥
आचार्यान्वेदकल्पान्परिहितनिरतान् कल्पसूत्रप्रणेतॄन्
सर्वान्बोधायनादीन् प्रणिपतितजनत्राणशीलान् प्रणतत्सूत्रोपात्तगोत्रप्रवरसुमनसां मंजरीं तां करिष्ये [स्य।
यज्ज्ञानात्कर्मकांडं फलति निजफलं ज्ञानकांडं च सर्वं॥२॥
मात्स्यं कूर्मवराहखंजनृहरीन् रामांश्च रामानुजान्
नत्वा द्वादश कल्किविष्णुसहितान् ब्रह्मावतारानिमान्
तत्तत्प्राक्त(l. प्रोक्त)पुराणभारतगता: स्मृत्यंतरोक्ताश्च ये
तैर्गोत्रै: प्रवरैश्च पूर्वगदितां बध्नाम्यहं मंजरीं ॥ ३ ॥

Digitized by Microsoft®

Under each of the eight *gotras*, the corresponding passages are generally quoted from *Baudhāyana*, *Āpastamba* and *Satyāshādhin*, *Kātyāyana* and *Laugākshi*, *Āśvalāyana* and the *Matsyapurāṇa*. This chapter ends fol. 52*a*, after which follow some chapters treating of intermarriage, and expiations of irregularities committed in this respect.

इति क्षत्रियवैश्यप्रवरकांडद्वयं fol. 53*b*; ° असंप्रज्ञातबंधूनां गोत्रप्रवरकांडं fol. 54*a*; ° गोत्रप्रवरतत्त्वज्ञानमाहात्म्यप्रतिपादनपरं सूत्रकांडं fol. 55*a*; ° मातृगोत्रविवाहप्रतिषेधयुक्तिकांडं fol. 57*a*; ° सार्ववर्णिकप्रवरकांडं fol. 58*b*; finally महाप्रवराध्यायपरिसमाप्तिगोत्रप्रवरकांडं ॥

[H. T. Colebrooke.]

1778.

1708. Foll. 60; size 9 in. by 4 in.; fairly good, modern Devanāgarī writing; 9–11 lines in a page.

Gotrapravaramañjarī.

[H. T. Colebrooke.]

1779.

2719. Foll. 30; size 8 in. by 4 in.; good, rather old, Devanāgarī writing; 11–14 lines in a page.

Pravaradīpikā, a similar treatise, by *Kṛishṇa* (*Śaiva*). It begins:

देवस्येशानसूनोः सुरगणमुकुटज्योतिरुद्योतितांघ्रेः
शुंडादंडः करोतु क्रकचविकसयन् श्यामलो मंगलं वः।
दंतो यस्यैकदेशे विकसितविपुलस्फाटिकस्तंभकांतिः
प्राप्तब्रह्मांडकोटौ हरिचरण इव व्योमगंगाप्रवाहः॥ १॥

स शिवः पातु वो नित्यं यत्प्रपंचमहोदधौ ।
उत्पद्यंते विलीयंते ब्रह्माद्या बुद्बुदा इव ॥ २ ॥

महालक्ष्मीं महामायां स्वकुलस्यैव देवता(°तां) ।
यस्याः स्मरणमात्रेण वाग्विलासो भवेद्ध्रुवं ॥ ३ ॥

परंपरात्मकं वंदे श्रीरामचरणाबुजं ।
यं नत्वा विवृणोत्कृष्णः(*r.* व्य°) प्रवरान् मुनिभाषितान् ॥४॥

मुनीनां नाम गोत्राणि वंशावतरणं तथा ।
प्रवराणां तथा साम्यमसाम्यं विस्तरादहं ॥ ५ ॥

The *gotra*-lists end fol. 13*b*: इति प्रवरदीपिकायां कृष्णशैवविवृतौ अगस्त्याष्टगणानां सप्तमुनीनां प्रवरविवरणं समाप्तं ॥

Then follow rules concerning intermarriage, compiled from various authorities, among which may be mentioned: *Kārikā*, fol. 23*b*; *Caturviṃśatimata*, 15*a*, 20*a*; *Pravaradīpa*, 26*a*; *Pravarapradīpa*, 17*b*; *Pravaravivaraṇa*, 23*a*; *Mañjarīkāra*, 17*b*, 28*a*; *Maṇḍana*, 22*b*; *Śrāddhakalpa*, 21*b*; *Śrībhaṭṭapādāḥ*, 28*a*; *Shaṭtriṃśanmata*, 20*a*; *Smṛiticandrikā*, 15*a*; *Smṛitimañjarī*, 14*b*; *Smṛityarthasāra*, 14*a*.

For another MS. of this work (anonymous), see Rāj. Mitra, Bikāner Cat., p. 434.

[Mack. Coll.]

1780.

2316B. Foll. 23; size 13 in. by 4¾ in.; fair, modern Devanāgarī writing; nine lines in a page.

Gotrapravara-darpaṇa (or *-nirṇaya*), another treatise on the same subject, by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa*, and grandson of *Nārāyaṇa*.

In the arrangement of the matter the author follows the *Pravaramañjarī*, which is much quoted by him.

The treatise begins:

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन गोत्रप्रवरनिर्णयः ॥
क्रियते विदुषां प्रीत्यै ग्रन्थानालोच्य सर्वशः ।

तत्र सगोत्राय दुहितरं न प्रयच्छेत् । असमानप्रवरैर्विवाह इत्यापस्तम्बगौतमाश्वलायनैः सगोत्रा सप्रवरा च निषिद्धा । तत्र सगोत्रस्वरूपमाह प्रवरमञ्जर्यां बौधायनः । °

The author wrote his *Nirṇayasindhu* in 1611-12 A.D.

[H. T. Colebrooke.]

Digitized by Microsoft®

1781.

1572d. Foll. 24; size 10½ in. by 4¼ in.; fair Devanāgarī writing, of 1687 A.D.; eleven lines in a page.

Gotrapravaranirṇaya, another treatise on the same subject, by *Bhaṭṭa Raghunātha* (c. 1620 A.D.), son of *Bhaṭṭa Mādhava*, and grandson of *Bhaṭṭa Rāmeśa.*

It begins:

नत्वा गणेशं श्रीरामं सीतां लक्ष्मीं गुरूनपि ।
विश्वेश्वरं भैरवं च रघुनाथेन धीमता ॥
गोत्रप्रवरनिर्णीतिः समासेन वितन्यते ।
तद्भावे सति गोत्रादिपरिणीतिप्रसक्तितः ॥

It ends:

भट्टरामेशविंद्वग्य[elsewhere ० रामेशसूर्यग्य-]सुत-[माधवसूनुना ।
भूतो ऽयं रघुनाथेन गोत्रप्रवरनिर्णयः ॥

इति श्रीमत्पदवाक्यप्रमाणनिपुणतमभट्टमाधवात्मजभट्टरघुनाथकृतो गोत्रप्रवरनिर्णयः समाप्तः ॥

[H. T. Colebrooke.]

1782.

3200. Foll. 17; size 8 in. by 6¼ in.; excellent Devanāgarī writing; eleven lines in a page.

Pravaranirṇaya, by *Viśvanātha Deva*, son of *Śambhu Deva*, and younger brother of *Rāma Deva.*

It begins: ओं नमः श्रीजानकीजानये । नमो ब्रह्मणे । नमो महेशाय । नमो गणपतये । नम ऽआपस्तंबाश्वलायनबौधायनकात्यायनेभ्यः ॥ अथातो यज्ञश्राद्धमहादानपरिणयनाद्युपयुक्तं गोत्रप्रवरनिर्णयं व्याख्यास्यामः । तदेतद्ब्राह्मणं भवत्यार्षेयं प्रवृणीत ऽऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीत ऽइति बंधोरेव नैत्यथो संतत्या इति चैकं वृणीते द्वौ वृणीते त्रीणि(*r.* त्रीन्) वृणीते न चतुरो वृणीते पंच वृणीते ०

Iti Bhṛiguvaṃśapravaranirṇayaḥ, fol. 4*b*; *Aṅgirovaṃśa*, 9*b*; *Atrivaṃśa*, 11*a*; *Viśvāmitravaṃśa*, 12*b*; *Kaśyapavaṃśa*, 14*b*; *Vasishṭhavaṃśa*, 16*a*; *Agastivaṃśa*, 17*a*; then follow the *Kshatriya-* and *Vaiśya-pravarāḥ.*

It ends: द्व्यामुष्यायणानां प्रथममुत्पादकप्रवरोच्चारणमनंतरं परिगृहीतप्रवर[ो]च्चारणमिति कात्यायनाश्वला[यना]दयः ॥ इति श्रीमच्छंभुदेवतनयरामदेवानुजश्रीविश्वनाथदेवविरचिते वर्णत्रयाणां प्रवरनिर्णयाः समाप्ताः ॥

The fly-leaf contains the following note:

Copied for me from a manuscript belonging to *Narasiṃhabhaṭ Grāmōpādhyāya* of Belgaum. The manuscript is not dated. It consists of 27 leaves about 9 in. long by 4⅝ in. broad. The characters are Nāgarī. Presented to the India Office Library. 23rd August, 1878. [J. F. Fleet, Bo. C. S.]

E. Treatises on Worship (Devapūjā).

1783.

1269. Foll. 68; size 7 in. by 3⅜ in.; fairly written, in Devanāgarī, in A.D. 1665; ten lines in a page.

Rudrapaddhati, a manual of directions and formulas for the performance of ceremonies to *Rudra*, in connection with the *Śrauta* ritual of the *Taittirīyas*, by *Nārāyaṇa Bhaṭṭa*, son of *Rāmeśvara Bhaṭṭa.*

It begins:

भट्टरामेश्वरसुतो भट्टनारायणः कृती ।
प्रणम्य रामं तनुते रुद्रानुष्ठानपद्धतिं ॥

तत्र तावद् यद्यप्यनेकासु यजुःशाखासु रुद्रः पठ्यते तथापि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते ॥ स्मार्तरुद्रप्रयोगस्य बौधायनसूत्रमूलकत्वेन बह्वृचादीनां च तत्र बौधायनं ग्राह्यं । बह्वृचादिभिर्देशवाक्यानुसारेण बौधायनीयानुरोधित्वादिति। इह च रुद्रानुष्ठाने त्रैवर्णिकानामेवाधिकारो न स्त्रीशूद्रानुपनीतानां ॥ तेषां वैदिकमंत्रयुक्तकर्मण्यध्ययनाद्यभावेन साक्षाद्वचनाभावेनाधिकारादिति ॥ अन्यत्र चैतद्विस्तरेण निर्णीतं ॥ तत्र रुद्रः पंचधा । रूपं । रुद्री । लघुरुद्रो महारुद्रो ऽतिरुद्रश्चेति । एकादश गुणवृद्धा । सर्वेश्च त्रेधा । जपरुद्रो होमरुद्रो ऽभिषेकरुद्रश्चेति। जपरुद्रो ऽपि द्वेधा। केवलजपात्मको होमात्मकश्चेति। होमाभिषेकयोस्तु केवलतदात्मकमेव। तत्र तावदक्षयकामः

Digitized by Microsoft®

श्रीरुद्रप्रीतिकामो वा उत्तरायणादौ ० प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ममकायिकादिसर्वपापक्षयार्थं श्रीरुद्रप्रीत्यर्थं वामुकरुद्रमहं करिष्य इति संकल्पयेत् । पुत्रकामस्तु दीर्घायुःसुपुत्रसिद्ध्यर्थं महारुद्रमहं करिष्य इति । ०

ततो वास्तुपूजनं fol. 14*b*;--इति (रुद्र)होमप्रकारसंक्षेपः 53*a*; ततो वसोर्धारा fol. 58*a*; this is followed by the accented text of *Taitt. Saṃh.* V. 4, 8, followed by a figured *stotra*, इह स्वर्वैश्वानराय प्रदिशो ज्योतिर्वृहत् preceded and followed by a number of *stobhas*. Then follow the '*śreyaḥsampādana*' on the part of the priests to the sacrificer, and the bestowing of '*dakshiṇās*' by the latter.

It ends: दीना[न]नाथांश्चान्नादिना संतोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः संतुष्टो हविष्यं भुंजीतेति ॥ इति श्रीरामेश्वरभट्टात्मजनारायणभट्टसूरिणा काश्यां कर्मसज्ज्ञानतुष्ट्यै रुद्रानुष्ठानपद्धती रचिता समाप्तिमगमत् ॥ ० ॥ अथ रामेश्वरभट्टसुतनारायणभट्टोक्ता होमसंख्या ॥ तद्यथा । लघुरुद्रे अष्टाचत्वारिंशत्पक्षे दशांशेन ०

Then follow computations of the number of *homas* to the several *Rudras* to be performed in a year, and the measures of the respective *kuṇḍa* to be used.

The opinion of *Rūpanārāyaṇa* is several times referred to by the author.

Colophon: इति ० रुद्रपद्धतिः समाप्ता ॥ संवत् १५८७ विश्वावसुनामसंवत्सरे कार्त्तिकवदि ५ तद्दिने जनार्दनपुरग्रामे कोनेरभट्टात्मजनृसिंहेन लिखितं ॥

For another copy of this work, see Rāj. Mitra, Notices of S. MSS., I., p. 100.

[H. T. COLEBROOKE.]

1784.

1986. Foll. 17; size $8\frac{1}{4}$ in. by 4 in.; fairly written, in Devanāgarī; eight lines in a page.

Rudra-Laghunyāsa, a manual of formulas, intended for certain ceremonies in honour of *Rudra*, or for *Rudra*-worship generally.

It begins: ओम् ॥ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि श॰शिषद्विश्वे देवाः सूक्तवाचः पृथिवि मातर्मा मा हि॰सीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यास॰ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरो ऽनुमदंतु ॥ ओं शांतिः शांतिः शांतिः ॥ ओम् ॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ etc., the whole *Śatarudriya* (*Taitt. S.* IV., 5, 1–11); followed (on foll. 9*b*–14*a*) by *Taitt. S.* IV., 7, 1–11 (cp. no. 152, p. 21 of this catalogue). Down to the end of this section, marked रुद्र in the margin, the *mantras* are accented throughout.

Then follows a second section the leaves of which are marked ल० न्या० (the *Laghunyāsa* proper?), beginning (without accents):

ओम् । प्रजनने ब्रह्मा तिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ जठरे अग्निस्तिष्ठतु ॥ हृदये शिवस्तिष्ठतु ॥ कंठे वसवस्तिष्ठंतु ॥ वक्त्रे सरस्वती तिष्ठतु ॥ नासिकयोर्वायुस्तिष्ठतु ॥ नयनयोः सूर्याचंद्रमसौ तिष्ठेतां ॥ कर्णयोरश्विनौ देवौ तिष्ठेतां ॥ ललाटे रुद्रास्तिष्ठंतु ॥ मूर्ध्न्यादित्यास्तिष्ठंतु ॥ शिरसि महादेवस्तिष्ठतु ॥ शिखायां चामुंडा तिष्ठतु ॥ पृष्ठे पिनाकी तिष्ठतु ॥ पुरतः शूली तिष्ठतु ॥ पार्श्वयोः शिवाशंकरौ तिष्ठेतां ॥ सर्वतो वायुस्तिष्ठतु ॥ ततो बहिः सर्वतो ऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु ॥ सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु ॥ मा॰ रक्षंतु ॥ then accented: अग्निर्मे वाचि श्रितः ॥ वा॰ हृदये ॥ हृदयं मयि ॥ अहममृते ॥ अमृतं ब्रह्मणि ॥ वायुर्मे प्राणे श्रितः ॥ प्राणो हृदये ॥ हृदयं मयि ॥ अहं ० ॥ अमृ ० ॥ सूर्यो मे चक्षुषि श्रितः ॥--॥ चंद्रमा मे मनसि श्रितः ॥ ० ॥ दिशो मे श्रोत्रे श्रिताः ॥ ० ॥ आपो मे रेतसि श्रिताः ॥ ० ॥ पृथिवी मे शरीरे श्रिता ॥ ० ॥ ओषधिवनस्पतयो मे लोमसु श्रिताः ॥ ० ॥ इंद्रो मे बले श्रितः ॥ ० ॥ पर्जन्यो मे मूर्ध्नि श्रितः ॥ ० ॥ ईशानो मे मन्यौ श्रितः ॥ ० ॥ आत्मा म आत्मनि श्रितः ॥ ० ॥ पुनर्म आत्मा पुनरायुरागात् ॥ पुनः प्राणः पुनराकूतमागात् ॥ वैश्वानरो रश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्य गोपाः ॥ then without accents:

अन्येनं सर्वशरीर॰ स्पृशेत् ॥ आत्मानं श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं ।
गंगाधरं दशभुजं सर्वाभरणभूषितं ॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनं ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥ ० 5 more *ślokas*.

आ त्वा वहंतु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिर्वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वो २ ॥

Digitized by Microsoft ®

स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं । [भव ॥
तावत्त्वं प्रीतिभावेन लिंगे(देवे marg.) ऽस्मिन्संनिधौ
निराकारो ऽपि पूर्णो ऽपि निर्गुणो ऽपि निरामया ।
मदनुग्रहमासाद्य भव त्वं भव मूर्तिमान् ॥

शांतो भव ॥ इति लघुन्यासः समाप्तः ॥ ध्यानं ॥

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसंनं ॥
पद्मासिनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥

शके १७१६ ॥ आनंदनामसंवत्सरे भाद्रपदशुक्लत्रयोदशि इंदुवारश्रवणनक्षत्रप्रातःकाळतद्दिने इदं पुस्तकं रामचंद्रज्योतिषीन लिखितं ॥ विश्वेश्वरसुप्रसंन् ॥ पावसग्रामे न वास्तव्यं(!) ॥ विश्वेश्वरसंनिधं ॥ [Dr. John Taylor.]

1785.

2232. Foll. 22; size 9½ in. by 4½ in.; fair, modern Devanāgarī writing; 13 or 14 lines in a page.

Rudrabhāshya, a commentary, in 478 couplets, on the *Rudrādhyāya* (or *Śatarudriya*), by *Ahobala* (son of *Nṛisiṃha*), of the *Bhāskara* family (cf. no. 152).

It begins:

विश्वेश्वरं नतसुरासुरमौलिरत्न
मंदारकुंदकुसुमावृतपादपीठं ।
भस्मावगुंठमहिकंठमुमोपकंठं
सोत्कंठमाश्रय मनः पटु नीलकंठं ॥ १ ॥
चेतोभृंग महेशपादयुगलं यद्विष्णुनेत्रार्चितं
तत्त्वं मौनि मनोमधुव्रततरव्राताश्रयं संश्रय ।
तत्पादाब्जमगण्यपुण्यविभवप्राप्यं ततो दुस्त्यजं
मा मा संत्यज मामको यदि तदा तत्रैव नित्यं वस ॥ २ ॥
संसारसागरसमुत्तरणप्रवीणः
श्रीमानहोबलमहाकविराजराजः ।
श्रीरुद्रभाष्यतरिमुज्ज्वलपद्यरूपां
चक्रे सदाशिवकृपासमुपात्तविद्यः ॥ ३ ॥
अहोबलः पूजितकालकालः
श्रीकालकालार्चितनीतकालः ।
श्रीरुद्रभाष्ये ज्वलचित्तमूलो
जयत्ययं शंकरदत्तशीलः ॥ ४ ॥
अहोबलो भास्करवंशभानुः
श्रीरुद्रमंत्रार्थविचारदक्षः ।
श्रीरुद्रभाष्यं तनुते नितांतं
प्रकाशयद्रुद्रमगाधभावं ॥ ५ ॥ ० ८ ॥
ब्रह्मचारिण इत्यादि महोपनिषदि स्फुटः ।
श्रीरुद्राध्यायमहिमा पुराणेषु स्मृतिष्वपि ॥ ९ ॥
श्रीरुद्राध्यायमध्यस्थमेकैकमपि नाम यत् ।
तदनंतमहापापमहावनहुताशनः ॥ १० ॥
न जाने गिरिजाजाने रुद्राध्यायजपात्परं ।
यज्ञपादब्जजादीनां पदं पादतलीकृतं ॥ ११ ॥ ० १२ ॥
सृष्टिपालनसंहारान्यो भवत्याद्युपाधिमान् ।
करोति स महारुद्रः श्रीरुद्राध्यायदेवता ॥ १३ ॥
तस्य देवादिदेवस्य श्रुतिप्रोक्तं तनुद्वयं ।
तस्यैतेत्यादिवेदेन बोधितं खलु तद्द्वयं ॥ १४ ॥

तथा चोक्तं ।

तस्यैते तनवो(*r.* तनुवौ) घोरान्या शिवान्येति शिवरहस्ये।
तस्यैते तनवो(*r.* तनुवौ) देवा घोरान्या घोररूपिणी ।
शिवान्या सा यतः(?न्यायतः) साक्षाच्छिवदा शिवरूपिणी

नम इति । [॥ १५ ॥ ० १९ ॥

वागादिभिः समाराध्याधीनत्वात्सप्रसादनं ।
प्रह्वत्वापरपर्यायं नम[ः]शब्दार्थमीमहे ॥ २० ॥

ते रुद्र मन्यवे ।

ते सर्ववेदवेदांतप्रतिपाद्यस्य वस्तुनः ।
अमेयानंतकल्याणगुणभेदस्वरूपिणः ॥ २१ ॥
शक्तिक्रोधात्मिका शंभोः शांतिरूपा भवत्वियं ।
मा बाधिष्ट महेशस्य भक्तानिष्टमपीशतां ॥ २२ ॥
हे रुद्र ते तवायं यो मन्युः प्रज्वलनात्मकः ।
क्रोधो ऽनर्थादिमूलो ऽस्ति तादृशाय नमो ऽस्तु नः ॥ २३ ॥
रोदयत्यात्मविमुखानिति रुद्रः प्रकीर्तितः ।
रुत्संसाराभिदं(*r.* धं) दुःखं तद्विद्रावयतीति वा ॥ २४ ॥ ० २९ ॥
अग्रे ऽप्यस्तु नयत्येवमनुषंगो यथोचितं ।

उतो त इषव इति ।

उतो इत्यपि चेत्यर्थे ते तवेषुः शरः स्मृतः ॥ ३० ॥
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
सुवर्णाचलरूपाय धन्वने धनुषे नमः ॥ ३१ ॥
बाहुभ्यामुत बाहुभ्यामपि ते तव नो नमः ।
अनंतबाहुविश्लेषो वेदानामप्यगोचरः ॥ ३२ ॥ ० १२५ ॥

शशिपंजराय । शशिपर्वोलतृणं तद्वज्जरः पिंजर इत्ययं ।

शशिपंजरो हरस्तस्मै नमः शशिपंजराय ते ॥ १२६ ॥ ०

Digitized by Microsoft®

It ends:

एकादशो ऽपि पापघ्नो ऽनुवाको विवृतो ऽखिलः ।
अहोबलेन सुधिया शिवसंतुष्टिहेतुना ॥ [४]७२ ॥ °
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीरुद्रस्य मनोहरातिसुगमा संवीक्ष्य भाष्याणि सा ।
श्रीविश्वेशपदारविंदनिरतस्वांतातिसंतोषदा
व्याख्याकल्पलता मनोज्ञफलदा संशीलता(*r.* °लिता)
[सादरं ॥ [४]७४ ॥ °
महेश त्वद्वारि(*r.* चि) स्फुरतु रुचिरा वागतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदा मह्यमनिशं
महेशानाथं मां शरणद सनाथं कुरु विभो ॥ [४]७९ ॥
इति अहोबलेन विरचितं श्रीरुद्रभाष्यं समाप्तम् ॥

Besides the *Śivarahasya*, which is repeatedly referred to, no other authority is met with.

For the author's commentary on the *Mahimnah Stava* in which the present work is mentioned, see Aufrecht, Cat. Bodl., no. 237.

[R. JOHNSON.]

1786.

353. Foll. 92; size 10 in. by 3¾ in.; fairly written, in the Devanāgarī character; seven lines in a page.

Rudra-paddhati, a description of mystic rites connected with the worship of *Śiva*, in the form of *Mahārudra*, composed, in Saṃvat 1515 (A.D. 1459), by *Paraśurāma*, son of *Karṇa*.

In its close imitation of the Vedic ceremonial it keeps clear of the indelicacies usually met with in Tantric writings; only passing allusions being made to the existence of a female deity, under the name of *Umā*.

The treatise begins:

श्रीगणेशं गुरुं नत्वा शारदां वरदप्रदां ।
विप्रः परशुरामाख्यः कुरुते रुद्रपद्धतिं ॥ १ ॥
मुक्तिभुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानन्दमयं शान्तं शिवं वन्दे शिवप्रदं ॥ २ ॥
पूर्वाचार्यकृतीर्दृष्ट्वा स्मृतीश्चागमसंमतीः ।
हृद्यैः पद्यैर्मुनीन्द्रोक्तैः क्रियते रुद्रपद्धतिः ॥ ३ ॥
पञ्चाङ्ग[न्न]पितुं रुद्रां(*r.* रुद्रान्) याजुर्वैद्यान्द्विजन्मनां ।
मद्विधानां च मुग्धानां प्रबोधाय प्रबोधिनी ॥ ४ ॥ °

(some 65 *ślokas*); इति जपप्रशंसा fol. 7*a*;

अथ मण्डपकुण्डादिसाधनं यज्ञसिद्धये ।
साधयेत्प्रथमं प्राचीं शङ्कुना वोडुनाथवा ॥ १ ॥

130 *ślokas*; इति ° मंडपकुंडलक्षणं fol. 19*a*;

अथ रुद्रस्य वक्ष्ये ऽहमितिकर्तव्यतां च तां । °

177 *ślokas*; इति ° कर्तव्यता fol. 34*b*; इति ° देहशुद्धिः fol. 37*b* (33 *ślokas*); इति ° पीठपूजा fol. 48*a* (124 *ślokas*); अथ न्यासविधिरुच्यते ॥

अथाभिधास्ये रुद्राणां शान्तये गृहमेधिनां ।
पञ्चाङ्गानां विधानं तद् यत्कृतं हन्ति पातकं ॥

इति ° न्यासविधिः ॥ fol. 62*b* (178 *ślokas*).

नमस्ते षोडशर्चेन देवतावाहनं स्मृतं । ° (94 *ślokas*).

इति ° आहुतिपात्रलक्षणं । fol. 70*b*; अथ होमविधिः ॥

कृतरुद्रजपस्यान्ते होमं कुर्याद् दृशांशतः । ° 220 *śl.*

It ends:

आदौ जपप्रशंसोक्ता ततो मण्डपकुण्डकं ।
इतिकर्तव्यता पश्चाद् देहशुद्धिस्ततः परं ॥
पीठार्चा न्यास आहुत्याः प्रमाणं हवनं ततः ।
एतान्यनुक्रमेणाष्टौ प्रोक्तानि रुद्रपद्धतौ ॥
संवद्विक्रमभूपस्य पञ्चदशशते गते ।
पञ्चदशोत्तरे वर्षे जन्माष्टम्यां प्रकाशिता ॥
उदीच्यजातिविप्रेण कर्णपुत्रेण धीमता ।
कृता परशुरामेण महारुद्रस्य पद्धतिः ॥ २० ॥
इति यदिदमसूक्तं सूक्तमाहोस्विदुक्तं
तदपि मनसि धार्यं द्वेषतो न प्रहार्यं ।
तदपि(*r.* दधति) मुदमशोका बालकोक्तौ हि लोका
मदुपरि रमणीया मित्रता धारणीया ॥

इति होमविधिः समाप्तः ॥ इति श्रीपरशुरामविरचिता रुद्रपद्धतिः समाप्ता ॥° संवत् १६७५ वर्षे मासपौषशुद्धद्वादशीवारशुक्र लिखितं प्रागौडज्ञातीयदवे श्रीपरमानंदनमहाकालेश्वरपुरे शुभं॥

[H. T. COLEBROOKE.]

1787.

1635a. Foll. 29; size 9⅜ in. by 4 in.; well written, in Devanāgarī, about the latter part of the 16th century; ten lines in a page.

Digitized by Microsoft®

Rudra-paddhati, a shorter treatise on the same subject as the preceding one, and perhaps inspired by it, as the partial identity of the iutroduction might seem to indicate.

It begins :

श्रीगणेशं गुरुं नत्वा शारदां च वरप्रदां ।
सर्वेषामुपकारार्थं लिख्यते रुद्रपद्धतिः ॥ १ ॥
भुक्तिमुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानंदमयं शांतं शिवं वंदे शिवप्रदं ॥ २ ॥

आदौ समासतो विनियोगः । तत्र जाबालश्रुतिः । किं जप्येनामृतत्वं गच्छति शतरुद्रियेणेति ॥ तथा रुद्राध्यायी मुच्यते सर्वपापैरिति श्रुतिः॥ स्मृतिवाक्यैरपि जपहोमादौ शतरुद्रियस्य विनियोगः ॥ तत्र रुद्ररुद्रीमहारुद्रातिरुद्राणां लक्षणान्याह शातातपः । °

Fol. 4*a*: युगानां त्रिघ्ने(?*r*. त्रित्वे) जाते अष्टाविंशतितमे कलियुगे प्रथमचरणे॥ श्रीमन्नृपतिविक्रमार्कसंवत्सराणां बार्हस्पत्यानुमानेन यथासंख्याधिकषोडशशततमे वर्षे। श्रीमत्शालिवाहनशाकात् संख्याकादधिकपंचदशशततमे वर्षे। अमुकनाम्नि संवत्सरे उत्तराशावलंबितश्रीमन्मार्तंडमंडले । अमुकऋतौ अमुकमासे । पक्षे । तिथौ । वारे । नक्षत्रे । योगे । करणे । अमुकस्थे चंद्रे । सवितरि । देवगुरौ । शेषेषु ग्रहेषु यथास्थाने स्थितेषु सत्सु । एवं गुणविशिष्टे पुण्ये देशे काले च । मम सभार्यस्य सपुत्रस्य क्षेमायुरारोग्यपरमैश्वर्यसुखप्राप्त्यर्थं ° अस्मिन्महारुद्राख्ये कर्मणि आचार्यादिऋत्विजां वरणमधुपर्कस्वस्तिवाचनान्यहं करिष्ये । इति संकल्पं कुर्यात् ॥ °

Fol. 17*a*: इति महारुद्रपद्धतिः ॥ रुद्रविधानं ॥ अथ स्नात्वा सर्वोपद्रवनाशनं । छंदःपुरुषाय नमः । शरीरे न्यसेत् । गौतमभरद्वाजाभ्यां नमो नेत्रयोः । विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः । वसिष्ठभरद्वाजाभ्यां नमो नासिकयोः । अत्रये नमो वाचि । गायत्र्यै छंदसे ऽग्नये नमः शिरसि । °

It ends: विरूप १ विश्वरूप २ पशुपति ३ ऊर्ध्वलिंग ४ ॥ शेष १ तक्षक २ अनंत ३ वासुकी ४ शंखपाल ५ महापद्म ६ कंबल ७ कर्कोटक ८ ॥ इति रुद्रपीठदेवताक्रमः ॥

Acc. to the passage on fol. 4*a* (Saṃvat 16. ., Śāka 15 . .) the treatise seems to have been composed between A.D. 1578 and 1643; the writing of the MS. pointing to somewhere about the former date.

For the same treatise see Weber, Cat. Berl., no. 1283. [H. T. Colebrooke.]

1788.

91A. Foll. 52; size 10 in. by 4 in.; fairly written, in Devanāgarī, in the latter part of last century; eleven lines in a page; the last six leaves supplied by a different hand.

Rudrapaddhati, another manual of *Śiva* worship; by *Dīkshitānanta*, son of *Viśvanātha*.

It begins:

नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकं ।
रुद्रकर्मविधातॄणां चतुर्वर्गफलप्रदं ॥ १ ॥
दीक्षितानंतविज्ञेन विश्वनाथस्य सूनुना ।
रच्यते सुखबोधाय रुद्रपद्धतिरादरात् ॥ २ ॥

श्रीकुलदेव्यै नमः ॥

सुमुखश्चैकदंतश्च पि[ङ्ग]लो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ °

It ends: ब्राह्मणे भोजनमयुतहोमात्सहस्रगुणा अन्यत्सर्वं लक्षहोमवत् ॥

इति श्रीमद्यज्ञोपवीताभिधानश्रीविश्वनाथसूनुना दी[क्षि]तानंतेन विर - - - - पका - - - - संग्रहरुद्रानुष्ठानत्रिविधाग्रहमखपद्धतिः ॥

[H. T. Colebrooke.]

1789.

1345A. Foll. 27; size 12 in. by 4½ in.; fair, modern Devanāgarī writing; nine lines in a page.

Śiva-Liṅgapratishṭhā, or *Liṅgasthāpanavidhi*, a manual of rites to be performed at the setting up and inauguration of the *Liṅga*, by *Ananta*.

It begins:

अथ लिंगप्रतिष्ठा तत्र मूलवाक्यानि मात्स्ये ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥ १ ॥ °

[39 *ślokas*; after which :

Digitized by Microsoft ®

इति शिवप्रतिष्ठाकालादिनिर्णयः ।

लक्ष्मीलालितपादाय लावण्यापूर्णसिंधवे ।
नतभक्ताभीष्टदात्रे नमस्ते शेषशायिने ॥ १ ॥
प्रतिष्ठाग्रंथनिचयान् विलोक्यादरमादितः ।
शिवलिंगप्रतिष्ठा श्रीमदनंतेन तन्यते ॥ २ ॥

तत्र तावदुत्तरायणे माघादिपंचमासेषु शुक्लपक्षे चतुर्थीषष्ठ्यष्टमीचतुर्दशीव्यतिरिक्ततिथौ कृष्णपक्षे ऽपि दशम्याः पूर्वमनिषिद्धतिथौ बुधगुरुकाव्यमंदानामन्यतमस्मिन्वारे ऽश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तराहस्तस्वात्यनुराधाज्येष्ठाश्रवणमूलधनिष्ठारेवतीनामन्यतमस्मिन्नक्षत्रे ऽनुपदिष्टे ऽपि स्वदेवत्ये व्यतीपातादिवर्जिते भद्रादिवर्जिते ज्योतिर्विदुक्तग्रहबलवति सुलग्ने शिवादिप्रतिष्ठा कार्या । ०

It ends: अग्ने नयेति प्रदक्षिणा त्रिचतुर्वसिहा(? त्रिश्चतुर्वा सिक्ता) ऽग्निम् । विश्वभुजे नमः । सर्वभुजे नमः । आत्मने नमः । परमात्मने नमः । इति नमस्कृत्य लिंगप्रतिष्ठासिद्ध्यर्थं द्वादश ब्राह्मणान् भोजयित्वा देवं प्रणिपत्य प्रत्यर्थयेत् ।

यावच्चंद्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिताः ।
तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया ॥

ततो नमस्कारनामकरणं तन्नाम्ना देवस्योत्तरपूजां कृत्वा आचार्याय गां दत्त्वा ब्रह्मणे वृषभं सदस्यायाश्वं ऋत्विग्भ्यो दक्षिणां दत्त्वा पूर्वेतां वाचयेत्ततो मंपदेताग्निं(? मंत्रेणाग्निं) विसृजेत् ॥ इति बौधायनसूत्रोक्तलिंगस्थापनविधिः समाप्तः ॥

[H. T. Colebrooke.]

1790.

1988a. Foll. 4; size 7½ in. by 4 in.; clear, modern Devanāgarī writing; eight lines in a page.

Rudrapūjā, or *Mahādevaparicaryāvidhi*, a manual for the daily worship of *Rudra-Mahādeva*, by means of offerings of flowers and the recitation of Vedic *mantras*.

It begins: अथातो महादेवस्याहरहःपरिचर्याविधिं व्याख्यास्यामः ॥ स्नातः शुचिः शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाक्षतपुष्पैर्यथालाभमर्चयित्वा सह पुष्पोदकेन महादेवमावाहयेदों भूः पुरुषमावाहयाम्यों भुवः पुरुषमावाहयाम्यों सुवः पुरुषमावाहयाम्यों भूर्भुवःसुवः पुरुषमावाहयाम्यायातु भगवान्महादेव इत्यथ स्वागतेनाभिनंदति स्वागतमनुस्वागतं भगवते महादेवायैतत्स्वासनं कूर्ममास्तां भगवान्महादेव इत्यत्र कूर्चं ददाति भगवते ऽयं कूर्चो दर्भमयस्त्रिवृद्धरितसुवर्णस्तं जुषस्वेत्यत्र स्थानानि कल्पयत्यग्रतो ब्रह्मणे दक्षिणतः स्कंदाय विनायकाय पश्चिमतः स्थूलायोत्तरत उमायै नंदिकेश्वराय स्थानं कल्पयामीति सर्वत्रानुषजत्येवं कल्पयित्वा यो रुद्रो अग्नाविति यजुषा पात्रमभिमंत्र्य ०

It ends: भूर्भुवःसुवः पुरुषमुद्वासयामि प्रयातु भगवान्महादेव इति विसर्जयति लिंगस्थानेष्वावाहनोद्वासनवर्जमहरहः स्वस्त्ययनमित्याचक्षत इत्याह भगवान् बौधायनः । पंचदशः ।

प्रयातु भगवानीशः सर्वलोकनमस्कृतः ।
अनया पूजया तुष्टः पुनरागमनाय च ॥

The leaves are marked रु० पू०; and on the outer pages the tract is called बौधायनसूत्रोक्तरुद्रपूजाविधिः ॥

[Dr. John Taylor.]

1791.

1988d. Foll. 8; size 7½ in. by 4 in.; fair, modern Devanāgarī writing; seven lines in a page.

Pārthiva(liṅga)pūjā, a manual for making *liṅgas* of earth, founded on the directions given in the *Baudhāyanasūtra*, the *Bṛihad-Vāśishṭha* and *Laiṅga(purāṇa)*.

It begins: अथ पार्थिवलिंगपूजाप्रकारविधिः ॥ अरण्यतडागनदीतीरादिशुद्धस्थानं अभिलक्ष्योक्तं ।

गत्वा स्थानं नमस्कुर्यान्मंत्रमेतं समुच्चरेत् ।
सर्वाधार धरादेव त्वद्रूपां मृत्तिकामिमां ।
लिंगार्थं तु प्रगृह्णामि प्रसन्नो भव मे प्रभो ॥

इति मंत्रेण मृत्तिका ग्राह्या । मृत्तिकाप्रमाणं ।

यावत्स्यादात्मनः शक्तिर्मृदं तावत्समुद्धरेत् ।
तदर्धं वाथ तस्यार्धं तदर्धं वा तदर्धकं ।
एवं पलद्वयाद्न्यूनं न तु कुर्यात्कदाचनेति ॥

शक्त्यनुसारेण मृदमानीय तदुपरि आर्द्रतार्थं जलं दत्त्वा । ओं सद्योजातं प्रपद्यामीति(!) मंत्रेण मृदं हस्तेन गृहीत्वा ०

It ends: यथाशक्ति मूलमंत्रजपं कृत्वा प्रदक्षिणानमस्कारान्कृत्वा ओं महादेवाय नम इति विसर्जयेत् । स्त्रीभिः शूद्रैश्च प्रणवरहितः शिवाय नम इत्येव सर्वत्र मंत्रः पठितव्यः ।

नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।
विरक्तानां तु शूद्राणामेवं पूजा विधीयते ॥

इति सूतसंहितावचनात् ॥ इति पार्थिवपूजा समाप्ता ॥

[Dr. John Taylor.]

Digitized by Microsoft®

1792.

1258c. Foll. 82; size 9 in. by 3¾ in.; Devanāgarī character; 7 or 8 lines in a page.

Śivapūjāsaṃgraha, a manual for worshippers of *Śiva,* by *Vallabhendra Sarasvatī.*

Very incorrect.

The MS. begins: ओं भशुंडुः(?भुशुंडः) कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच। अथ प्रणवेन विमृज्य तद्भस्म प्रणवमंत्रितेन तु तेनैव दिग्बंधं कारयेत्पुनरपि तेनास्त्रमंत्रेणाऽगानि मूर्धादीनि उद्धूलयन् मलस्नानमिदं । अथ विधिस्नानमासाद्य पंचभिर्मंत्रैस्तंतुक्रमादुद्धूल्य · ईशानेन शिरोदेशं · मुखं तत्पुरुषेण तु · उरोदेशमघोरेण गुह्यं वामदेवेन · °

इति श्रीवल्लभेंद्रकृतभस्ममहात्म्यसंग्रहो नाम प्रथमोध्यायः fol. 20*b*; इति° भस्ममहात्म्यसंग्रहे द्वितीयोध्यायः fol. 41*b*; इति वल्लभेंद्रकृतशिवप्रसादमाहात्म्यसंग्रहे चतुर्थोध्यायः fol. 67*a*.

It ends:

> यस्तु शंकरनिर्माल्यं पादेनाक्रमते नरः ।
> षष्टिवर्षसहस्राणि तिर्यग्योनिषु जायते ॥

इति वल्लभेंद्रस[र]स्वतीकृ[त]शिवपूजसंग्रहे पंचमोध्यायः ॥ संवत् १७२४ नलनामसंवत्सरे दक्षिणायने कार्त्तिककृष्णत्रयोदश्यां शनौ श्रीमत्तुलसीविश्वनाथदत्तनूजेन वि°लेन लिखितो ऽयं ग्रंथः काश्यां °

[H. T. Colebrooke.]

1793.

1965. Foll. 16; size 6½ in. by 4 in.; well written, in Devanāgarī, at the beginning of the present century; European paper; nine lines in a page.

Śivapūjāpaddhati, a manual of *Śiva*-worship, by *Rāghavānandanātha.*

It begins:

> श्रीमच्छिवषडर्णस्य नित्यानुष्ठानपद्धतिः ।
> संक्षेपादुच्यते नत्वा मौलौ श्रीनाथपादुकां ॥

तत्र यथाविधि गुरोर्मंत्रदीक्षां लब्ध्वा श्रीशिवमुपासीत । ब्राह्मे मुहूर्ते उत्थाय स्वशिरसि श्रीगुरुं ध्यात्वा । ओं ऐं अमुकानंदनाथामुको देव्यंबा गुरुश्रीपादुकां पूजयामि नम इति°

इति° संध्याविधिः fol. 3*a*; इति भूतशुद्धिः fol. 5*a*; इति मातृकान्यासः । अथ मूलऋष्यादिन्यासः fol. 6*b*; इति करांगन्यासः fol. 7*b*; इति गोलकन्यासः fol. 8*a*; इत्यंतर्यागः । अथ बाह्यपूजा fol. 9*a*; इति प्रथमावरणं fol. 12*b*, etc.; षष्ठावरणं fol. 13*b*.

It ends: अस्य षट्त्रिंशल्लक्षजपात्मकं पुरश्चरणं पायसाज्यसंमिश्रैः षट्त्रिंशत्सहस्रहोमः। शेषं गुरुतः शास्त्रतश्चावगंतव्यं ॥

> राघवानंदनाथेन रुक्मिणीकांतसेविना ।
> निर्मितापचितिः शैवी शैवानां सुखसिद्धये ॥

इति राघवरचिता श्रीशिवषडक्षरस्य संक्षिप्तपूजापद्धतिः समाप्ता ॥

[Dr. John Taylor.]

1794.

1967b. Foll. 20; size 6½ in. by 3½ in.; fairly written, in Devanāgarī, at the beginning of the present century; nine or ten lines in a page.

Śivapūjāprakāra, another treatise on the same subject.

It begins: ब्राह्मे मुहूर्ते चोत्थाय स्वेष्टदेवतावंदनं कृत्वा बहिर्गत्वा ऽवश्यकादिकं विवर्त्य स्नानं कुर्यात् । तच्चोक्तं शिवरहस्ये । °

इत्यंतःस्नानविधिः । अथ भस्मस्नानं fol. 2*a*; इति भस्मधारणं fol. 3*a*; then follow prayers.

It ends:

> शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ।
> शिवो जयति सर्वत्र यः शिवः सो ऽहमेव हि ॥

एवं तन्मयो भूत्वा यथासुखं विहरेदिति ॥

[Dr. John Taylor.]

1795.

792. Foll. 28; size 10½ in. by 4 in.; Devanāgarī writing, somewhat difficult to read; 12–14 lines in a page.

Gopālapaddhati, a manual for the worship of *Krishṇa,* (?by *Dinakara,* son of *Nṛisiṃha*).

Digitized by Microsoft®

It begins:

श्रुतिमस्तकरत्नौघभाराजितपदांबुजे ।
व्रजवासिजनानंदे मुकुंदे रमतां मनः ॥ १ ॥

उत्तिष्ठन् शयनाद्ब्राह्मे मुहूर्ते मंत्रिसत्तमः ।
इंद्रनीलमणिश्यामं गोपरूपं हरिं स्मरेत् ॥ २ ॥

प्रातः स्मरामि सुखबोधतनुं तुरीयं
त्रय्या निरुक्तमपदं पदमिंदिरायाः ।
आमुक्तमुग्धमुनिमाविनि(? r. मानस)तोषबीजं
नंदात्मजं जनिमजस्य जगत्त्रयादेः ॥ ३ ॥

प्रातर्नमामि नमनीयतरं परं यद्
वागीशशंकरशचीपतिभृंगजुष्टं ।
गोगोपगोपललनासुलभं मुरारेः
पादांबुजं निजभयोद्भवनाशगंधि ॥ ४ ॥

प्रातर्नमामि नवनीरजचारुनेत्रं
बिंबाधरोन्नसुधाकरबिंबवक्त्रं ।
विद्युन्निपीतवसनावृतमेघगात्रं
गोपालमादिपुरुषं वसुदेवपुत्रं ॥ ५ ॥

प्रातर्वेलानुजमजं शयनोपविष्टं
निद्रांतरक्षनयनोत्स्मितगोपिजुष्टं
गोगोपहुंकृतिसुगीतिरवाभितुष्टं
सामैकयुष्टमनुचिंतय चित्तपुष्टं ॥ ६ ॥

प्रातः श्रये यदुवरं वरदं वरेण्यं
वृंदारकैर्नतमनंतसखं सखायं ।
दुःखापहं द्रुपदजाजयसज्जनानाम्
आनंदसिंधुमवधीरितधर्मबाधं ॥ ७ ॥

यः श्लोकपंचकमिदं मनुजो मुरारेः
पादारविंदमकरंदविनिष्ट(r. निविष्ट)चेताः ।
संकीर्तयेदथ शृणोति हरेः प्रगे ऽसौ
भूयात्परावरतनो(? r. धनो) भवतः कृपातः ॥ ८ ॥

इति पठन्नुत्थितो यथावच्छौचाचमनदंतधावनानहेदिन(? हर्दिवं)-द्वादशगंडूषजिह्वोल्लेखनरात्रिवस्त्रपरिवर्तनद्विराचमनानि विधाय शुचिदेशे कंबलाद्यासनं विस्तार्य गायत्र्यभिमंत्रिततोयेन प्रोक्ष्य ओं नमः पद्मासनायेति धेनुमुद्रां प्रदर्श्यासने उपविश्य ।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

इति तर्जन्या भुवं स्पृष्ट्वा ।

अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञयेति ॥ °

It ends: पंचभावनानुसारेण देवं स्वहृदये उद्वास्य पंचांगानि न्यसेदिति सर्वपूजासु समानं ॥

अनावृतनिजानंदगोविंदाश्रमदेशिकैः ।
दर्शितेन यथा किंचित्सूचितं नातिविस्तरं ॥ १ ॥

दिनकृता दशार्णस्य भुक्तिमुक्तिफलावधेः ।
प्रीयतां तेन विश्वात्मा गोपगोपीजनेश्वरः ॥ २ ॥

इत्यों तत्सद्गोपालार्पणमस्तु ॥

गोपालस्य दशार्णस्य पद्धतिर्येन निर्मिता ।
Vedāntasiddhāntasūktimañjarī, a versification of the contents of the *Siddhāntaleśa*, by *Gaṅgādharendra Sarasvatī Bhikshu*, pupil of *Rāmacandra Sarasvatī*, with the same author's commentary called *Vedāntasiddhāntasūktimañjarīprakāśa*; the text in the middle of every page, the commentary above and beneath it.

See Hall's Index, p. 153, nos. cclxxv. and cclxxvi.; Rāj. Mitra's Notices, ii., p. 3, no. 524.

The text begins:

तरणिशतसवर्णं कर्णघूर्णद्विरेफावलि-
वलितकपोलोद्दामदानाभिरामं ।
गिरिशगिरिसुताभ्यां लालितं नित्यमंके
स्वजनभरणशीलं शीलये विघ्नराजं ॥
श्रीमद्गुरुपदांभोजद्वंद्वमानम्य भक्तितः ।
सिद्धांतलेशसिद्धांतान् कारिकाभिर्निदर्शये ॥

The commentary begins:

तारानाथकलाधरस्त्रिजगतां नाथस्त्रयीविग्रहः
कारुण्यैकनिधिर्विधींद्रसुमुखैर्देवर्षिसिद्धैर्नुतः ।
वामांकस्थितशैलजांकसहितं विघ्नाधिपं लालयन्
सानन्दः शुभदः सदास्तु भगवान्प्रारिप्सितेऽस्मिन् शिवः ॥१॥

विततर(विततत्तर the second copy)दुरवगाहवेदांत-शास्त्रार्णवप्रवेशेन बहुविधसिद्धांतरत्नसंकलनासमर्थानां गुरुतरोपायप्रयत्नालसानामनायासेन सर्वसिद्धांतपरिज्ञानलालसानां मुमुक्षुविशेषाणामुपकाराय वेदांतसिद्धांतसूक्तिमंजरीं प्रारिप्समानः प्रत्यूहव्यूहप्रशमनाय प्रथमं सांबशिवस्पृहणीयगुणकदंब(°कदंबं the second copy)हेरंबमनुसंधत्ते तरणिशतसवर्णमिति etc.

The first *paricheda* ends fol. 6*a*, the second fol. 9*b*, the third fol. 12*a*.

The text ends:

श्रुतिकल्पलताकुंजसंजाता सूक्तिमंजरी ।
रम्या राद्धांतरत्नाढ्या रंजयत्वखिलान्बुधान् ॥ २५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रसरस्वतीपूज्य-पादशिष्येण गंगाधरेंद्रसरस्वत्याख्यभिक्षुणा विरचिता वेदांत-सिद्धांतसूक्तिमंजरी समाप्ता ॥

The commentary ends:

कीर्त्तिप्रचयगमनादिसिद्धये ग्रंथस्य विशिष्टमूलगुणनामधेयानि दर्शयन्नाशीर्वचनलक्षणं मंगलांतरमाचरति श्रुतिकल्पलतेति स्पष्टार्थं पद्यं ॥ २५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री-रामचंद्रसरस्वतीपूज्यशिष्येण गंगाधरेन्द्रसरस्वत्याख्ययतिना विर-चिते वेदांतसिद्धांतसूक्तिमंजरीप्रकाशे चतुर्थः परिच्छेदः समाप्तः ॥

Date of the MS.: निधींदुसिद्धिचंद्रे* पौष शुक्ले शनौ निशि तृतीयायां त्रिसंध्ये घट्टे वाराणसीपुरि जिज्ञासुजन-संतुष्ट्यै बुद्धिमान्समलीलिखत् ॥ [H. T. Colebrooke.]

2454.

1597a. Foll. 35; size 9½ in. by 3¾ in.; 8–11 lines in a page; small, clear writing, of the middle of the 18th century.

Vedāntasiddhāntasūktimañjarī, with its explanation, both by *Gaṅgādharendra Sarasvatī Bhikshu*; a second copy, incomplete. The first *paricheda* ends fol. 24, which is fol. २२ of the original numbering. The next leaf contains *ślokas* 8–11 of the second *paricheda*, the beginning and the end of this chapter are wanting. The leaves which contain the third and the fourth *parichedas* were numbered १–१५, but foll. १, ६, ८, ९, ११ are lost.

The explanation of the last *śloka* and the colophon of the *Prakāśa* are wanting.

[H. T. Colebrooke.]

2455.

2098b. Foll. 13; size 10 in. by 3¾ in.; good Devanāgarī writing of 1652 A.D.; 7–9 lines in a page.

Prasthānabheda, a classificatory sketch of orthodox Brāhmanical writings, from a *Vedānta* point of view.

* *Siddhi* does not appear in the list of significant words given by Burnell, South-Indian Palæography, p. 58. It is, however, given by L. Rice, Mysore Inscr., p. xxi., as meaning 'eight' (cp. *Sāṃkhyakār.* v. 51, '*siddhayo*' *shṭāu*). This gives the (Saṃvat) year 1819.

Digitized by Microsoft ®

It begins: अथ सर्वेषां शास्त्राणां भगवत्येव तात्पर्यं साक्षात्परंपरया चेति समासेन तेषां प्रस्थानभेदो ऽत्रोद्दिश्यते । °

See A. Weber, Ind. Stud., i., pp. 1 seqq., where the text has been edited from this and the next MSS. It was also printed, with a Bengalī translation, at Calcutta, in 1856.

[GAIKAWAR.]

2456.

1568a. Foll. 13; size 10 in. by 4½ in.; good, modern Devanāgarī writing; seven lines in a page.

The same work. [H. T. COLEBROOKE.]

2457.

1435a. Foll. 32; size 12 in. by 4¾ in.; 11 or 12 lines in a page; written in the Bengalī character.

Saṅkhyāprakāśakavyākhyā, the text of *Nandarāma's Saṅkhyāprakāśaka*, with a commentary by *Kāśīrāma*, son of *Bhaṭṭācārya Śiroratna Nyāyālaṃkāra*. The *Saṅkhyāprakāśaka* is an encyclopædic catalogue of philosophical and mythological objects, arranged according to their number.

It begins:

देहवानिव यो भाति शुद्धसत्यात्ममायया ।
तनुते नन्दरामस्तं नत्वा सङ्ख्याप्रकाशकम् ॥

एकं ब्रह्म ॥ द्वावात्मानौ जीवेश्वरौ ॥ द्वावनादी प्रकृतिपुरुषौ ॥ द्वे प्रकृती परापरे ॥ द्वौ पुरुषौ क्षराक्षरौ ॥ ° Fol. 4b: त्रय उपाया ध्यानकर्म्मभक्तयः ॥ Fol. 7a: चत्वारो ब्राह्मणक्षत्रियविट्शूद्राः ॥ Fol. 9a: पञ्च देवता रविगणेशविष्णुशिवदुर्गाः ॥ Fol. 9b: पञ्च पुरुषार्थाः धर्म्मार्थकाममोक्षप्रेमभक्तयः ॥ Fol. 11a: पञ्च विद्या सांख्ययोगवैराग्यतपोभक्तयः ॥ Fol. 11b: पञ्चार्थशास्त्राणि नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपकारशास्त्रं कलाशास्त्रञ्च॥ Fol. 12a: षट् तर्काः न्यायवैशेषिकमीमांसापातञ्जलसांख्यवेदान्ताख्याः ॥ Fol. 20a: नव द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि ॥ नव वर्षाणि इलावृतरम्यकहिरण्मयकुरुहरिवर्षकिंपुरुषभारतकेतुमालभद्राश्वनामानि॥ etc.

It ends: प्रकृतिसहितानि चैतानि त्रिंशत्तत्त्वानि ॥ ब्रह्मसहितान्येतानि एकत्रिंशत्तत्त्वानि॥ अन्यापि संख्या बोद्धव्या॥

Kāśīrāma's commentary begins:

रिरक्षिषुर्यो निजधर्म्मसेतून् युगे युगे सत्वमयानि धत्ते ।
वपूंषि नानागुणकर्म्मभाञ्जि भूयात् स देवो भवतां विभूत्यै ॥
भट्टाचार्य्यशिरोरत्नन्यायालंकारसूनुना ।
संख्याप्रकाशकव्याख्या काशीरामेण तन्यते ॥

अथ सकलशास्त्राभिधः श्रीमान् नन्दरामतर्कवागीशभट्टाचार्य्यः इदानींतनान् मन्दबुद्धीन् पूर्व्वपण्डितकृतनानाविधतन्त्रग्रन्थाध्ययनासमर्थानवलोक्य परमकारुणिकतया अध्ययनभावनाभ्यां तत्तद्ग्रन्थेभ्यः सारमाकृष्य संख्याकथनमिषेण संख्याप्रकाशकनामकग्रन्थं संक्षिप्तसारं तेषां हितार्थं रचितवान् । अथ एषो ऽपि तेषां नातिसुगमो बभूव अतो यथामति तद्व्याख्याने ममोद्यमः । तत्र तावत् ग्रन्थकृद्ग्रन्थसमाप्तिप्रतिबन्धकीभूतविघ्नसंभावनया तन्नाशार्थं कृतमीश्वरनमस्कारं शिष्यशिक्षार्थमादौ निबन्धनसुचिरतरकालीनविबुधपदावस्थितिहेतुयशसे स्वनामयौगिकग्रन्थनामद्वारा प्रवृत्त्यङ्गमभिधेयञ्चाह ॥

[H. T. COLEBROOKE.]

2458, 2459.

343, 344. Foll. 1–414 and 415–832 resp.; size 4to., 11½ in. by 9 in.; large modern Devanāgarī writing; 12–18 lines in a page.

Vidyāratnākara, a cyclopædia of Sanskrit Literature and Science, in eighteen chapters; compiled for Colebrooke, by *Dhanapati Sūri*, son of *Rāma Kumāra Datta*.

It begins:

ब्रह्मादिदेवतावृंदवंद्यपादसरोरुहं ।
नंदनंदनमानंदकंदं देवं समाश्रये ॥ १ ॥
नुमः श्रीबालगोपालतीर्थान् व्यासमुखान् मुनीन् ।
विघ्नहर्तॄन् गणेशादीन् पंडितांश्च विमत्सरान् ॥ २ ॥
आलोक्याखिलतंत्राणि सर्वसंबोधसिद्धये ।
वितन्यते यथाज्ञानं विद्यारत्नाकरो मया ॥ ३ ॥
श्रीमच्छेषमुखप्रणीतविलसत्तीर्थार्थतद्वाज्ञ(? तज्ज्ञान)वित्
तेजस्वित्वसुभाग्यतादिकगुणाधाराधिकारप्रदः ।
यो विप्रेष्टकृदस्ति कौलबुरुको गौरांगधीराग्रणीस्
तद्वाक्यात्तकृतिः कृती धनपतिर्ग्रंथं विधत्ते मुदा ॥ ४ ॥

चत्वारो वेदा चत्वार उपवेदाः । षडंगानि चत्वार्युपांगानि

Digitized by Microsoft®

चेत्यष्टादश विद्यास्तत्र। धर्मब्रह्मप्रतिपादकमपौरुषेयं वाक्यं वेदः। स च मंत्रब्राह्मणात्मकः। ऋग्यजुःसामाथर्वसंज्ञैः पादैर्विशिष्टत्वाच्चतुष्पादनंतो यजुः संज्ञस्तं द्वापरे द्वापरे विष्णुर्व्यासरूपमादाय चतुर्धा कुरुते॥ तत्रास्मिन्वैवस्वते मन्वंतरे व्यासक्रमः। प्रथमः स्वयमेव ब्रह्मा। द्वितीयो मनुः०

Chapter i., which concludes with an account of the divisions and recensions of the *Ṛic*, ends fol. 4; ii. treating of the *Yajus*, fol. 6; iii. of the *Sāman*, fol. 7; iv. of the *Atharvan*, fol. 8; v.-vii. *Āyurveda*, *Kāmaśāstram*, *Dhanurveda*, *Gāndharvam*, *Kāvyam*, *Alaṅkāra*, *Nāṭyam*, *Prākṛitavyākaraṇam*, *Svarāḥ*, fol. 154; viii. *Arthaśāstram*, fol. 180*b*; ix. *Śikshā*, fol. 188*b*; x. *Kalpa*, fol. 189; xi. *Vyākaraṇam*, fol. 238; xii. *Niruktam*, fol. 152*b*; xiii. *Chandaḥ*, fol. 300*b*; xiv. *Jyotisham*, fol. 318*b*; xv. *Purāṇāni*, fol. 438*b*; *Bhāratam*, 455*b*; *Rāmāyaṇam*, 458; *Yoga-Vāsishṭham*, fol. 462*b*; xvi. *Nyāya*, fol. 505; *Vaiśeshika*, fol. 520*b*; xvii. *Pūrva-*, 570*b*; *Uttara-Mīmāṃsā*, *Śaṅkarācāryamatam*, fol. 644; *Rāmānujamatam*, 655*b*; *Madhvācārya*, fol. 662*b*; *Vallabhācārya*, 671; *Bauddhamatam*, *Digambara*, *Cārvāka*, fol. 688; xviii. *Dharmaśāstram*, 728*b*; *Tantramatam*, fol. 740; *Śāktamatam*, *Maheśvaramatam*, *Pāśupatamatam*, fol. 752; *Vaishṇava*, *Saura*, *Gāṇeśa*, etc., *Devārcanavidhi*, fol. 758; *Vaiśvadevam*, 764; *Pātraśuddhi*, 768; *Bhakshyābhakshyavidhi*, 770*b*; *Śayanavidhi*, etc., *Āhnikavidhi*, 771*b*; *Tithinirṇaya*, fol. 785*b*; *Kapilamatam*, *Nirīśvarasāṅkhyam*, fol. 801*b*; *Seśvara-Yagaśāstram*.

The work is of little use.

It ends (fol. 830*b*): इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिविरचिते विद्यारत्नाकराख्ये निबंधे ऽष्टादशस्तरंगः १८॥

Then follows an *anukramaṇikā*.

[H. T. COLEBROOKE.]

---

6. *Rāmānuja's Viśishṭādvaita.*

2460.

567. Foll. 248; size 12¾ in. by 4½ in.; eleven lines in a page; writing middling.

Śārīrakamīmāṃsābhāshya or *Śrībhāshya*, a commentary on the *Vedāntasūtra*, by *Rāmānuja*, who followed the *Brahmasūtravṛitti* of *Badhāyana*.

See Hall's Index, p. 92, no. xxiii. It was printed, together with *Sudarśaṇa Ācārya's* commentary, at Madras in 1868 (4°. Telugu char.); and is being published again in the Bibl. Ind. Another edition, by *Rāma Miśra Śāstrī*, was begun in vol. vii., New Series, of the *Pandit*; a reprint from the *Pandit*, containing the first *pāda* of the first *adhyāya*, appeared in 1889 (vol. i.). For a legendary *Rāmānuja-caritra* see Rāj. Mitra, Notices, v., p. 9, no. 1731. The chief date of his life is the erection of an image of *Nārāyaṇa* on the *Yādava Hill* in the Śaka year 1012. For an account of his system see Bhandarkar, Report, 1883-84, pp. 68-74; Vienna I.O.C., Ar. S., p. 100.

Rāmānuja's Bhāshya begins:

अखिलभुवनजन्मस्थे प्रभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा॥

पाराशर्य्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीविनीम्।
पूर्व्वाचार्य्यसुरक्षितां बहुमतिव्याघातदूरस्थिताम्
आनीतां तु निजाक्षरैस्सुमनसो भौमा(:) पिबन्त्वन्वहम्॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्व्वाचार्य्याः संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते। श्री॥ अथातो ब्रह्मजिज्ञासा।

The first *adhyāya* ends fol. 126b, the second fol. 186a, the third fol. 232b.

Digitized by Microsoft®

Fol. 219 is a leaf from another copy.

The copy was transcribed in संवत् १८२९.

[H. T. Colebrooke.]

2461, 2462.

3262, 3263. Foll. 215 and 183; size 11¾ in. by 5½ in.; good modern Devanāgarī writing; ten lines in a page.

Śārīrakamīmāṃsābhāshya, or *Śrībhāshya*, by *Rāmānujācārya*.

Vol. i. contains *pāda* 1; vol. ii. *pādas* 2-4 (of foll. 82, 70 and 31 resp.).

2463.

7. Foll. 396; size 13¾ in. by 4½ in.; seven lines in a page; beautifully written.

Mīmāṃsābhāshya, an incomplete copy of *Rāmānuja's* commentary, the fourth *adhyāya* being wanting.

The first *adhyāya* ends fol. 225*b*, the second fol. 317*a*, the third fol. 396*b*.

[J. R. Ballantyne.]

2464.

3274. Foll. 81; size 10½ in. by 5⅛ in.; 19 or 20 lines in a page; good modern writing.

Śārīrakamīmāṃsābhāshya, an incomplete copy of *Rāmānuja's* commentary, containing the second (ends fol. 35), third (ends fol. 67) and fourth *adhyāyas*.

[A. C. Burnell.]

2465.

2797. Foll. 46 (the leaves are put in the wrong way; one page of each leaf is left blank, every two leaves, as the original numbering shows, being intended to be pasted together; there is a double numbering in Sanskrit figures, one running from ३ to २४, the other, probably the original one, from २७ to ४८); size 11 in. by 4¼ in.; 11–14 lines in a page; good old writing, of the sixteenth century.

Śrībhāshyavivṛiti, a fragment of a short commentary on the *Śrībhāshya*. The beginning is lost. The second page, being 27*a* of the original numbering, contains *sūtra* 24 (ज्योतिश्चर॰) of the first *pāda* of the first *adhyāya*. This first *pāda* ends fol. 31*a* of the original numbering: इति श्रीभाष्यविवृतौ प्रथमः पादः ॥ The second *pāda* begins: सर्वत्र=नैतद्युक्तं। वाक्यभेदो ऽपौरुषेये न दोषः (सर्वत्र is the beginning of the first *sūtra* of the second *pāda*). The last page contains the end of the third *pāda* of the first *adhyāya*.

[Coll. of Fort William.]

2466.

332a. Foll. 89; size 12¼ in. by 4½ in.; eleven lines in a page.

Vedāntadīpa, an exposition of the *Vedānta* according to the *Brahmasūtras*, by *Rāmānuja*. See Hall's Index, p. 95, no. xxxvi., Aufrecht's Oxford Cat., p. 221*b*, no. 536, Rāj. Mitra's Notices, ix., p. 221, no. 3141.

It begins:

श्रियः कांतोऽनंतो वरगुणगणैकास्पदवपुर्
हताशेषाऽवद्यः परमखपदो वाङ्मनसयोः ।
अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ॥ १ ॥

प्रणम्य शिरसाचार्यान् तदादिष्टेन वर्त्मना ।
ब्रह्मसूत्रपदांत(:)स्यवेदांतार्थः प्रकाश्यते ॥ २ ॥

अत्रेयं वेदविदां प्रक्रिया अचिद्वस्तुनः स्वरूपतः स्वभावतश्चात्यंतविलक्षणस्तदात्मभूतश्चेतनः etc.

The first *pāda* ends fol. 28*a*, the second fol. 48*b*, the third fol. 77*b*.

Digitized by Microsoft ®

Colophon: इति श्रीभगवद्रामानुजाचार्यविरचिते वेदांतदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तो ऽध्यायः ॥

Date: संवत् १८५० समैनाम कार्तिक । वदि १३ वारमुक्र etc.

[H. T. COLEBROOKE.]

2467.

1779. Foll. 28; size 12¾ in. by 4 in.; excellent, modern Devanāgarī writing; European paper (water-mark 1859); five lines in a page.

Vedāntatattvasāra, by *Rāmānuja.*

It begins: श्रीमते रामानुजाय नमः॥ सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यत्राद्वितीयशब्देन सजातीयादिभेदशून्याङ्गीकारे कथं तादृशस्य जगद्व्यापारः। मायाङ्गीकारेणेति चेत् किं तदानीं निर्विशेषज्ञानमात्रस्वरूपं ब्रह्म माया तिष्ठतीति जानाति न वा। जानाति चेत् ज्ञानमात्रस्य कथं ज्ञातृत्वं। न जानाति चेत् अज्ञात्वा कथमङ्गीकरोति। अपि च यत्किंचिच्छक्तियोगो मायाङ्गीकारानंतरमभ्युपेयते भवद्भिः। तत्पूर्वं मायाङ्गीकारानुगुणशक्त्यभ्युपगमे निर्विशेषत्वहानिः किं च तदानीं किं मायाविलक्षणं ब्रह्म उतावैलक्षण्येन मायात्मकं। यदि विलक्षणं वस्तुतः परिच्छेदादनंतत्वं ब्रह्मणो न स्यात् अथ मायात्मकं तर्ह्यङ्गीकारवचनं निरर्थकं ॥ ०

It ends:

सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः।
न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि।
वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः॥

एष आत्मा अपहतपाप्मा परास्य शक्तिर्विविधैव श्रूयते तत्त्वं नारायणः पर इत्यादिश्रुतिः स्मृतिः नारायणस्यैव परतत्त्वं दिव्यकल्याणगुणयोगेन सगुणत्वं प्राकृतहेयगुणराहित्येन निर्गुणत्वमिति विषयभेदवर्णनेन एकस्यैवावगमात् ब्रह्मद्वैविध्यं दुर्वचनं इति दिक्॥ इति श्रीरामानुजाचार्यविरचितं वेदांततत्त्वसारं संपूर्णम्॥ शुभमस्तु॥

The first few pages contain interlineary renderings by Ballantyne's hand.

This work is different from the *Vedāntasāra* described by Rāj. Mitra, Notices, ix., p. 222, no. 3142.

[J. R. BALLANTYNE.]

2468.

3264. Foll. 16; size 11¾ in. by 5⅝ in.; good modern Devanāgarī writing; eleven lines in a page.

Vedāntatattvasāra, by *Rāmānujācārya*; a second copy.

2469.

2011b. Foll. 10; size 8½ in. by 4⅝ in.; 12–14 lines in a page; indifferent writing.

Tattvamuktāvalī Māyāvādaśatadūshaṇī, a refutation of the *advaita* theory, in a hundred and twenty verses, by *Gauḍa Pūrṇānanda Kavicakravartin.*

See Hall's Index, p. 160, no. ccci. The *Tattvamuktāvalī* is quoted in the *Rāmānujadarśana* of the *Sarvadarśanasaṃgraha*, p. 51 (Bibl. Ind.), cp. Aufrecht's Oxford Cat., p. 247*a*.

It begins:

अनु(ग)तजनपालः क्रूरभूपालपालस्
तरुणतरतमालश्यामलो नन्दबालः।
बहुकिरणविशालः सर्वशक्तिप्रबालः
स जयति धृतमालः पुण्ड्रकोद्भासिभालः॥ १॥

पौराणिकोऽयं स्वमतानुसारि
प्रातः पुराणं पठति प्रकामम्।
शृणोति भक्तः प्रणिधानपूर्वं
ग्रन्थार्थतात्पर्यनिविष्टचेताः॥ २॥

जीवात्मनोरैक्यमतं विहाय भेदं
तयोः स्थापयति स्म युक्त्या।
श्रुतिं स्मृतिं तत्र बहुप्रमाणं
कृत्वानुमानं बहुधा तनोति॥ ३॥

जीवो ऽयं ब्रह्मणो भिन्नः परिच्छिन्नो यतः सदा।
इत्यादिबहुधा ज्ञेया अनुमानेषु हेतवः॥ ४॥

The copy is dated: शके १७३२ प्रमोदे ज्येष्ठसिताष्टम्यां भानौ समाप्तिमगमत्। [J. TAYLOR.]

Digitized by Microsoft®

7. *Madhvācārya's Dvaitavidyā.*

2470.

539b. Foll. 18; size $9\frac{3}{8}$ in. by $3\frac{1}{2}$ in.; seven lines in a page.

Kṛishṇāmṛitamahārṇava, a poem of 235 *ślokas* in praise of *Kṛishṇa,* by *Ānandatīrtha,* disciple of *Śuddhānanda.*

Ānandatīrtha is also called *Ānandagiri, Ānandajñāna* (for other variations of this name see Aufrecht's Cat. Cat., p. 46), and *Madhva.* His name before initiation was *Vāsudevācārya.* He died in the Śaka year 1119. Other particulars, a sketch of his system, and the Succession list of the High-priests of the *Mādhva* Sect, will be found in Bhandarkar's Report, 1882–83, pp. 16–19, and 202–208. Commentaries by *Ānandagiri,* on works of *Śaṅkara,* have been already noticed in nos. 2279, 2301.

It begins:

श्रीवेदव्यासाय नमः ॥ श्रीहनुमद्भीममध्वेभ्यो नमः ॥

अर्चितः संस्मृतो ध्यातः कीर्तितः कथित(:) स्तुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥ १ ॥

तापत्रये चासंतप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शांतये तस्य कृष्णामृतमहार्णवं ॥ २ ॥

ते नराः पशवो लोके किं तेषां जीवनै(*r.* °ने) फलं ।
यैर्न लब्धा हरेर्दीक्षा नार्चितो वा जनार्दनः ॥ ३ ॥

The end is (cp. no. 2478):

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पक्षो द्वितीयं वपुर्
मध्वो यत्तु तृतीयमेतदमुना ग्रंथः कृतः केशवे ॥ २३३ ॥

श्रीमदानंदतीर्थार्यसहस्रकिरणोदिता ।
गोनति(? *r.* गोमती) सततं सेव्या गीर्वाणो (? °णी)
[सिद्धिदा भवेत् ॥ २३४ ॥

यः सर्वगुणसंपूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमसुहृत् ॥ २३५ ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यवर्योदाहृताः कृष्णामृतमहार्णवः समाप्तः ॥ श्रीहनुमद्भीममध्वांतर्गतश्रीरामकृष्णवेदव्यासात्मकश्रीहयग्रीवश्रीलक्ष्मीनृसिंह ॥ श्रीवेंकटकृष्णार्पणमस्तु ॥

यादृशी(!) पुस्तकं दृष्ट्वा°
यदक्ष(रं) करभष(*r.* °भ्रष्टं) मात्र(ा)हीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

बदरीनारायणार्पणमस्तु आर्यावर्तैकदेशे = रौ द्रि सं° पुष्पकृष्णे त्रयोदश्यां इंदुवासरे ॥ श्रीविष्णुपूजास्तु ॥

[H. T. COLEBROOKE.]

2471.

1935. Foll. 167; size $10\frac{1}{2}$ in. by 4 in.; 11–14 lines in a page; clear old writing, of the 17th century.

Tattvaprakāśikā, a commentary on *Ānandatīrtha's Brahmasūtrabhāshya,* by *Jayatīrtha Bhikshu,* disciple of *Akshobhyatīrtha,* the first and the second *adhyāyas. Jayatīrtha* was the sixth in the list of the high-priests of the *Mādhva* sect; he died in the Śaka year 1190, see Bhandarkar's Report, 1882–83, p. 203.

The commentary begins: श्रीवेदव्यासाय नमः ॥ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः ॥ निर्विघ्नमस्तु ॥

शुद्धानंदो(? दौघ)संविद्युतिबलबहलौदार्यवीर्यादिदेहं
चिंतासंतापलेपोद्भवमृतिमुखराशेषदोषातिदूरं ।
सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगाद्
गम्यं वंदे मुकुंदाभिधममलमलं ब्रह्मवेदांतवेद्यं ॥ १ ॥

In the next verses some words are illegible, the writing being partly obliterated on the right side of the page. The 4th verse begins:

श्रीमध्वसंसेवनलब्धशुद्धविद्यासुधाभोनिधयो … ॥ ४ ॥

श्रीमद्रमारमणसन्निरिपादसं(गं)
व्याख्यानिनाददलिताखिलदुष्टदर्पं ।
दुर्वादिवारणविदारणदक्षदीक्षम्
अक्षोभ्यतीर्थमृगराजमहं नमामि ॥ ५ ॥

अथ तत्कृपया ब्रह्मसूत्रभाष्यं यथामति ।
व्याकुर्वे श्रीमदानंदतीर्थार्यमुखनिःसृतं ॥ ६ ॥

Digitized by Microsoft ®

गंगासंगेन नैर्मल्यं रथ्याद्भिर्लभ्यते यथा ।
वाचो विशुद्धिशुद्ध्यर्थं संगम्यते . . . . ॥ ७ ॥

अथाविद्यापटलपिहितनयनैरन्यैरन्यथा व्याख्यातानि ब्रह्मसूत्राणि यथाव(द् व्या)चिख्यासुर्भगवानाचार्यवर्यः प्रारिप्सितभाष्यस्य कैवल्याद्यखिलफलसाधनतासिद्ध्यर्थं निरतनाय(*r.* निरंतराय?)परिसमाप्त्याद्यर्थं च नारायणनमस्कारं ग्रथयति ॥ ग्रंथारंभं च प्रतिजानीते । नारायणमिति ॥

The first *adhyāya* ends fol. 71*a*.

Colophon: इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां जयतीर्थभिक्षुविरचितायां तत्त्वप्रकाशिकायां द्वितीयाध्यायस्य चतुर्थः पादः ॥

[Dr. J. Taylor.]

2472.

1662. Foll. 69; size $8\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; 8–10 lines in a page; fair writing, of the first half of the 17th century.

Tattvoddyotavivaraṇa, a commentary on *Ānandatīrtha's* (i.e. *Madhva's*) *Tattvoddyota*, by *Jayatīrtha Bhikshu.* The *Tattvoddyota* is a treatise on *Brahman*, soul and world, against the *māyā-vādins* and *śūnya-vādins.*

The *vivaraṇa* begins:

विश्वोत्पत्तिरिति ध्वंसकारणं रमणं श्रियः ।
अभिवंद्य यथाबोधं तत्त्वोद्योतं विवृणमहे ॥ १ ॥

इहाविद्यातिमिरनिरंतरे संसारकांतारे परिखिन्नानामल्पास्थिरसुखखद्योतिकासु द्योतमानास्वपि मनःप्रसादमनासादयतामधिकारिणामनंतानंदनिदानस्य परमपुरुषतत्त्वोद्योतस्य सिद्धये समीहमानो भगवानाचार्यसूर्योंतरायविधुरोऽपि निरंतरायप्रारिप्सितपरिसमाप्त्यादेरंगमिष्टदेवताभिपूजनं शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति ॥

सर्वत्राखिलसच्छक्तिः स्वतंत्रोऽशेषदर्शनः ।
नित्यातादृशचिच्चेतयंतेशो नो रमापतिः ॥ १ ॥

This *śloka* is the introductory verse of the *mūla.* The final *śloka* of the *mūla*, written by the author himself, is:

सत्यचिच्चेत्यपतये मुक्तामुक्तोत्तमाय ते ।
नमो नारायणार्यवृंदवंदितपदद्वयं(*sic!*) ॥

चिच्चेत्ययंतृतोपपादनं सत्येति । मुक्तामुक्तोत्तमायेति च । आर्येत्यादि तु नारायणस्यैव नम्यत्वोपपादनार्थमिहाशेषमतिमंगलं ॥

But *Ānandatīrtha* allowed some *ślokas* composed by his pupils to be added to his work. See the story, fol. 67*b*, l. 6: इतः परं भगवदाचार्यशिष्यप्रणीताः श्लोकाः । एवमत्र कथां कथयति । पुंडरीकवनाभिधानेन मायिना सह भगवत आचार्यस्य कथाप्रवृत्तौ सत्यां सभ्यसभापतिप्राश्निकेषु मीलितेषु आचार्यदर्शनमात्रेण भीतः प्रतिवादी तूष्णीं बभूव । तदाचार्येण तस्याकर्णयतः सतः मायामतनिकृंतनोष(न्या)सोऽयं निर्मितः । तच्छ्रवणेनात्यंतसंत्रस्तहृदयोऽसावपलायत । तदा त्वाचार्यशिष्याः प्रतिवादिभयंकरं भगवंतमाचार्यं तदभीष्टदेवतां नृसिंहं चोपश्लोकयां बभूवुः । ते च श्लोका अविच्छिन्नप्रवृत्तये शिष्यैरर्थितेन भगवता प्रकरणांते निवेशिताः । अत एव ते जाह्नवीजलानुगतयामुनोदकवत्प्रमाकरणांतर्गता एव । अना(*r.* अनेक)कर्तृकत्वान्न तेषामन्योन्यसंगतिः ।

आनंदतीर्थपुंसिंहो मायावादिदितेःसुतान्* ।
विदार्य युक्तिनखरैरप्रतीतोऽभिभासते ॥

पलायध्वं पलायध्वं त्वरया मायिदानवाः ।
सर्वज्ञहरिरायाति तर्कागमदरारिधृत्† ॥

द्रवत द्रवताशु मायिनः प्रविशध्वमतंद्रिता गुहाः ।
कमलारमणांबराश्रयः समुदेत्यखिलज्ञभास्करः† ॥

नृहरिः सकलनामकः(!) समुपैति हि मायिदानवान् ।
प्रपलायनमत्र तत्क्षमं त्वरया वा(*sic!*) वसतिर्गुहासु च† ॥

जयत्यानंदतीर्थेष्टदेवता नरकेसरी ।
विपाटिताज्ञानतमःकपाटात्युरुहुंकृतः† ॥

जयत्यमितपौरुषः स्वजनतेष्टचिंतामणिः ।
अजेशमुखवंदितो गुणगणार्णवः श्रीपतिः ॥

जनता जनसमूहः । इष्टसिद्धौ चिंतामणिरिष्टे चिंतामणिः ॥

सर्वज्ञः सन्मुनीद्रोच(:) सन्मनःपंकजालयः ।
अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥

रमाबाहुलतयोराश्रयो रमाबाहुलताश्रयः ॥

---

* The commentator says: मायावादिदितेःसुतानिति षष्ठ्या आक्रोश (*Pā.* vi. 3, 21) इत्यलुक् ।

† No explanation of this passage is given in the commentary.

Digitized by Microsoft®

श्रीमदानंदतीर्थाय हृदयांभोजमंदिरः ।
कमलाश्लेषरसिकः प्रीयतां नः पुरः पुमान् ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिततत्त्वोद्योतविवरणं जयतीर्थभिक्षुणा विरचितं समाप्तं ॥

कृष्णे भाद्रपदे मासि पंचम्यां भृगुवासरे ।
गिरिणा पुस्तकमिदं लिखितं रामतुष्टये ॥ १ ॥

कष्टेन पुस्तकमिदं लिखितमेवास्तु सतां ।
सज्जनैरवलोक्याथ यत्नेन परिपालयेत् ॥

॥ विरोधकृतसंवत्सरे ॥

[H. T. Colebrooke.]

2473.

1725b. Foll. 19; size 8 in. by 3½ in.; fair Devanāgarī writing of c. 1750 A.D.; nine lines in a page.

Prapañcamithyātvānumānakhaṇḍana-vivaraṇa, a commentary, by *Jayatīrtha Bhikshu*, on *Ānandatīrtha's Prapañcamithyātvānumānakhaṇḍana*, the text of which is also given. It begins:

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्मः प्रपंचमिथ्यात्वमानखंडनपीचकां(? r. पीठिकां) ॥

जन्माद्यस्य यत इति सूत्रेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितं । न च जगत्सत्यतामंतरेण तद्वास्तवं संभवति । सापि न परोदीरितप्रपंचमिथ्यात्वप्रमाणस्याभासताव्युत्पादनेन विनोपपद्यत इति तदर्थमिदं प्रकरणमारभते भगवानाचार्यः । ननु कथं स्वपक्षसाधनेन विना निर्णयः । सत्यं । तथापि शास्त्रार्थैकदेशसंबंधित्वात्प्रकरणस्य न दोषः । विज्ञायते च कालातीतव्युत्पादनेन स्वपक्षसाधनप्रकारो ऽपि अविगीतशिष्टाचारपारंपरादिप्राप्तं प्रारिप्सितपरिसमाप्त्यादिप्रयोजनं किमपि मंगलाचरणं प्रकरणादौ कस्मादाचार्यो नानुष्ठितवानिति चेत् । कथमेतदवगतं । अनुपलंभादिति चेत् । न । तात्कालिकस्य अधुनोपलब्धुमशक्यत्वात् । ग्रंथे निवेशनाभावस्तावत्प्रत्यक्ष इति चेत् । किमतः । न हि ग्रंथे निवेशनमेव तदनुष्ठानं । नापि तद्व्याप्तं । कायकवाक्चित्तानामनेकेषां भावात् । ग्रंथांतरनिवेशनादेव शिष्या अवगमिष्यंति । अत एव न तदनुष्ठाने संदेहो ऽपीति । तत्र तावन्मायावादिनोदितं प्रपंचमिथ्यात्वानुमानमनुवदति । विमतं मिथ्यादृश्यत्वात् । यदित्थं तत्तथा यथा संप्रतिपन्नं । सर्वं मिथ्येत्युक्ते ब्रह्मणि प्रमाणाभावः । शुक्तिरजतादौ सिद्धार्थता च स्यादिति विमतमित्युक्तं ।०

It ends:

तद्वचनमुदाहरणं प्रसिद्धमेवेति ।
यत्प्रसादाद्यत्प्रीत्यैवेदं प्रकरणं ॥

कृतं तमेवाचार्यो ऽन्ते स्तुतिप्रणामाभ्यां प्रीणयति ।

यो दृश्यते सदानंदनित्यव्यक्तिचिदात्मना ।
निर्दोषाखिलकल्याणगुणं वंदे रमापतिं ॥

दृश्यत इत्यनेन दृश्यते त्वया बुद्ध्येत्यादिश्रुतिं सूचयति । तेन यदुक्तमात्मनो ऽपि दृश्यत्वादिति तदुपपादितं च भवति ।०—।

उत्पत्तिस्थितिभंगं विश्वं यस्मात्प्रपद्यते पुरुषात् ।
स जगति जगदंतर्यामी मम रमानाथः ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितप्रपंचमिथ्यात्वानुमानखंडनविवरणं जयतीर्थभिक्षुविरचितं समाप्तं ॥

For the text of the original treatise see Burnell, Tanjore MSS., p. 105*a*.

[H. T. Colebrooke.]

2474.

1932. Foll. 44; size 9½ in. by 4 in.; careless, modern Devanāgarī writing; 9 or 10 lines in a page.

Dvaitasiddhi, or *Dvaitavidyā*, a treatise on the dualistic doctrine of the *Vedānta*, by *Nirmalācārya*, pupil of *Śrīnivāsa*.

It begins:

निःसीमसुंदरं पूर्णं शक्तिपूर्वगुणाकरं ।
ध्येयं ब्रह्मभवादीनां गोप्रवेषं हरिं भजे ॥ १ ॥

द्वैताद्वैतमते सम्यग् ज्ञात्वा नत्वा गुरोः पदं ।
प्रकाश्यते द्वैतविद्या ऽद्वैतसिद्धांतकृंतनी ॥ २ ॥

नन्वेतदयुक्तं । द्विविधं हि वेदांतवाक्यं । एकं पदार्थनिष्ठं । यथा सत्यं ज्ञानमनंतं ब्रह्म योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिरित्यादि तत्त्वं पदार्थपरमपरं ऐक्यरूपवाक्यार्थनिष्ठं ॥ यथा तत्त्वमसीत्यादि । द्वयमप्यखंडार्थनिष्ठं । ब्रह्मविदाप्नोति परमित्यादौ किं तद्ब्रह्म को ऽयमात्मा को ऽहमस्मीति प्रस्तुतस्वरूपमात्रजिज्ञासायां सत्यादिवाक्यप्रवृत्तेर्विशिष्टार्थत्वे प्रामाण्यानिर्वाहात् ।०

It ends:

सर्वत्र चतुरध्याय्यां श्रीमध्वमतमीक्ष्यतां ।
चिंत्यतां श्रीपतेः पादयुगलं तन्मुदाप्यतां ॥

Digitized by Microsoft®

सम्यङ्मन: समाधाय तात्पर्येणावलोक्यतां ।
निर्मलाचार्यरचना वचनार्थविदा मुदा ॥

इति श्रीमच्छ्रीनिवासाचार्यवर्यशिष्यनिर्मलाचार्यकृता द्वैतसिद्धि: समाप्ता ॥ [DR. JOHN TAYLOR.]

2475.

1669. Foll. 81; size 9 in. by $3\frac{5}{8}$ in.; indifferent modern Devanāgarī writing; nine lines in a page.

Paratattva-prakāśikā, an exposition of the *Vedānta* system according to the views of *Ānandatīrtha*, by *Vijayīndra*, pupil of *Surendra*. See Hall's Index, p. 113, no. cxiii.

It begins:

क्रोधोदग्रच्छटाग्रै: शिथिलितविगलत्तारकाहारहारी
नक्षत्रस्वच्छमुक्तावचलित[⏑⏑]विच्छन्नसच्छायकाय: ।
रक्षोवक्षोविनिर्यत्क्षतजनिघुसृणालेपजातावलेप:
सो ऽव्यान्नो व्याजसिंहो मिलितजयरमो वीरभृंगार-[धारी ॥ १ ॥

कल्याणगुणपूर्णाय वल्लभाय श्रिय: सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नम: ॥ २ ॥ ° ५ ॥

मूको ऽपि वावदूकेंद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भवे ॥ ६ ॥

विजयींद्रयतींद्रेण विद्वदानंददायिनी ।
तन्यते तत्त्वविद्रीत्या परतत्त्वप्रकाशिका ॥ ७ ॥

इह नित्यनिर्दोषतयामकशिष्टै:(!) स्वीकृतप्रमाणभावेषु सदेव सौम्ये°

It ends: भयसमाधेयत्वादुपेक्षित इति सर्वमनवद्यमिति सिद्धांतसंक्षेप इति ॥

सुरेंद्रमुनिशिष्येण विजयींद्राख्यभिक्षुणा ।
नृसिंहप्रीतये ऽकारि परतत्त्वप्रकाशिका ॥

ये मीमांसकमुद्रया श्रुतिशिरस्तात्पर्यभूमि: परं
तत्त्वं श्रीहरिरेव नान्यदिति तन्निश्चेतुमुद्युंजते ।
तत्तत्त्वे दृढभक्तिसंपदमित: प्राप्तुं च तैरन्वहं
सेव्योऽयं विजयींद्रसंयमिवचोगुरु:(*r.*° ग्रंथ: ?) सुधा-[स्वादिमा ॥ २ ॥

इति श्रीपरतत्त्वप्रकाशिका समाप्ता ॥

[H. T. COLEBROOKE.

2476.

2022. Foll. 93; size $9\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; indifferent, modern Devanāgarī writing; ten lines in a page.

Tarkatāṇḍava, a treatise on the dualistic *Vedānta* theory, by *Vyāsayati*, pupil of *Brahmaṇyatīrtha*, the *Anumānapariccheda*. *Vyāsayati* died in 1339, see Aufrecht, Cat. Cat., p. 619.

It begins: एवं तन्मुख्यं ज्ञानशब्दयोरिति अनुप्रमाणेषु वेदरूप: शब्द: प्रमाणमित्युक्तत्वात्तदनुग्राहकमनुमानमुच्यते ॥ निर्दोषोपपत्तिरनुमा । उपपत्तिर्व्याप्यं । निर्दोषत्वेन विशेषणात्नासिद्धादावतिव्याप्ति: । उक्तं हि पद्धतौ । उपपत्तिर्लिंगं व्याप्यमिति पर्याया इति । °

परोक्तव्याप्तिलक्षणभंग: fol. 11*a*; खंडनोक्तव्याप्तिनिश्चयानुपपत्तिभंग: fol. 16*a*; प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खंडनोक्तसार्वज्ञ्यप्रसंगभंग: fol. 18*b*; परोक्तपक्षलक्षणभंग: fol. 21*a*; उदयनाद्युक्तोपाधिलक्षणभंग: fol. 26*a*; मण्युक्तोपाधिलक्षणभंग: fol. 30*b*; तार्किकोक्ततृतीयज्ञाननियमभंग: fol. 34*a*; प्राभाकरोक्तज्ञानद्वयहेतुत्वभंग: fol. 37*b*; मण्युक्तपरामर्शप्रक्रियाभंग: fol. 38*b*; व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभंग: fol. 39*a*; केवलव्यतिरेकिभंग: fol. 53*b*; अत एव विष्णुतत्त्वनिर्णयटीकायां° fol. 56*a*; पंचावयवादिनियमभंग: fol. 60*b*; अप्रसिद्धविशेषणत्वस्य दोषत्वभंग: fol. 73*a*; व्यधिकरणासिद्धे दोषत्वभंग: fol. 75*a*; गौतमोक्तहेत्वाभासपंचत्वभंग: fol. 79*a*; मण्युक्तहेत्वाभाससंकरभंग: fol. 86*b*; मणिकंठोक्तहेत्वाभाससंकरभंग: fol. 90*b*; लीलावत्युक्तहेत्वाभासचातुर्विध्यभंग: fol. 92*a*; भासर्वज्ञोक्तहेत्वाभाससाप्तविध्यभंग: fol. 92*b*.

It ends: एतदेवाभिप्रेत्योक्तं प्रमाणलक्षणे । असिद्धिरव्याप्तिरिति हेतुविरोध इति ॥ सामान्येन परोक्तहेत्वाभासनियमभंग: ॥ – – ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना विरचिते तर्कतांडवे ऽनुमानपरिच्छेद: ॥ [DR. J. TAYLOR.]

2477.

539c. Foll. 30; size $9\frac{5}{8}$ in. by $3\frac{3}{4}$ in.; 10–14 lines in a page; clumsy writing of the beginning of the 19th century.

Digitized by Microsoft®

Tattvasāra, a *paurāṇik* poem on *sṛishṭi* and *mukti* of beings, in 12 *adhyāyas*, by a follower of *Madhva*. Foll. 4*b*, 25*b*, and in the last colophon, it has the epithet, "*Sūta-Śaunaka-saṃvāda.*"

It begins:

अस्मद्गुरुगदेहस्थभारतीगतवायुगं ।
सीताधवमहं वंदे रामं मेऽभीष्टदायकं ॥ १ ॥

नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः ।
दीक्षीता(!) वैष्णवे यज्ञे सूतं पप्रच्छुरादरात् ॥ २ ॥
ऋषय ऊचुः ।
सूत सूतमहाभाग वद नो वदतां वर ।
व्यासप्रसादा(त्) सर्वं हि त्वं नु जानासि तत्त्वतः ॥
नारायणो योगनिद्रां कृत्वोद्बुद्धः परः पुमान् ।
एतदारभ्य पाद्माख्यब्रह्मा सृष्टिं समापयत् ॥ ३ ॥
इत्येतदंतं वाक्येषु पुराणानां क्वचित् क्वचित् ।
नानाविधतया प्रोक्तं तत्तात्पर्यं वदस्व नः ॥ ४ ॥
सर्वं विचार्य निर्णीय व्यासानुग्रहतः सदा ।
निद्राप्रकारं कथय विष्ण्वादीनां तु सर्वशः ॥ ५ ॥

एतदन्य(च्च) वक्तव्यं यदवश्यं प्रतीयते ।
तत्सर्वं चैव वद नः सूत शुश्रूषवो वयं ॥ ६ ॥

इत्युक्तः कथयामास व्यासशिष्यो हि सर्ववित् ।
सूतः समस्तजीवनिद्रैव विष्णुनिद्रेति कीर्तीता(!) ॥ ७ ॥

रमानिद्रा तु सा ज्ञेया जगद्व्यापारवर्जनात् ।
हरेरत्यंतसामीप्यात् या च सेवा प्रकीर्त्तिता ॥ ८ ॥

प्राप्तव्यानंदविरमात् क्रमानंदस्य भोजनं ।
स्वबिंबरूपध्यानं तु हरिपूजादिवर्जनं ॥ ९ ॥

हरिगर्भप्रवेशेन मुक्तनिद्रा प्रकीर्त्तिता ।
तृणजीवान् समारभ्य ह्या गंधर्वांस्तु मानुषान् ॥ १० ॥

मुक्तियोग्या निरंशास्तु प्रतीकालंबनाः स्मृताः ।
तेषां स्वबिंबं ध्याने तु स्थूलदेहहृदब्जगं ॥ ११ ॥

It ends:

ध्यानप्रकारः कथितः मनोनिर्मलताप्रदः ।
इत्येतत् कथितं सर्वं यद्यत्पृष्टं भवद्भिर्वै ॥ ५० ॥

न वक्तव्यं तु सर्वेषां पुरतो मानिनां क्वचित् ।
न नास्तिकाय क्रू(रा)य नाभक्ताय शठाय च ॥ ५१ ॥

अविज्ञातस्वरूपाय न च पंडितमानिने ।
वक्तव्यं भक्तियुक्ताय चिरंज्ञातस्वरूपिणे ॥ ५२ ॥

आस्तिकायानहंकारकारिणे प्रीतये हरिं ।
एतच्छ्रुत्वा तु मुनयो हर्षनिर्भरमानसाः ॥ ५३ ॥

शशंसुस्साधुवादैस्तु सूतं पौराणिकोत्तमं ॥ ५४ ॥

इति श्रीतत्त्वसारो ऽयं प्रीत्यै माधवमध्वयोः ।
भूयात् सतां सुसुखदः मनोवाक्संस्थितः सदा ॥ ५५ ॥

अस्मद्गुरुगदेवस्थभारतीगतवायुगः ।
सीताधवस्तनेनाद्धा(?)रामो मे प्रीयतां सदा ॥ ५६ ॥

इति श्रीतत्त्वसारे सूतशौनकसंवादे द्वादशोऽध्यायः ॥

[H. T. Colebrooke.]

2478.

603b. Foll. 30; size 9¾ in. by 4½ in.; careless Devanāgarī handwriting of about the beginning of the 17th century; 11 or 12 lines in a page.

Vāyustutistotra, a hymn in praise of *Ānandatīrtha* treated as an incarnation of *Vāyu* (*Vishṇu*), by *Trivikramācārya*; with a commentary by *Vedāṅgatīrthabhikshu*.

The commentary begins:

निर्योनोनोस्त्वविद्यौघं(?) भक्तं भक्तौघको हरिः ।
निघ्नो निरस्तदोषाणां भग्नभूतेशकार्मुकः ॥ १ ॥

चिदानंदतनुं वंदे सदा पद्मालयान्वितं ।
वंदावदं(?) च सूत्राणां पदा मितजगत्त्रयं ॥ २ ॥ ° ४ ॥

व्याख्यानच्छद्मना मुख्यप्राणसद्गुणचिंतनां ।
करोम्यालोच्य पूर्वेषां व्याख्यानं बुद्धिशुद्धये ॥ ५ ॥

अस्य वायुस्तुतेर्गूढभावार्थोया यथामति ।
वेदाप्त(*r.* वेदाङ्ग)यतिना व्याख्या क्रियते ऽन्वयवात्मना
[(? वायवात्मना) ॥ ६ ॥

इह हि पूर्वापरदाक्षिणोत्तराशाध्वनिनिर्गलकीर्तिस्तत्त्वप्रदीपिकाकर्ता सकलकविकुलशिरोमणिः सकलाचार्यवर्यो भगवान् त्रिविक्रमाचार्यः प्रधान(*r.* ° नं)वायोरवतारत्रयं तत्प्रयोजनज्ञाननानेन(!) सज्जीवाननुजीवयितुं वायुस्तुतिं चिकीर्षुश्चिकीर्षितग्रंथपरिसमाप्त्यादिप्रयोजनसाधकं आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यत(म)प्रबंधस्य ° मंगलमादावंगीकरोति । श्रीमद्विष्णवंघ्रीति ॥

Digitized by Microsoft®

The text begins:

श्रीमद्विष्ण्वंघ्रिनिष्ठातिगुणगुरुतमश्रीमदानंदतीर्थ-
त्रैलोक्याचार्यपादोज्ज्वलजलजलसत्पांसवो ऽस्मान्पुनंतु।
वाचां यत्र प्रणेत्री त्रिभुवनमहिता शारदा शारदे तु
ज्योत्स्नाभद्रस्मितश्रीधवलितककुभा प्रेमभारं बभार॥१॥

There are forty-one stanzas, the commentary on which ends fol. 27*a*: इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमाचार्यविरचितस्य वायुस्तुतिस्तोत्रस्य टीकायां श्रीमद्वेदांगतीर्थभिक्षुविरचितायां समाप्तं ॥

Then follow thirteen more couplets on *Vishṇu*, with a commentary; the first couplet being (cp. p. 797*a*):

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
षट्मड्दर्शितपौष्यमेव(?) निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पक्षो द्वितीयं वपुर्
मध्वो यत्तु तृतीयमेतदमुना ग्रंथः कृतः केशवे ॥ १ ॥

[H. T. Colebrooke.]

2479.

1103a. Foll. 17; size 12¾ in. by 4¾ in.; sixteen lines in a page; writing indifferent, about the end of the 18th century.

Madhvavidhvaṃsana, a commentary on the *Madhvamukhabhaṅga,* by *Appayya Dīkshita,* son of *Raṅgarāja Adhvarivara,* who also wrote the text. See Hall's Index, p. 114, no. cxv. *Appayya Dīkshita's* work is a refutation of *Madhva's* wrong interpretation of the *Vedānta.* It seems to be divided into five sections, the first of which is wanting here. The MS. begins with a discussion of the second *sūtra* of the *Vedānta* system (जन्माद्यस्य यत इति); the first words being: जन्मादिसूत्रे परकीयमिदमधिकरणं यदुक्तं तद्विजिज्ञासस्व तद्ब्रह्मेति विचारविधिवाक्ये ब्रह्मपदेन जीवविलक्षणस्य ब्रह्मणा विचार्यस्य समर्पणात्सविषयमिदं शास्त्रमिति तन्न घटते ।

The words of the text are marked with red colour: the first piece of this kind, on the first page, begins तत् ब्रह्मेत्यस्य रूढ्या, but it bears some number between 30 and 40. Fol. 4*b* ends the second *adhikaraṇa* (see the marginal note in Colebrooke's handwriting), and begins the discussion of the third *sūtra* of the *Vedānta* system (शास्त्रयोनित्वादिति). Fol. 8*b* ends the third *adhikaraṇa.* Here *Appayya Dīkshita* calls his work आनंदतीर्थकृतशास्त्रमुखावमर्दे. Fol. 10*b* ends the fourth section; on fol. 15*a* the annihilation of *Madhva* is complete, in the sixtieth *śloka* of the text. The last piece of the text has the number 62, fol. 17*a*.

The end is: अथ स्वनाम ग्रंथनाम च कीर्त्तयन् प्रकरणसमाप्तिं दर्शयति

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरंगराजमखिनः श्रितचंद्रगोभिर्
अस्त्यप्पिदीक्षित इति प्रथमस्तनूजः ॥

योऽयं मितपदमकरोत् महितार्थं मध्वशास्त्रमुखभंगं ।
प्रीत्यै पुरामरातेः श्रीकामाक्षीसमेतस्य ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभे श्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पिदीक्षितस्य कृति मध्वमुखभंगव्याख्यानं मध्वविध्वंसनं समाप्तं ॥

[H. T. Colebrooke.]

---

8. *Nimbāditya.*

2480.

164. Foll. 106 (and one *truṭipatra,* 12*); size 12⅛ in. by 4½ in; twelve lines in a page; fair writing.

Śārīrakamīmāṃsābhāshya, a commentary on the *Vedāntasūtra,* by *Bhāskara Ācārya.* This was the original name of *Nimbāditya,* see Wilson, Relig. Sects, vol. i., p. 1; Hall, Index, p. 115. In the colophons of chapters the author is called *bhagavad-Bhāskara,* with the exception of *Adhy.* iv., p. 3 (fol. 102*b*), where he is called *Nimbabhāskara.*

Digitized by Microsoft®

Nimbāditya (*Nimbārka, Niyamānanda*) was a disciple of *Nārada;* and his followers are called *Sanakādi-sampradāyins*, or (popularly) *Nīmāvats;* see also Rāj. Mitra, Notices, iii., p. 184.

It begins:

सनकादिकशिष्याय नारदाय महात्मने ।
नत्वाहं भास्कराचार्य्यः सूत्रभाष्यं स निर्ममे ॥ १ ॥
जन्मबन्धविनिवृत्तिकारणं ब्रह्मसूत्रमिदमुद्बभौ यतः ।
श्रोतृचित्तकमलैकभास्करं बादरायणमृषिं नमामि तम् ॥ २ ॥
सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशनात् ।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये ॥ ३ ॥

अथातो ब्रह्मजिज्ञासा ।

The first *adhyāya* ends fol. 38*a*, the second fol. 66*b*, the third fol. 93*b*.

Date of the copy: संवत् १८२९ पौष्यशुक्लपंचम्यां चन्द्रे वासरे । [H. T. Colebrooke.]

2481.

3273. Foll. 112; size 13 in. by 6½ in.; fourteen lines in a page; good modern writing.

Śārīrakamīmāṃsābhāshya, a second copy of *Bhāskara's* commentary.

It begins जन्मबन्ध°, omitting the preceding couplet.

The colophon is: श्रीमद्विद्वच्चक्रचूडामणिः श्री श्री १०५ श्री श्रीमद् शृंगराचार्याणां पठनार्थं इदं पुस्तकं श्रीवृंदावने दिव्यदेशमध्ये लिपिकृते दासानुदासस्य च दासदासः पुरुषोत्तमरामानुजदास इदं पुस्तकं ॥ समत् १९११ चैत्रशुक्लपक्षे तिथौ ष्टम्या ८ गुरुवासरे पुष्यनक्षत्रे श्रीरस्तु शुभं भूयात् ।

[A. C. Burnell.]

2482.

1638a. Foll. 27; size 10½ in. by 4¼ in.; fairly good, modern Devanāgarī writing; ten lines in a page.

Nimbādityabhāshyasya vyākhyānam, glosses on *Nimbāditya's* commentary on the *Vedāntasūtra*.

It begins: इह खलु तत्त्वज्ञानात्परमः पुरुषार्थो भवतीति श्रुतिस्मृतिपुराणादिसिद्धं । तत्र तत्त्वं श्रीभागवते वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं । ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति वाक्यात्°

Fol. 4*b*: अथातो ब्रह्मजिज्ञासा ॥ अत्र ब्रह्मशब्देन सगुणं निर्गुणं च । अत एवाग्रे अस्ति°

The second *carana* ends fol. 12*b*, the last *sūtra* commented upon corresponding to i. 2, 29, अभिव्यक्तेरित्याश्मरथ्यः ।; whilst the first *sūtra* of the third *carana* corresponds to i. 3, 19, उत्तराच्चेदाविर्भूतस्वरूपस्तु ।

Adhy. iii. ends fol. 26*b*.

The MS. ends: इति द्रष्टव्यमिति भाष्यं अनेनोभयरूपत्वमुक्तं ॥

इति श्रीनिंबादित्यभाष्येण (!) शारीरकभाष्यस्याविरोधेन व्याख्यानं ॥ वेदांतश्रीमच्छंकराचार्यभाष्यसंगमनम् ॥ पत्र २७ ग्रंथसं· ९५० इति संपूर्णम् ॥ [H. T. Colebrooke.]

2483.

3043. Foll. 57; size 11¾ in. by 5¼ in.; thirteen lines in a page; written in the middle of the 18th century.

Vedāntaratnamañjūshā, a commentary on *Niyamānanda's Daśaślokī*, by *Purushottama Ācārya*. See Hall's Index, p. 114, nos. cxvi. and cxvii. Some of the dates given by Hall, and by Bhandarkar, Report, 1882-83, p. 20, appear in the introduction of the commentary. *Niyamānanda* (or *Nimbārka, Nimbāditya*) was a Tailinga Brahman. He wrote also a work called *Vedāntapārijātasaurabha*. He was the *guru* of *Śrīnivāsa*, who again was the *guru* of *Purushottama*. *Niyamānanda* is represented as an *avatāra* of *Vishṇu's Disk*, and *Śrīnivāsa* as an *avatāra* of *Vishṇu's Shell*.

The work begins:

यो ब्रह्मेशसुरर्षिवंदितपदो वेदांतवेद्यो हरिस्
तं वंदे मनसा गिरा च शिरसा श्रीश्रीनिवासं गुरुं ।
कंठे यस्य चकास्ति कौस्तुभमणिर्वेदांततत्त्वात्मको
भक्तैः श्रीहृदये शरण्यमगतेः कारुण्यसिंधुं मुदा ॥ १ ॥

Digitized by Microsoft ®

इह सकलब्रह्मरुद्रादिकिरीटकोटिवंदितपादपीठेनानंताचिंत्यस्वाभाविकस्वरूपशक्तिवैभवेन ज्ञानबलैश्वर्यवीर्यकारुण्यवात्सल्यदयातितिक्षाद्यनंतकल्याणगुणार्णवेन जगज्जन्मादिहेतुना सर्वश्रुतिशिरोरत्नवेदांतवेद्यचरणेन रमानिवासेन भगवता श्रीवासुदेवेन विष्णुनात्मस्थापितवेदमार्गसंरक्षणाय नियुक्तो निरतिशयात्मप्रिय आत्मशक्त्युपबृंहितानंतशक्तिः स्वहस्ताधारको निजायुधः कोटिसूर्यसमप्रकाशो भगवान् सुदर्शनो ऽवनितलावतीर्णस्तैलिंगद्विजवरात्मना तस्मिन्नेव देशे नियमानंदाभिधो भगवदीयां सनातनीं कलौ नष्टां वेदांतसंततिं प्रवर्त्तयिष्यन् शारीरकमीमांसावाक्यार्थरूपवेदांतपारिजातसौरभाख्यादिग्रंथरचनव्याजेन सर्ववेदांतार्थसंग्रहेण संदर्भयामास । तस्य च विधिप्राप्तोपनयनादिसंस्कृताधीतषडंगश्रुतिजिज्ञासितधर्ममीमांसानिरस्तकर्मफलादिविषयसंदेहकतत्फलनिर्विण्णभगवद्दिदृक्षालंपटगुरुभक्तिसंपन्नमुमुक्ष्वधिकारिकत्वेनानंताचिंत्यापरिमितस्वरूपगुणशक्तिवैभवपरब्रह्मभूतश्रीवासुदेवविषयकत्वेन श्रीभगवद्भावापत्तिलक्षणमोक्षप्रयोजनकत्वेनाचिंत्यापारातिगंभीरातिशयत्वमाकलय्य मंदमतीनां सर्वशास्त्रार्थजिज्ञासूनां शिथिलप्रयत्नानां शास्त्रार्थविचारासमर्थानां मुमुक्षूणामुपकारार्थवेदांतरत्नभूतां शास्त्रार्थकामधेनुं दशश्लोकीमपि निर्ममे । तथा च तत्रैवोक्तं स्वयमेव अथाधीतषडंगवेदेन कर्मफलविषयकक्षयाक्षयत्वोभयप्रकारवाक्यजन्यसंशयाविष्टेन तत एव जिज्ञासितधर्ममीमांसानिश्चितकर्मतत्फलविषयकज्ञानवता कर्मब्रह्मज्ञानफलयोः सांतत्वानंतत्वसातिशयत्वनिरतिशयत्वविषयकव्यवसायजातनिर्वेदेन भगवत्प्रसादेप्सुणा(!) तद्दर्शनेच्छालंपटेनाचार्यैकदेवेन गुरुभक्त्यैकहार्देन मुमुक्षुणानंताचिंत्यस्वाभाविकस्वरूपगुणशक्त्यादिभिर्बृहत्तमो यो रमाकांतः पुरुषोत्तमो ब्रह्मशब्दाभिधेयस्तद्विषयका जिज्ञासा सततं संपादनीयेति वाक्येन तथा च शास्त्रं स्वाध्यायोऽध्येतव्यः (।) स गुरुमेवाधिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं (।) यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते (।) परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन (।) जुष्टं यदा पश्यत्यन्यमीशं (।) यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिं (।) यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैव कथिता ह्यर्था(:) प्रकाशंते महात्मनः (।) तमक्रतु(:) पश्यति वीतशोकः धातु(:)प्रसादान्महिमानमात्मनः (।) यमेवैष वृणुते तेन लभ्यः (।) सर्वे वेदा यत्पदमामनंति (।) तं त्वौपनिषदं पुरुषं पृच्छामः (।) नामानि सर्वाणि यमाविशंति शास्त्रयोनित्वात् वेदैश्च सर्वैरहमेव वेद्यः (।) निरंजन(:) परमं साम्यमुपैति तन्महिमानमिति वीतशोकः बहवो ज्ञानतपसा पूता मद्भावमागताः मम साधर्म्यमागता तन्निष्ठस्य मोक्षव्यपदेशात् तत्तु समन्वयात् नमामि सर्ववचसां प्रतिष्ठा यत्र शाश्वतीत्यादि भाषितं चेदं वाक्यं श्रीशंखावतारैः श्रीनिवासाचार्यचरणैः उक्तं च विश्वाचार्यचरणैः

शंखावतारः पुरुषोत्तमस्य
यस्य ध्वनिशास्त्रमचिंत्यशक्तिः ।
यत्स्पर्शमात्रात् ध्रुव आप्तकामस्
तं श्रीनिवासं शरणं प्रपद्ये ॥

इति तस्याश्च मिताक्षरैः कोष्ठचतुष्टयात्मका वेदांतरत्नमंजूषाख्या मितव्याख्या यथामति विधीयते तत्र प्रथमे पदार्थे रत्नसंग्रहः द्वितीये संप्रदायनिर्णयपूर्वकतत्प्राप्तवाक्यार्थरत्नसंग्रहः तृतीये साधनकदंबरत्नसंग्रहः चतुर्थे पूर्वोक्तशास्त्रार्थस्मरणपूर्वफलरत्नसंग्रहः इति विवेकः ॥

The first section ends fol. 29*a* : इति श्रीभगवत्पुरुषोत्तमाचार्यविरचितायां वेदांतरत्नमंजूषायां सिद्धांतरत्नविवृतौ पदार्थसंग्रहाधारो नाम प्रथमा कोष्ठिका ॥

The second section ends fol. 36*a* : °वाक्यार्थसंग्रहाधारो नाम द्वितीया कोष्ठिका समाप्ता ॥

The third section ends fol. 50*b* : °साधनसंग्रहाधारो नाम तृतीया कोष्ठिका ॥

The end is :

मंदानामुपकाराय तुष्टये तत्त्वदर्शिनां ।
श्रीकृष्णप्रीतयेऽयं मे कृतो वेदांतसंग्रहः ॥ १ ॥
प्रसीदतु रमाकांतो गोपीजनमनोहरः ।
करोतु जगतां श्रेयो मंगलायतनो हरिः ॥ २ ॥
यः श्रीनिवासो ऽखिलवेदगेयो
न यत्स्वरूपं प्रविशं(f)त तर्काः ।
यो ध्यानयोगेन विशुद्धसत्त्वैर्
दृष्टो मुकुंदो ह्युपयामि सं(*r.* तं) गुरुं ॥ ३ ॥

हरिः ओं तत्सदिति श्रीपुरुषोत्तमाचार्यविरचितायां वेदांतरत्नमंजूषायां सिद्धांतरत्नविवृतौ फलादिरत्नसंग्रहः कोष्ठस्तुरीयः समाप्तोऽयं ग्रंथः ॥

[Dr. J. R. Ballantyne.]

2484.

3100. Foll. 31 ; size 9½ in. by 5 in. ; modern Devanāgarī writing ; thirteen lines in a page.

Laghu-Vedāntaratnamañjūshā, an abridgment of the preceding commentary.

Digitized by Microsoft®

It begins:

वरेण्यं ब्रह्माद्यैर्विविधविबुधैर्वंद्यमतिशं
सुवेद्यं वेदांतैर्भवविटपिबीजं यदुपतेः ।
शरण्यं सर्वेषां चरणकमलं नौमि सततं
सदा वृंदारण्ये पशुपपशुवृंदानुगमनं ॥ १ ॥
नत्वाद्याचार्यपादाब्जं स्मृत्वा कृष्णपदांबुजं ।
लघुमंजूषिका टीका दशश्लोक्याः करोम्यहं ॥ २ ॥
मंजूषैवात्र संक्षेपाल्लिखिता यत्र कुत्रचित् ।
विलक्षणं च बालानां सुखबोधो यतो भवेत् ॥ ३ ॥
इह खलु °

Colophon: इति श्रीलघुमंजूषायां फलरत्नसंग्रहाधारो नाम चतुर्थकोष्ठिका समाप्ता ॥

[J. R. BALLANTYNE.]

2485.

3056. Foll. 22; size 11¼ in. by 4 in.; 9 to 11 lines in a page; fair writing.

Daśaślokībhāshya, called *Siddhāntapushpāñjali*, a commentary on *Nimbārka's Daśaślokī*, by *Harivyāsa Deva*. *Nimbārka's* parents were *Jagannātha* and *Sarasvatī*. He composed the *Daśaślokī* for his pupil *Śrīnivāsa*. See Hall's Index, p. 114, no. cxvi. and p. 115, no. cxix.

Also the text of the ten *ślokas* is given.

The commentary begins:

विद्युद्भासा मेघवर्णो गुणाब्धि-
र्दोषैर्हीनश्चिद्धनो ऽनन्तशक्तिः ।
वेदैर्वेद्यः सर्वगो विश्वहेतुः
श्रीमान् कृष्णः पातु सर्वेश्वरो ऽस्मान् ॥ १ ॥
निम्बार्को दशभिः श्लोकैः
प्रोचो (r. प्रोचे) तत्त्वानि तत्त्ववित् ।
व्याचष्टे तान् हरिव्यासः
संक्षिप्तश्रुतियुक्तिभिः ॥ २ ॥

जगन्नाथाद्भागवताद्विप्रात्स सरस्वत्यां तत्न्यां (r. पत्न्यां) भगवान्निम्बार्को वैशाखशुक्लतृतीयायामाविर्भेवुवः (r. बभूव?) स कदाचिच्छ्रीनिवासेन शिष्येण तत्त्वानि परिपृष्टः सत्यवादी दशभिः श्लोकैस्तान्युवाच दुरधिगमः खलु बहुशास्त्राभ्यासः°

The first *śloka* of the *Daśaślokī* treats on *jīva* (fol. 2*b*):

ज्ञानस्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ॥१॥

The commentary ends:

ब्रह्म सत्यं जगत्सत्यं सत्यं भेदमपि ब्रुवन् ।
निम्बार्को भगवान्विद्भिः सत्यवादिनि गच्छते (? r. °वादी निगद्यते) ॥
सिद्धान्तपुष्पाञ्जलिनाम भाष्यं
जातं हरिव्यासमुनेर्मुखास्यात् ।
एतन्मदीयैः परिचिन्त्य धीरैर्
उपासनीयो व्रजराजसूनुः ॥

[J. R. BALLANTYNE.]

2486.

556a. Foll. 78; size 12½ in. by 5½ in.; fair Devanāgarī writing of A.D. 1776; twelve lines in a page.

Svadharmādhvabodha, an exposition of the tenets and religious practices of the *Vaishṇava* sect of *Nīmāvats*. Incomplete. The work seems to consist of two parts (*pañcaka*), the first of which was composed by the founder of the sect, *Nimbāditya* or *Nimbārka*; and the second by *Rāmacandra*.

The MS. contains only the fourth chapter of the first, and the fourth, fifth and sixth chapters of the second, *pañcaka*.

It begins:

श्रीकृष्णपादाद्यघशेषवाहानैतिह्यभूतान्स्वगुरून्प्रणम्य ।
संवर्णयिष्ये तिलकं विविक्तं निंबार्कवाक्येन समाश्रयेण ॥१॥
अथ श्रीमन्निंबादित्यः संचिंतयंल्लोकं हरेः (!) ।
श्रीनिवासं कृपापात्रं निजं त्विदं वचो ऽब्रवीत् ॥ २ ॥
श्रीनिवास तिलकस्य प्रवर्तकं च संभवं ।
शृणु वक्ष्ये सप्रमाणं सर्वथा विश्रमाय ते ॥ ३ ॥
विष्णुचंदननामेदं कृष्णस्य परमधाम्नि (!) ।
कृष्णांगेषु परिलिप्तं तत्रत्यपरितुष्टिदं ॥ ४ ॥ °

इति श्रीस्वधर्माध्वबोधे हंसवंशे पुंड्रनिर्देशो नाम चतुर्थो ऽध्यायः ॥ fol. 7*b*.

Digitized by Microsoft®

The next chapter (? II. 4) begins:

यन्नामबद्धा भवसिंधुपारा
नावो यथा बद्धवितानवन्ता:(? ०वर्ता:) ।
भक्तानुकूलं गुरुकर्णधारास्
तं वासुदेवं शरणं प्रपद्ये ॥ ०

इति श्रीस्वधर्माध्ववोधे स्वभूवंशरामचंद्रेण विरचिते नामनिर्देशो नाम चतुर्थो ऽध्यास: ॥

Chapter II. 5 begins fol. 15*a*:

श्रीराधिकाकांतपदारविंदकिंजल्कपीयूषपरागरेणून् ।
संभावयंत: स्वगुरूपदिष्टान्निंबार्कमाचार्यमनुव्रजाम: ॥ ०

This chapter, which might be expected to have concluded the work, ends with three *ślokas*: औदुंबर्युक्ति:* ॥ एवं हि निंबार्क उपादिशच्च ० ॥

भावग्रामे विद्यमानो न दृश्यते बहिर्मुखै: ।
निंबादित्यो ० ॥
नमस्तस्मै भगवते निंबादित्याय श्रीमते ।
शास्त्रसारोद्धारेण यो मंत्रं विशदीचकार(!) ॥

इति श्रीस्वधर्माध्ववोधे द्वितीयपंचके मंत्रनिर्देशो नाम पंचमो ऽध्यास: ॥

Ch. II. 6 begins fol. 36*a*:

श्रीराधिकाकृष्णपदारविंदयुग्मद्वयं नित्यमहं प्रपद्ये ।
श्रीविग्रहौ सेव्यतमौ ययोर्वै संसेव्य संयांति परानुरागं ॥

It ends:

वंदे श्रीमन्निंबादित्यपदद्वंद्वं सदानत: ।
येन जीवोपकाराय संस्क्रिया विशदीकृता ॥

इति श्रीस्वधर्माध्ववोधे हंसवंशे स्वभूवंश्यरामचंद्रेण विरचिते द्वितीयपंचके श्रीनिवासाचार्यनिंबार्कसंवादे यागनिर्देशो नाम षष्ठो ऽध्यास: समाप्तश्चायं(!). द्वितीयपञ्चकं संवत् १८३३ आश्विन्मासे शिते पक्षे पंचम्यायां गुरुवासरे रामकृष्णदासेन लिखितं काश्यां मध्ये जुगलकेशोरपठनार्थं संपूर्णम् ॥

For a complete MS. of the first *pañcaka*, see Rāj. Mitra, Notices, iii., p. 183.

[H. T. Colebrooke.]

* Neither the three *ślokas* that follow, nor the preceding one, are found in the MS. of the *Audumbarī Saṃhitā*.

2487.

556b. Foll. 89; same size; fair Devanāgarī writing of the earlier part of last century; ten lines in a page.

Audumbarī Saṃhitā (*Vratapañcakanirṇaya*), another *Vaishṇava* treatise, of the same sect, by *Audumbara Ṛishi*, disciple of *Nimbārka*.

It begins: ओं अथौदुंबरी संहिता लिख्यते ॥

श्रीमंतौ राधिकाकृष्णौ कांक्षितौ प्रणमाम्यहं ।
यावाश्रित्य गदिष्यामि व्रतपंचकनिर्णयं ॥

चतुर्नारदनिंबार्कान्पारंपर्यान् गुरून्निजान् ।
नत्वा तन्मतमादृत्य व्रतपंचकमुच्यते ॥

श्रीनिवासाचार्यवर्यो निंबादित्यमुखांबुजात् ।
नित्यकृत्यं निशम्याद्धा नैमित्तिकं सुपृष्टवान् ॥

नित्यकृत्यमवर्णयो ऽहर्निड्भागपंचके ।
पक्षादिवर्षपर्यंतं नैमित्तिकं वद प्रभो ॥

एवमामंत्रितो हार्दं निंबादित्य उवाच तं ।
श्रीनिवासानुग सम्यक्पृष्टं ते सकलोचितं ॥

संपादयितुमिष्टं ते प्रवक्ष्ये व्रतपंचकं ।
पक्षादिवर्षपर्यंते काले निर्णेष्यते यत: ।
नैमित्तिकं करणीयं पंचव्रतपरायणै: ॥

एकादशीकृष्णमहोत्सवव्रतं स्वैतिह्यसंस्कारविधिव्रतं तथा ।
अंघ्रिप्रसादव्रतमेकभावत: श्रीराधिकाकृष्णयुगार्चनव्रतं ॥

सत्यागहृद्रागविहिंसनव्रतं संतो वदंति व्रतपंचकं त्विदं ।
एकादशीकृष्णमहोत्सवव्रतं तत्रैकमाहुश्च समन्वयव्रतं ॥ ०

This treatise, like the preceding one, has chiefly been compiled from *Purāṇas*.

इति श्रीपरमहंसवैष्णवाचार्यश्रीनिंबार्कभगवत्पूज्यपादशिष्येणौदुंबरर्षिणा कृत एकादशीकृष्णजन्मोत्सवव्रतनिर्णय: ॥ fol. 79.

It ends:

नमो नारायणायादौ कुमाराय ततो नम: ।
नारदाय नमस्तस्माद्गुरवे परमात्मने ॥

तुरितमकृतहंसाकारमाविर्मुकुंदो
हरिरिह निजभक्तिं तानयिष्यत्कुमारान् ।
हृदयविषयसंत्यागे विधाय्यादिशद्य:
प्रथमगुरुमहं तं हंसरूपं प्रपद्ये ॥

Digitized by Microsoft®

यदनुगमनशीला वैष्णवाः संप्रदायाद्
इह च परमहंसाः संज्ञया सूच्यमानाः ।
विशदहृदयतो राधामुकुंदौ भजंते
निजभजननिदानं हंसरूपं भजे तं ॥

शिवविधिकमलास्त्रैगुण्यरीत्यादिशद्यः
प्रलयजननरक्षोभ्य(*r.* °क्षाभ्यः) समग्रार्थकारी ।
सकलगुरुतमं तं कृष्णदेवं सदाद्यं
परमपुरुषमीशं हंसरूपं प्रपद्ये ॥

अगुणविधित उच्चैर्भक्तियोगं स्वहार्दं
सनकवरमुनीनां दिष्टवान्यो मुकुंदः ।
भवभयहरणं तं वासुदेवं गरिष्ठं
सततमरणमद्धा हंसरूपं प्रपद्ये ॥

इमां हंसचतुःश्लोकीं पठतां पापनाशिनीं ।
त्रिसंध्यं यः पठेत्स स्यात्परमहंसवैष्णवः ॥

एवं व्रतपंचकं स्वं श्रीनिवासानुगाय यः ।
आदिष्टवान्नमस्तस्मै निंबादित्याय धीमते ॥

इति श्रीपरमहंसवैष्णवाचार्यश्रीनिंबार्कभगवत्पूज्यपादशिष्येणौदुंबरर्षिणा कृतः सत्यांगहृद्वागविहिंसनव्रतनिर्णयः ॥

[H. T. COLEBROOKE.]

---

9. *Doctrine of Faith* (*Bhakti*).

2488.

8. Foll. 67; size 13¼ in. by 4 in.; European paper; good Devanāgarī writing; five lines in a page.

Śāṇḍilya-sūtra, a century of aphorisms inculcating the doctrine of faith as the sole means of attaining final emancipation; with *Svapneśvara's* commentary, entitled *Śatasūtrīya Bhāshya.*

The authorship of the *sūtras* is wrongly ascribed to *Śāṇḍilya,* probably on the ground that his tenet as to the efficacy of devotional meditation on the Brahman is (apparently approvingly) referred to by the author.

Text and commentary have been edited by J. R. Ballantyne (1861), and translated by Prof. E. B. Cowell (1878), for the Bibliotheca Indica.

This seems to have been Ballantyne's hand-copy from which the edition was prepared; there being numerous interlineary notes and readings, apparently added by himself.

[J. R. BALLANTYNE.]

2489.

2937. Fol. 1; size 10¾ in. by 5½ in.; fair, modern Devanāgarī writing; seventeen lines in a page.

Śāṇḍilya-sūtra, without the commentary.

[J. R. BALLANTYNE.]

2490.

2116b. Fol. 1; size 9¼ in. by 4 in.; indifferent Devanāgarī writing of about A.D. 1650; 21 lines in all.

Pushṭipravāhamaryādāgrantha (or *-bheda*), a treatise, in twenty-five couplets, on the threefold path to faith (*bhakti*), indicated in the title; by *Vallabha Dīkshita,* the founder of the *Vaishṇava* sect of the *Gokulastha-Gosvamins* (*Gosāins*) or *Rudra-sampradāyins.*

It begins:

पुष्टिप्रवाहमर्यादाविशेषेण पृथक् पृथक् ।
जीवदेहक्रियाभेदैः प्रवाहेण फलेन च ॥ १ ॥
वक्ष्यामि सर्वसंदेहा न भविष्यंति यच्छ्रुतेः ।
भक्तिमार्गस्य कथनात्पुष्टिरस्तीति निश्चयः ॥ २ ॥
द्वौ भूतसर्गावित्युक्तेः प्रवाहो ऽपि व्यवस्थितः ।
वेदस्य विद्यमानत्वान्मर्यादा ऽपि व्यवस्थिता ॥ ३ ॥

It ends:

दुर्ज्ञास्ते भगवत्प्रोक्ता ह्यज्ञास्ता ननु ये पुनः ।
प्रवाहे ऽपि समागत्य पुष्टिस्थस्तेन युज्यते ॥ २५ ॥
सो ऽपि तैस्तत्कुले जातः कर्मणा जायते यतः ॥
इति श्रीवल्लभदीक्षितविरचितः पुष्टिप्रवाहमर्यादाग्रंथः समाप्तः ॥

[GAIKAWAR.]

Digitized by Microsoft®

2491.

2126b. Foll. 27; size $9\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; indifferent Devanāgarī handwriting; 8–11 lines in a page.

Pushṭipravāhamaryādāvivaraṇa, a commentary on the preceding treatise, by *Pītāmbara*, son of *Śrī Yadupati*, and pupil of *Vallabha's* son.

It begins:

नमः श्रीवल्लभाचार्यचरणाब्जनखेंदवे ।
पुष्टिप्रवाहमर्यादास्तारका येन शोभिताः ॥ १ ॥
न भेदस्ते कुत्राप्यतिरुचिर किंतु प्रियतया
विभेदो ऽतः स्वामिन् कृपय मयि दासे ऽतिविधुरे ।
विभेदः केन स्यात्स्वकृतनिजपुष्टेरितरथा
प्रवाहादेः स्वीयप्रणतचरणप्रापक विभो ॥ २ ॥
श्रीवल्लभसुतचरणांभोरुहमकरंदमत्तमधुपस्य ।
जयति निगूढत्रिसरणिमालत्यां तस्य झंकारः ॥ ३ ॥

इह हि विरूपत्वेन भगवदंशत्वेन तुल्येषु जीवेषु केषांचित्पुरुषोत्तमप्राप्तिः केषांचिदक्षरस्य केषांचित्स्वर्गादेः केषांचिदंधतमसमाश्रूयते इति कुतः फलभेदः कुतो वा स्वभावभेदः कथं वा केषांचित्स्वभावविरुद्धे देहक्रिये इतरेषां च तदनुरूप इत्यादिप्रकारेण मेधाफलविवरणादिग्रंथश्रवणादन्यतश्च संदिहानानां च संदेहवारणाय तदुपायभूतमार्गतत्सांकर्यं निरूपयितुं बहूनां भेदज्ञानादेव निवृत्तिं हृदिकृत्य मार्गत्रयभेदनिरूपणं प्रतिजानते ॥ पुष्टीत्यादि । एतन्मार्गत्रयं विशेषेणोत्कर्षादिरूपव्यावर्तकधर्मेण जीवादिभेदैः सर्गपरंपराया अविच्छेदेन फलेन च पृथक् पृथक् भिन्नं भिन्नं यथा स्यात्तथा वक्ष्यामीत्यर्थः ॥ ०

It ends:

इति श्रीवल्लभाचार्यचरणाब्जनखेंदुना ।
शोभितास्तारका यास्ताः स्वबुद्ध्या विशदीकृताः ॥ १ ॥
निपुणं विभाव्य सततं विलसद्-
रससिंधुचंद्रमुखवागमृतं ।
विकृतं मयास्य कृतमेतदहो
सरहस्यमस्ति विबुधैकसुखं ॥ २ ॥

श्रीवल्लभनंदनचरणरेणवैकतानश्रीयदुपतितनयपीतांबरविरचितं पुष्टिप्रवाहमर्यादाविवरणं समाप्तं ॥ संवत् १७६८ श्रावणशुदि २ सूर्यपुरे जगदीश्वरेण धीरेश्वरात्मजे[न] गोपीपुर मध्यस्थितहरिगोविंदसादासगृहे लिखितं ॥

Cf. F. Hall, Index, p. 147, where a *Pushṭipravāhamaryādābhedavivaraṇa* is ascribed to *Vallabhācārya* himself. [GAIKAWAR.]

2492.

2366c. Foll. 3; size $7\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; indifferent Devanāgarī writing of the early part of last century; thirteen lines in a page.

Pattrāvalambana, a short treatise on the conduct of life, by *Vallabha Dīkshita*.

It begins: श्रीगोपीजनवल्लभाय नमः ॥

लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः ।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा ॥ १ ॥
लोके शब्दार्थसंबंधो रूपं तेषां च यादृशं ।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत् ॥ २ ॥
ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैव कुत्रचित् ।
वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः ॥ ३ ॥
ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित् ॥ ४ ॥ ०

It ends: [partly in prose.

स्थापितो ब्रह्मवादो हि सर्ववेदांतगोचरः ।
काशीपतिस्त्रिलोकेशो महादेवस्तु तुष्यतु ॥
कस्यचित्त्वथ संदेहः स मां पृच्छतु सर्वथा ।
न भयं तेन गंतव्यं ब्राह्मणानामियं गतिः ॥ [मयात्र हि ।
डिडिस्तु(? डिंडि° comm.)वादितो द्वारि विश्वेशस्य
विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ॥

इति श्रीवल्लभदीक्षितानां पत्रावलंबनं संपूर्णं ॥

See Hall's Index, p. 160.

Vallabhācārya was born in 1478, and died in 1530; see Aufrecht's Cat. Cat., p. 555. [GAIKAWAR.]

2493.

2080c. Foll. 13; size $8\frac{7}{8}$ in. by 4 in.; eight lines in a page; large Devanāgarī writing.

Brahmavādārtha, a commentary on *Kṛishṇavallabha's* (i.e. *Vallabhācārya's*) *Pattrāvalambana*, by *Tāpīśa*, his pupil. It begins:

नत्वा शारदपूर्णेंदुं श्रीकृष्णवल्लभं गुरुम् ।
पत्रावलम्बनव्याख्यां तापीशस्तनुते स्फुटम् ॥ १ ॥

Digitized by Microsoft®

सभायां सिंहवन्नैजममर्दमतमासुरम् ।
सन्नकैमुपजीव्यैव सर्वत्र विजयी भव ॥ २ ॥
लौकिको वैदिकश्चैव ०

It ends :

गिरिं विभज्य रचितः पंथाः सुविदुषां प्रियः ।
अप्रसन्नैः प्रसन्नैर्वा भवितव्या न मे क्षतिः ॥

संवत् १७६१ वर्षे चैत्र वदि ११ गुलाबदासवकुरथ्येतु लिषितं ।

For some devotional tracts by *Vallabha* and his son *Viṭṭhaleśvara*, see nos. 2515–19.

[GAIKAWAR.]

2494.

2543d. Foll. 7; size 9¼ in. by 4 in.; legibly written, in Devanāgarī, c. 1750 A.D.; nine lines in a page.

Viṭṭhaleśasvatantroparilekha, annotations, by *Gopeśvara*, on a treatise by *Viṭṭhaleśa* (son of *Vallabha*), in which *Kṛishṇa* is identified with the Brahman of the Vedāntists.

It begins :

अथ श्रीमत्प्रभुचरणाः फलप्रकरणीयं स्वहार्दमर्थविशेषे शेषमुत्कटभगवद्भाववशात् प्रकटयितुकामाः श्रीमदाचार्यचरणातिशयितवात्सल्यविलासायितस्य तदीयस्यैव रहस्यतमस्यैतदर्थस्य स्फुटीकरणं कदाचित्तदनभिमतं चेदनुचितमिति भावस्वभावादेव संभावयंतः प्रकरणाध्यायार्थं कियतीभिः कारिकाभिर्विशदयंति ॥ प्रसीदेंत्विति । ०

It ends : तेन सर्वात्मभावादिनिरूपणस्य नार्थोत्तरप्रसंजकत्वं सर्वं रमणीयं ॥

श्रीवल्लभात्मज(न्म)श्रीविट्ठलेशांह्रिसेविना ।
गोपेश्वरेण लिखितमास्तामेतन्मुदे सतां ॥ १ ॥

इति श्रीगोपेश्वररचितः श्रीविट्ठलेशस्वतंत्रोपरिलेखः ॥

Cf. Hall's Index, p. 151 (*Svatantralekhana*).

[GAIKAWAR.]

2495.

2366b. Foll. 12; size 9 in. by 4¼ in.; fairly written, in Devanāgarī; fol. 1 by a different hand from the rest (apparently the same as that of the last MS.); nine lines in a page.

Vādakathā, a treatise advocating *Vallabha's* doctrines, by *Gopeśvara*, son of *Kalyāṇarāya*.

It begins :

जयंति श्रीमदाचार्यवाचो ऽपीमृतवर्षिणीः ।
पुमर्थादिगतभ्रांतितापो याभिर्निवारितः ॥

नन्विहानादौ संसारे केचन लोकायतिकास्त्यागभोजने प्रशंसंति । अन्ये तु स्वार्थमैश्वर्यादिकमेव यह्नु मन्यंते वदंति च ।

नमो ऽस्तु राजवृक्षाय षाड्गुण्यगुरुशाखिने ।
सामादिचारुपुष्पाय त्रिवर्गफलदायिन इति ॥

अपरे पुनः कीर्त्यर्थमेव यतंते वदंति च ।

यावत्कीर्तिर्मनुष्यस्य पुण्यालोकेषु गीयते ।
तावद्वर्षसहस्राणि पुण्यलोके महीयत इति ॥

केचन पुनः कामानेव साधयंति वदंति च । शरीरस्थितिहेतुत्वादाहारसधर्माणो हि कामाः फलभूताश्च धर्मार्थयोरिति । तथेतरे स्मार्ताध्याचारमाचरंति वदंति च। धर्मादर्थश्च कामश्च स किमर्थं न सेव्यत इति । आचारप्रभवो धर्म इति । ०

The *Padmapurāṇa* is quoted fol. 4*a*.

It ends :

तातस्य नत्वा चरणांबुजं
श्रीकल्याणरायस्य कृपांबुराशेः ।
ब्रह्मस्वरूपे स्वमतानुरूपां
गोपेश्वरो वादकथामकार्षीत् ॥ १ ॥
एतां समेतां सन्नकैः स्वसिद्धांतानुसारिणीं ।
कृष्णांतःकरणाः संतो मीमांसंतां मुहुर्मुहुः ॥ २ ॥

इति श्रीमत्प्रचंडपाषंडतमस्कांडविखंडननिजमतपुंडरीकप्रकाशनमार्तंडायमान- श्रीवल्लभाचार्यचरणमहोत्पलमधुव्रतायमानमानसेन स्वसिद्धांतसुधांतसुधांबुधिकलानिधिश्रीकल्याणरायांगजनुषा गोपेश्वरेण विरचिता वादकथा समाप्तिमगमत् ॥ ० संवत् १७६० नाववर्षे भाद्रपदमासे शुक्लपक्षे षष्ठी रवौ ॥ ० ॥

See Hall, Index, p. 128. [GAIKAWAR.]

2496.

2366a. Fol. 1; size 9½ in. by 4 in.; indifferent Devanāgarī writing of about A.D. 1700; twelve lines in a page.

Nijācārya-cintanaprakāra, a tract, in twenty-two *ślokas*, inculcating reverential meditations on *Kṛishṇa* and on *Vallabhācārya*, by *Dāsānudāsa*.

Digitized by Microsoft®

It begins:

अथ श्रीवल्लभाचार्यध्यानमत्र निरूप्यते ।
निवार्य सर्वसंदेहांस्तत्स्वरूपे कृपाबलात् ॥ १ ॥
व्रजस्त्रीहृदयं कृष्णवियोगभरभावितं ।
व्रजस्त्रियो ऽपि विरहभावप्राप्तिफलास्तथा ॥ २ ॥
नांतर्गृहगता लक्ष्मीस्तद्दशा अपि नैव हि ।
अधिष्ठानं विचिंत्यैवं कृष्णं तत्र विभावयेत् ॥ ३ ॥
भावात्मानं तत्र तापभावमास्यं विचिंतयेत् ।
साकारं को हि कंदर्पलावण्यं कृष्णमूर्तिमत् ॥ ४ ॥
सर्वतः पाणिपादांतमिति गीतावचोबलात् ।
मंतव्यावयवानां हि सर्वेषां कृष्णरूपता ॥ ५ ॥ ° १३ ॥
यथा भगवतो वाक्यं विपरीतरसे पुनः ।
तथा तद्भावसेवायामाचार्याणां वचो ऽमृतं ॥ १४ ॥
तस्माच्छ्रीवल्लभाचार्यप्रभुरेवं हि चिंत्यतां ।
सर्वलीलाकृतिः सर्वलीलाभोगाश्रयः सदा ॥ १५ ॥ °

It ends:

अस्मद्भाग्यनिधिर्नूनं निजपक्षैकपोषकः ।
अपारकरुणासिंधुर्दैवोद्धृतिपरायणः ॥ २१ ॥
भक्तिमार्गप्रकटनः श्रुतिसंदेहदाहकः ।
एवंविधः सदा श्रीमदाचार्यश्चिंत्यतां हृदि ॥ २२ ॥

इति श्रीमहासानुदासविरचितनिजाचार्यचिंतनप्रकारः समाप्तः॥

[Gaikawar.]

2497.

1368a. Foll. 26; size $9\frac{3}{4}$ in. by $4\frac{3}{4}$ in.; fair Devanāgarī writing of the latter part of last century; ten lines in a page.

Avatāravādāvalī, a series of polemical essays in defence of incarnation, and the doctrine of non-duality, by *Purushottama Dāsa*, son of *Pītāmbara*, and disciple of *Viṭṭhaleśa* (son of *Vallabhācārya*). Chapters viii., x. and xi.

VIII. *Pratibimbavāda*, begins:

ज्योतिस्तमालनीलं करुणाशीलं मुदा स्तौमि ।
हरति तमो निकुरंबं यत्प्रतिबिंबं स्वकीयानां ॥
नन्वेतदयुक्तं । प्रतिबिंबपदार्थस्यैवाभावात् । °

It ends:

श्रीविठ्ठलेशकृपया तत्त्वदीपप्रकाशतः ।
प्रतिबिंबं निश्चितवांस्तद्दासः पुरुषोत्तमः ॥

X. *Brāhmaṇatvajātikhaṇḍanavāda*, begins fol. 8*a*:

यच्छासनानुसारेण ब्राह्मणत्वादिदेवताः ।
देहे तिष्ठंति लोकस्य तं हरिं सर्वदाश्रये ॥
नन्विदमयुक्तं । बाधकाभावेन तेषां जातित्वोपगमात् । °

It ends:

पुरुषोत्तमदासेन श्रीपीतांबरसूनुना ।
सुबोधिन्युक्तरीत्यैवं ब्राह्मणत्वं विचारितं ॥

XI. *Jīvavyāpakatvakhaṇḍanavāda*, begins fol. 13*a*:

आत्मा नित्यश्चित्स्वरूपो ऽणुरेवं
यन्मायाक्तः स्वस्वरूपं न वेत्ति ।
सा तीर्णा स्याद्यत्प्रपत्त्यैव दैवं
तं श्रीकृष्णं भक्तियुक्तः प्रपद्ये ॥
ननु व्यर्थो ऽयमाडंबरः । आत्मनामेवाभावात्°

It ends:

एवं सुबोधिनीरीतिमनुसृत्यात्मनामिह ।
संसारिणां व्यापकत्वं युक्तिभिः शकलीकृतं ॥

इति श्रीमद्वल्लभनंदनचरणनलिनरजोरंजितोत्तमांगश्रीपीतांबरतनुजपुरुषोत्तमकृतावतारवादावल्यामेकादशो जीवव्यापकत्वखंडनवादः संपूर्णः ॥

For a MS. of chapter i. (*Prahastavāda*, beg. अभवदतिरसालं° fol. 325) see Raj. Mitra, Notices, ix. p. 120, no. 3019; for ch. xiii. (*Śrībhāgavatasvarūpavishayakaśaṅkānirāsavāda*), Aufrecht, Cat. Bodl., no. 94. [H. T. Colebrooke.]

2498.

1459c. Foll. 11; size $8\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; Devanāgarī writing of 1722 A.D.; 11–16 lines in a page.

Chapter xi. of the same work.

[H. T. Colebrooke.]

2499.

1395a. Foll. 25; size $13\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; 8 lines in a page; on yellow paper, written in the Bengalī character, in the 18th century.

Digitized by Microsoft®

Tattvasaṃgraha, an exposition of the *Vedānta* theory, by *Rādhāmohana Gosvāmin Bhaṭṭācārya*, of the family of *Advaitācārya* (*Advaitānanda*), the coadjutor of *Caitanya*. Apparently only the first part of the work, without subdivisions.

For a complete copy, see Rāj. Mitra's Notices, ii. p. 104, no. 688. It begins:

श्रीमदद्वैतवंशेन राधामोहनशर्म्मणा ।
प्रणम्य राधिकाकान्तं क्रियते तत्त्वसंग्रहः ॥

अथ तत्त्वनिर्णयः तत्परापरभेदेन द्विविधं तत्राद्यमाह द्वितीये ।

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

अन्वयं(*r.* अद्वयं) सजातीयनिष्ठभेदाप्रतियोगि । ज्ञानं स्वप्रकाशरूपं तत्त्वं परमार्थसद्वस्तु । तज्ज्योतिषां ज्योतिस्तस्य भासा सर्व्वमिदं विभातीति श्रुतेः ०

It ends:

न त्वाधाराधेयभावनियमकं तत् केवलं जडस्य प्रकृतिवाच्यत्वे विवादः पर्य्यवसित इति द्वैतपक्ष एव समीचीनः शुद्धाद्वैतवादिमतापेक्षया* ऽस्य विलक्षणत्वं प्रागेव प्रायो दर्शितमिति संक्षेपः ॥ इति कलियुगपावनावतारश्रीमदद्वैताचार्य्यचरणसरोजध्यायितद्वंश श्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचितस्तत्त्वसंग्रहः समाप्तः

[H. T. COLEBROOKE.]

2500.

2177C. Foll. 35; size 10¾ in. by 5 in.; indifferent Devanāgarī writing; 13–17 lines in a page.

Śrutisārasamuccaya, another exposition of the *Vedānta* doctrine, from a *Vaishṇava* point of view; in eighteen chapters (*parikaraṇa* !); by *Jñānasāgara*. Rather incorrect.

It begins (somewhat corrected):

गुरुरेक(:) परं ब्रह्म सच्चिदानंदसदाशिवः† ।
परमात्मा परं धाम तस्मादहं नमाम्यहं(!) ॥ १ ॥

आत्मानात्मविरोधं तु कथमेक(!) लभते प्रभो ।
जीवेश्वरसमं तत्त्वं स एव परमं पदं ॥ २ ॥

चित्तभ्रांतिं च सो द्वंद्व(!) निश्चित्य सो(?) निरामयः ।
मुमुक्षूणामुपदेशः श्रुतेः सारं च(*r.* सारस्य) संग्रहः ॥ ३ ॥

प्रज्ञानमानंदं ब्रह्म अहं ब्रह्मास्मीत्यव्ययं ।
तत्त्वमसि नेति नेति ह्येमायमात्मा(*r.* ह्येमो ऽयमात्मा) [ब्रह्मेति ॥ ४ ॥

अकर्म क्रियते कर्म अलक्ष्यमपि लक्ष्यते ।
अभक्ष्यं भक्षते योगी श्रुतिशास्त्रस्य संग्रहः ॥ ५ ॥

पंचभूतादितंमात्रा(*r.* तन्मात्रं?) दशेंद्रियसमन्वितं ।
मनो बुद्धिरहंकारचित्तजीवादिपंचकं ॥ ६ ॥

पंचिकृतं(*r.* ०ची०) तत्त्वमेतच्छरीरं स्थूलमुच्यते ।
षड्विंशको महाविष्णुः प्रोक्तस्तत्त्वविदां तु तत् ॥ ७ ॥

प्राणादिवायवः पंच मनोबुद्धींद्रियाणि च ।
शरीरं सूक्ष्ममेतस्मादपंचि(*r.* ची)कृतमेव हि ॥ ८ ॥

तदेव प्रकृतिः प्रोक्ता तत्त्वविद्भिः श्रुतेर्वलिः ।
तयोरैक्यं परं ब्रह्म विश्वरूपेतिशाब्दिकं ॥ ९ ॥

1. *Tattvabodhanī*, fol. 2; 2. *ātmānātmaviveka*, fol. 2*b*; 3. *sākshātkāra viśvarūpadarśana*, fol. 3; 4. *brahmaiva-karmavyavahārasādhanam*, fol. 4; 5. *mahāvākyopadeśa*, fol. 4*b*; 6. *prabodhavākya*, fol. 5*b*; 7. *paramārthanirṇaya* (?); 8. *jīvanmuktalakshaṇa*, fol. 7*b*; 9. *niḥpadvī*(?)-*aikyanirūpaṇa*, fol. 9; 10. *yajñāgnihotram*, fol. 10; 11. *prāṇahaṃsaśabda*, fol. 11; 12. *brahmasūtra*, fol. 12*b*; 13. *kaivalya*, fol. 13*b*; 14. *yogāshṭāṅgasiddhi*, fol. 15*b*; 15. *brahmavarṇaviveka*, fol. 21; 16. *āśramatrayaviveka*, fol. 25; 17. *āśramasaṃnyāsa*, fol. 28*b*.

It ends:

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं ॥ ४ ॥

श्रुतिशास्त्रसमुच्चयं ज्ञानसागरेण ग्रंथितं ।
संहिता परमहंसानां योगिनां मुक्तिलक्षणं ॥ ५ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यज्ञानसागरेणोक्त आत्मनिवास श्रुतिसारसमुच्चय समाप्तं ॥ संवत् १७२६ वर्षे मासमार्गेशिर ।

A *Śrutisārasamuccaya*, by *Pūrṇānanda*, is given in Aufrecht's Cat. Cat. [GAIKAWAR.]

* On *Śuddhādvaita*, see Bhandarkar, Report 1883-1884, p. 75.

† The author seems to have a certain predilection for the hypercatalectic *anushṭubh śloka*.

Digitized by Microsoft®

2501.

820. Foll. 117; size 15¾ in. by 5 in.; fair, modern Bengalī writing, by two different hands; eight lines in a page.

Bhaktirasāmṛitasindhu, or *Bhagavadbhaktirasāmṛitasindhu,* an elaborate treatise on the nature of *Krishṇa-Caitanya,* and devotional belief in his all-pervading power; composed in 1541 A.D.

Having thus been composed only some fifteen years after *Caitanya's* death, it must have been the work of one of the immediate followers of the *Vaishṇava* reformer. The introductory verses seem, indeed, to ascribe its composition to *Sanātana;* though some scholars (perhaps finding an allusion to the author's name in the second introductory, and the final verses) rather make it the work of *Rūpa Gosvāmin.**

The work consists of four sections (*vibhāga*) denominated after the four points of the compass, each section consisting again of a number of subdivisions (*laharī*). It begins:

अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामाललितो राधाप्रेयान् विधुर्जयति ॥ १ ॥

हृदि यस्य प्रेरणया प्रवर्त्तितो ऽहं वराकरूपो ऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥ २ ॥

विश्राममन्दिरतया तस्य सनातनतनोर्मदीशस्य ।
भक्तिरसामृतसिन्धुर्भवतु सदायं प्रमोदाय ॥ ३ ॥

भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभियः ।
भक्तमकरानशीलितमुक्तिनदीकान्नमस्यामि ॥ ४ ॥

मीमांसकवडवाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वां ।
स्फुरतु सनातन सुचिरं तव भक्तिरसामृताम्भोधिः ॥ ५ ॥

भक्तिरसस्य† प्रस्तुतिरखिलजगन्मङ्गलस्य ।
अज्ञेनापि मयास्य क्रियते सुहृदां प्रमोदाय ॥ ६ ॥

एतस्य भगवद्भक्तिरसामृतपयोनिधेः ।
चत्वारः खलु वक्ष्यन्ते भागाः पूर्वादयः क्रमात् ॥ ७ ॥

तत्र पूर्वे विभागे ऽस्मिन् भक्तिभेदनिरूपके ।
अनुक्रमेण वक्तव्यं लहरीणां चतुष्टयं ॥ ८ ॥

आद्या सामान्यभक्त्याढ्या द्वितीया साधनान्विता ।
भावाश्रिता तृतीयात्र तुर्या प्रेमनिरूपिका ॥ ९ ॥

तत्रादौ सुष्ठु वैशिष्ट्यमस्याः कथयितुं स्फुटं ।
लक्षणं क्रियते भक्तेरुत्तमायाः सतां मतं ॥ १० ॥

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतं ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥ ११ ॥

यथा नारदपञ्चरात्रे । ° one *śloka;* श्रीभागवतस्य तृतीये स्कन्धे च । ° three *ślokas.*

क्लेशघ्नी शुभदा मोक्षलघुताकृत्सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षिणी च सा ॥

तत्रास्याः क्लेशघ्नत्वं । क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥ अत्र पापं । अप्रारब्धं भवेत्पापं प्रारब्धं चेति तद्द्विधा ॥

I. *Rasopayogisthāyibhāvopapādano nāma pūrvavibhāgaḥ:*—1. *bhaktisāmānyalaharī,* fol. 3*a*; 2. *sādhanabhaktilaharī,* fol. 15*b*; 3. *ratibhaktilaharī,* fol. 18*a*; 4. *premabhaktilaharī,* fol. 19*a.*

II. *Bhaktirasasāmānyanirūpaṇo nāma dakshiṇo vibhāgaḥ,* begins:

प्रबलमनन्याश्रयिणा निषेवितः सहजरूपेण ।
अघमथनो मथुरायां सदा सनातनतनुर्जयति ॥

1. *vibhāvalaharī,* fol. 35*b*; 2. *anubhāvalaharī,* fol. 37*a*; 3. *sāttvikalaharī,* fol. 41*b*; 4. *vyabhicāralaharī,* fol. 55*b*; 5. *sthāyibhāvalaharī,* fol. 61*b.*

III. *Mukhyabhaktirasapañcakanirūpaṇo nāma paścimavibhāgaḥ,* begins:

धृतमुग्धरूपभावो भागवतार्पितपृथुप्रेमा ।
स मयि सनातनमूर्तिस्तनोतु पुरुषोत्तमस्तुष्टिं ॥

1. *śāntabhaktirasalaharī,* fol. 64*a*; 2. *prītabhaktirasalaharī,* fol. 74*b*; 3. *preyobhaktirasalaharī,* fol. 82*a*; 4. *vatsalabhaktirasalaharī,* fol. 87*a*; 5. *madhurākhyabhaktirasalaharī,* fol. 89*a.*

---

* Rāj. Mitra, Notices, ii., no. 579, on the other hand, assigns the work to *Jīva Gosvāmin.*

† On the technical meaning of *bhaktirasa,* see Wilson, Select Works, i., p. 163.

Digitized by Microsoft®

IV. *Gauṇabhaktirasādinirūpaṇo nāmottaravibhāgaḥ*, begins:

भक्तिभरेण प्रीतिं कलयन्नुररीकृतव्रजाङ्गसङ्गः ।
तनुतां सनातनात्मा भगवान्मयि सर्वदा तुष्टिं ॥

1. *hāsyabhaktirasalaharī*, fol. 90*b*; 2. *adbhutabhaktirasalaharī*, fol. 91*b*; 3. *vīrabhaktirasalaharī*, fol. 94*b*; 4. *karuṇabhaktirasalaharī*, fol. 95*b*; 5. *raudra(bhakti)rasalaharī*, fol. 97*a*; 6. *bhayānakabhaktirasalaharī*, fol. 92*a*; 7. *bībhatsabhaktirasalaharī*, fol. 98*b*; 8. *rasānām maitrīvairasthitilaharī*, fol. 103*a*; 9. *rasābhāsalaharī*, ends fol. 105*a*:

भारत्याद्याश्रितस्तु रसावस्थानसूचिकाः ।
वृत्तयो नाट्यमातृत्वादुक्ता नाटकलक्षणे ॥

इति भक्तिरसामृतसिन्धावुत्तरविभागे रसाभासलहरी ॥

ग्रन्थस्य गौरवभयादस्या भक्तिरसप्रियः ।
समाहृतिः समासेन मया सेयं विनिर्मिता ॥

गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनातनो ऽस्मिन्नुत्तरभागे रसामृताम्बुनिधेः ॥

इति भक्तिरसामृतसिन्धौ गौणभक्तिरसादिनिरूपणं नाम चतुर्थो विभागः ॥ समाप्तो ऽयं भक्तिरसामृतसिन्धुरिति ॥

रामाङ्गशक्र१४६३गणिते शाके गोकुलमधिष्ठितेनायं ।
भक्तिरसामृतसिन्धुर्विटङ्कितः क्षुद्ररूपेण ॥

Regarding the date (? *rāmāṅgaśakra*), see *Bhandarkar*, Report 1883-4, p. 76.

Foll. 106–116 contain a copious list of contents in five parallel columns; while fol. 117*a* gives an (incomplete) list of the titles of works quoted by the author. Of the authorities actually met with in twice going over the work, the following may be mentioned (omitting a number of *Purāṇas*, etc.):

Agastyasaṃhitā, foll. 9*b*, 11*a*; *Aparādhabhañjana*, fol. 65*b* (कामादीनां कति न कतिधा पालिता दुर्निदेशा जाता तेषां न मयि करुणा नत्रपा नोपशान्तिः । उत्सृज्यैतानथ यदुपते सांप्रतं लब्धबुद्धिस्त्वामायातः शरणमभयं मां नियुंक्ष्वात्मदास्ये ॥ not in Hæberlin's text, and different metre); *Uddhavasandeśa*, fol. 96*a* (कृष्णं मुष्णन्न करुणबलान्नोऽष्टतो निष्ठुरस्त्वं मा मर्यादां यदुकुलभुवां भिन्दिरे गान्दिनेय । यद्याभ्यर्थे त्वयि रथमधिष्ठाय यात्रां विधित्सौ स्त्रैणं प्राणैरपि नियुतशो हन्त याचा व्यथापि ॥ *Rūpa-gosvāmin's Uddhavasandeśa*, MS. 570, v. 76, but quite different in second half); *Karṇāmṛita*, fol. 17*a* (आनंम्रामसितभ्रुवोरुपचितामक्षीणपक्ष्माङ्कुरेष्वालोलामनुरागिणोर्नयनयोरार्द्रां मृदौ जल्पिते । आताम्रामधरामृते मदकलामम्लानवंशीस्वनेष्वाशास्ते मम लोचनं व्रजपतेर्मूर्तिं जगन्मोहिनीं ॥), 17*b*, 34*b*, 70*a*, 71*b*; *Kātyāyanasaṃhitā*, fol. 7*b* (वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसं ॥); *Gītagovinda*, foll. 27*b*, 87*b*, 88*b*; *Govindavilāsa*, fol. 57*a* (चिरमुत्कण्ठितमनसो राधामुरवैरिणोः कोऽपि । निभृतनिरीक्षणजन्मा प्रत्याशावल्लवो जयति ॥); *Dānakelikaumudī*, fol. 55*b* (गभीरोऽप्यश्रान्तं दुरभिगमपारो ऽपि नितरामहार्यां मर्यादां दधदपि हरेरास्पदमपि । सतां स्तोमः प्रेमण्युदयति समग्रे स्थगयितुं विकारं न स्फारं जलनिधिरिवेन्दौ प्रभवति ॥), 87*b* (कुवलययुवतीनां°); *Nārada-Pañcarātra*, foll. 1*b*, 2*b*; *Pañcarātra*, foll. 3*b*, 11*b*, 18*a*; *Padyāvalī*, foll. 36*b*, 44*a*, 65*b* (ध्यानातीतं° given in *Padyāv.*, MS. 823, fol. 9*a*, as by *Yādavendrapurī*), fol. 87*b* (वामं वपुः पुलकितं° ib., fol. 18*a*), 88*b* (अकस्मादेकस्मिन्नपि° ib., fol. 16*b*, by *Kavicandra*); *Prahlādasaṃhitāyām śrī-Uddhavavākyam*, fol. 88*b* (भगवानपि गोविन्दः कन्दर्पशरपीडितः । न भुङ्क्ते न स्वपिति च चिन्तयन् वो ह्यहर्निशं ॥); *Bilvamaṅgala*, fol. 35*b* (अयि पङ्कजनेत्रमौलिमाले तुलसीमञ्जरि किंचिदर्थयामि । अवबोधय पार्थसारथेस्त्वं चरणाब्जशरणाभिलाषिणं मां ॥), 44*a* (हस्तमुत्क्षिप्य यातो ऽसि बलात्कृष्ण किमद्भुतं । हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥), 46*a* (राधा पुनातु जगदच्युतदत्तचित्ता मन्थानकं विदधती दधिरिक्तपात्रे । °); *Bilvamaṅgalastava*, fol. 64*a* (अद्वैतवीथीपथिकैरुपास्याः स्वानन्दसिंहासनलब्धदीक्षाः । शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेन ॥); *Brahmayāmala* (? reference not found); *Brahmasaṃhitāyām Ādipurusharahasya*, foll. 27*a*, 30*a* (see no. 2511); *Bhaktiviveka*, fol. 11*a* (चिन्तां कुर्यान्न रक्षायै विक्रीतस्य यथा पशोः । तथार्पयन् हरौ देहं विरमेदस्य रक्षणात् ॥); *Bharata*, fol. 60*b* (यदुक्तं श्रीभरतेन ॥ शक्तिरस्ति विभावादेः कापि साधारणी कृतौ । प्रमाता तदभेदेन स्वं यथा प्रतिपद्यते ॥);

Digitized by Microsoft ®

Bhāvārthadīpikā, fol. 3*a* (त्वत्कथामृतपाथोधौ विहरन्तो महामुदः । कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमं ॥); *Brahmayāmala*(?); *Māghakāvya*, foll. 23*b*, 24*b*; *Mukundamālā*, fol. 57*a* (दिवि वा भुवि वा ममास्तु वासो॰ चरणौ ते मरणे ऽपि चिन्तयामि ॥ Hæberlin, p. 516); *Mukundāshṭaka*, fol. 33*b* (कनकनिवहशोभानिन्दिप्रीतं नितम्बे तदुपरि नवरक्तं वस्त्रमित्थं दधानः । प्रियमिव किल वर्णं रागयुक्तं प्रियायाः प्रणयतु मम नेत्राभीष्टपूर्तिं मुकुन्दः ॥); *Yāmunācāryastotra*, fol. 11*a* (वपुरादिषु यो ऽपि को ऽपि वा गुणतो ऽसानि यथा तथाविधः । तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥), 23*b* (रघुवर यदभूस्त्वं तादृशो वायसस्य प्रणत इति दयालुर्यच्च चैद्यस्य कृष्ण । प्रतिभवमपराद्धुर्मुग्धसायुज्यदो ऽभूर्वद किमपदमागस्तस्य ते ऽस्ति क्षमायाः ॥), 27*a* (यद्ब्रह्मरुद्रान्तरगोचरं च॰); *Rasasudhākara*, fol. 43*a* (अतिप्रयत्नेन रतान्ततान्ता कृष्णेन तान्तादवरोपिता सा । आलम्ब्य तस्यैव करं करेण ज्योत्स्ना कृता नन्दमनिन्दमाप ॥); *Lalitamādhava*, foll. 25*a* (दरोदञ्चद्गोपीस्तनपरिसरप्रेक्षणभवात् करोतु कम्पादीषच्चलति किल गोवर्धनगिरौ । ॰), 25*b*, 26*b*, 28*b*, 84*b*, 86*b*, 87*a*; *Vidagdhamādhava*, foll. 28*a* (रुन्धन्नम्बुभृतश्चमत्कृतिपरं कुर्वन्मुहुस्तुम्बुरुं ध्यानादन्तरयन् सनन्दनमुखान् विस्मेरयन् वेधसं । ॰), 48*b*, 67*b*, 84*b*, 86*b*, 95*b*, 96*b*, 102*a*; *Vishṇuyāmala*(?); *Vishṇurahasya*, foll. 7*b* (आलिङ्गनं वरं मन्ये व्यालव्याघ्रजलौकसां । न सङ्गः शल्ययुक्तानां नानादेवैकसेविनां ॥), 8*b* (श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि । ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदं ॥); *Vaishṇavatantra*, fol. 29*b* (अष्टादशमहादोषै रहिता भगवत्तनुः । सर्वैश्वर्यमयी सत्यविज्ञानानन्दरूपिणी ॥); *Haṃsadūta*, fol. 46*b* (कदाचित्खेदाग्निं Hæberlin, p. 374, *śl.* 3), 72*a* (पुरस्तादाभीरी॰ । स जानुभ्यां॰ ib., p. 383, *śl.* 50*b*, 51*b*), 95*a* (विराजन्ते ib., *śl.* 54); *Haribhaktivilāsa*, fol. 11*b* (तवास्मीति वदन् वाचा तथैव मनसा विदन् । तत्स्थानमस्थितस्तन्वा मोदते शरणागतः ॥); *Haribhaktisudhodaya*, fol. 2*b* (त्वत्साक्षात्करणाह्लादविशुद्धाब्धिस्थितस्य मे । सुखानि गोष्पदायन्ते ब्राह्माण्यपि जगद्गुरो ॥), 8*b* (प्रविशन्नालयं विष्णोर्दर्शनार्थं सुभक्तिमान् । ॰), 12*b*, 17*a*, 65*b*, 70*b*; *Harisudhodaya*, fol. 93*b* (स्थानाभिकामस्तपसि स्थितो ऽहं॰ ।).

[H. T. Colebrooke.]

2502.

1547E. Foll. 49; size 10 in. by 4½ in.; modern Devanāgarī writing; 10 or 11 lines in a page.

A fragment of the *Bhaktirasāmṛitasindhu*, extending as far as fol. 33*b* of the preceding MS.

An additional leaf, marked भ॰ र॰ ५०, merely gives the following colophon, written in a different hand: इति श्रीचरणदासविरचितो भक्तिरसामृतसिंधुनामको ग्रंथः समाप्तः ॥ ०

[H. T. Colebrooke.]

2503.

806b. Foll. 110; size 15¼ in. by 5 in.; clear, modern Bengalī handwriting; eight lines in a page.

Durgamasaṃgamanī, a commentary on the *Bhaktirasāmṛitasindhu*, annotating the text and enlarging upon the doctrines propounded therein. Apparently by *Rūpa* (? or *Jīva*) *Gosvāmin*; though in the colophon ascribed to *Sanātana*.

It begins:

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभो ऽनुजः सो ऽसौ श्रीरूपो जीवसद्गतिः (सद्गतिः [B, orig. A.) ॥

अथ श्रीमान् ग्रन्थकारः सकलभागवतलोकहिताभिलाषपरवशतया प्रकाशितैः स्वहृदयदिव्यकमलकोषविलासिभिः श्रीमद्भागवतरसैरेव भक्तिरसामृतसिन्धुनामानं ग्रन्थमपूर्ववचनमाचिन्वानस्तद्दुर्गीयितव्यस्यैव च सर्वोत्तमतां निश्चिन्वानस्तद्व्याजनयैव मङ्गलमाचरयति । एवं सर्व एव ग्रन्थो ऽयं मङ्गलरूप इति च विज्ञापयति ॥ अखिलेति ॥ विधुः श्रीकृष्णो जयति सर्वोत्कर्षेण वर्तते । ० ॥ २ ॥

अथ निजभक्तिप्रवर्तनेन कलियुगपावनावतारं विशेषतः स्वाश्रयचरणकमलं श्रीश्रीकृष्णचैतन्यदेवं भगवन्तं नमस्करोति हृदीति ॥ हृद्विषयप्रेरणया प्रवर्तितो ऽस्मि न सन्दर्भे इति शेषः । वराकेति स्वयं दैन्येनोक्तं । सरस्वती तु तदसहमाना वरं श्रेष्ठं

Digitized by Microsoft®

श्चा सम्यक् कायति शब्दायते इति तमेव तं स्तावयति सत्कवितायामपि त..रणयैवात्र प्रवृत्तिः स्यात् नान्यथा इत्यपेरर्थः ॥२॥

अथ निजेष्टदेवतावतारत्वेन निजगुरुं स्तुवन् प्रार्थयते विश्राम इति ॥ भक्तिरसरूपस्यामृतस्य सिन्धुरिवेति तन्नामायं ग्रन्थः तस्य श्रीकृष्णाख्यस्य मदीशस्य सदा स्वेन रूपेण स्थितस्यैव विकाशितनानान्यरूपतनोर्यो सनातननामा तनुस्तस्या विश्राममन्दिरतया तत्तुल्यतयाङ्गीकारेणेत्यर्थः । अन्यस्या अपि नारायणाख्यायाः सदा समानार्थे सनातन तत्तनोः सिन्धुर्विश्राममन्दिरं भवतीति ॥ ३ ॥ ०४ ॥

अथ निजग्रन्थस्य विरोधिकृतपराभवाभावकरीं श्रीगुरुचरणान् प्रार्थयते मीमांसकेति । ० ॥ ५ ॥

It ends: इति दुर्गमसंगमनीनाम्न्यां भक्तिरसामृतसिन्धुटीकायां उत्तरविभागे रसाभासलहरी नवमी ॥ इति दुर्गमसंगमनीनाम्न्यां भक्तिरसामृतसिन्धुटीकायां चतुर्थो विभागः समाप्तः ॥

रामाङ्केति शालिवाहनस्य संवत्सरगणनया विक्रमादित्यस्यापि ज्ञेया । अङ्कस्य वामगतिप्रसिद्धा त्रिपष्ट्यधिकचतुर्दशशतीगणित इत्यर्थः ॥ विक्रमादित्यस्य त्व[ष्ट]नवत्यधिकपञ्चदशशतीगणित इति ज्ञेयं ॥ विटङ्कित उट्टङ्कितः सुष्ठुरूपेत्येव पठितव्यं । तेषां दीनम्मन्यतामयपाठे ऽपि तदसहिष्णुः सरस्वती क्षुद्रं सूक्ष्मत्वज्ञेयं रूपं स्वरूपं यस्येति गत्यन्तरास्पदं स्फोटयन्ती समाहितवती ॥

श्रीकृष्णः सर्वपूर्णः स चरति विपुले गोकुले व्यक्ततत्तन्
माधुर्यैश्वर्यवर्यः स च पशुपशतानन्तलक्ष्मीभिरिष्टः ।
श्रीराधावर्गमध्ये स च मधुरगुणश्री(म)धुराधामधारी-
त्यस्मिन् ग्रन्थे रसाब्धावभिमतमहिमा[-]रसारप्रचारः ॥
यदपि च नातिविशुद्धा तदपि च सद्भिः कदाप्युरीकार्या ।
दुर्गमसंगमनीयं लोके वास्यामृताम्भोधोः ॥

इति सनातनगोस्वामिकृता दुर्गमसंगमनी भक्तिरसामृतसिन्धुटीका समाप्ता ॥

Two additional leaves contain an index of chapters, and a list of 26 works quoted in the commentary. Of the latter may be mentioned: *Kurukshetrayātrā*, *Gopālastava*, *Dhruvacarita*, *Sāhityadarpaṇa*. [H. T. Colebrooke.]

2504.

1489b. Foll. 85 (numbered 67–151); size $15\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; Bengalī handwriting of 1806 A.D.; seven lines in a page.

Durgamasaṃgamanī. This (rather careless) copy omits the last colophon and the last but one of the final *ślokas* of the preceding MS.; and it also differs considerably as to the rest; viz.:

इति दुर्गम[स]ङ्गमनीनाम्न्यां हरिभक्तिरसामृतसिन्धुटीकायां चतुर्थो विभागः ॥ रामोन्दति (!) शालिवाहनसम्वत्सरगणनया विक्रमादित्यस्य सापि सा ज्ञेया। अङ्कस्य (!) वामापतिप्रसिद्धा ०--दीनं सम्यतामयपाठे ऽपि क्षुद्रां सूक्ष्मं दुर्ज्ञेयं (?) रूपं स्वरूपं यस्येति सरस्वतीसंवादः ॥ यदपि च नातिविशुद्धा ० वास्यामृताम्भोधेः ॥ समाप्तेयं टीका तेषामेव प्रीतये तु [भ]वतु

The MS. is preceded by six leaves, marked क्रोड (पत्र), and numbered 1–6 in the left, and 61–66 in the right margin. This passage, which apparently belongs to the present work, begins: अत्र जीवगोस्वामिमतानुसारिणः । नित्यसिद्धास्तु गोप्यः स्वकीया एव ताश्च राधादयः । ०

[H. T. Colebrooke.]

2505.

1489a. Foll. 60; size $15\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; indifferent Bengalī handwriting, apparently by the same hand as the preceding MS.; seven lines in a page.

Krishṇabhaktirasodaya, another treatise on the same subject, apparently consisting chiefly of passages from the *Bhaktirasāmṛitasindhu*, with comments thereon; by *Rādhāmohana Śarman.* It begins:

गोपीनयनचकोरीस्वादितसुरसामृतासिताङ्गरुचिः ।
कोपी व्रजेन्द्रतनयो नीरदनीलो विधुर्जयति ॥
श्रीमदद्वैतवंशोद्भूराधामोहनशर्मणा ।
क्रियते परमामोदः कृष्णभक्तिरसोदयः ॥

श्रीमद्रसामृताम्भोधिर्गोस्वामिभिरुदाहृतः ।
तस्मादुद्धृत्य यत्किंचिदन्यतश्च निवेद्यते ॥
क्षन्तव्यं मम चापल्यं तद्धर्षेरितचेतसः ।
वैष्णवैः कृष्णसंबन्धे गुणमात्रपरिग्रहैः ॥

तत्र भक्तिलक्षणं ॥

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतं ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥ (see p. 812b)

Digitized by Microsoft®

अत्र प्रकरणात् भक्तिपदेन कृष्णभक्तिरेवोच्यते। तथा चानुकूल्येन कृष्णानुशीलनं कृष्णभक्तिरिति सामान्यतः स्वरूपलक्षणं° a lengthy discussion; ननु भक्तेः किं प्रयोजनमित्याह। क्लेशघ्नी शुभदा° p. 812*b* ॥ इति क्लेशः स मूलपार्थं ० in the comment on this the author remarks: अत्र प्रमाणं मूलग्रन्थे (भक्तिरसामृतसिन्धौ) मत्कृतकृष्णभक्तिसुधार्णवे च विस्तृतमन्यत्र चानुसन्धेयं°

The *Durgamasaṃgamanī* is quoted at fol. 8*b*.

The work consists of ten chapters (*ullāsa*), viz.: 1. fol. 10*b*; 2. *sādhyabhaktinirūpaṇam*, fol. 15*b*; 3. *bhaktirasanirūpaṇam*, fol. 25*a*; 4. *vibhāvādinir.*, fol. 39*a*; 5. *śāntabhaktirasanir.*, fol. 44*a*; 6. *prītabhaktirasavivaraṇam*, fol. 48*b*; 7. *sakhyabhaktirasanir.*, fol. 50*b*; 8. *vatsalabhaktirasanir.*, fol. 51*a*; 9. *ujjvalabhaktirasanir.*, fol. 54*b*; 10. (*maitrīvairaviveccanam*) ends fol. 60*b*: भरतमुनिनाप्युक्तं। रसाभासा अनौचित्यप्रवर्तिता इति। एवमन्यदूह्यं इति कलियुगपावनावतारः ॥ श्रीमदद्वैतवंशश्रीराधामोहनगोस्वामिविरचिते कृष्णभक्तिरसोदये दशम उल्लासः। समाप्तो ऽयं ग्रन्थः ॥ Cp. Rāj. Mitra, Notices, iii., no. 1192. [H. T. Colebrooke.]

2506.

2486. Foll. 249 (five of which, 124–128, are wanting), and two *śuddhapattras* (after 62 and 82 resp.); size 11½ in. by 4½ in.; fairly written, in Devanāgarī, about 1550 A.D. (fol. 61 supplied by a later hand); 8–11 lines in a page.

Vishṇubhakticandrodaya, another work on the same subject, in sixteen chapters (*kalā*), by *Nṛisiṃhāraṇya Muni.*

It begins:

वन्दे [ऽहं] श्रीनृसिंहेशं पुण्यारण्यं गुरूत्तमं।
श्रीसाममन्त्रराजं (!) च वैष्णवान्हार्हि (°वाह्लाद)सिद्धये॥

आविर्बभूव लोके ऽस्मिन् सद्भक्त्याह्लाददायकः।
श्रीविष्णुभक्तिचंद्रो ऽयं विष्णुप्रेमाब्धिवर्धनः॥

यस्य (तस्य R. M.) श्रुतेरेककलात्मकस्य
हन्याद्य(हृद्याद R. M.)नेकाद्यतमः प्रबंधः।
शैथिल्यमेतींद्रियवातयाता(शान्त्या R. M.)
नानांतरायाभ्रमतौ हतायां॥

वक्ष्ये निरंतराशेषदृजैन्माधकारविध्वंसनं।
स्मृत्वा प्रणम्य चादौ गुरुं श्रीविष्णुभक्तिचंद्रोदयं॥

संसारानलनिर्विण्णो मनीषी स्वार्थसिद्धये।
संसारासारतां ज्ञात्वा गुरुं शरणमाव्रजेत्॥

गुरुसेवारतः शिष्यः स्निग्धः सर्वनिवेदकः।
गुरुश्चेश्वरभावश्च दंडवत्प्रणमेद्गुरुं॥

अप्रमत्तोद्यतः शश्वद्दुर्वाज्ञां शिरसा मुदा।
गृह्णन्परिचरेद्भक्त्यानवद्यस्तोषयन्गुरुं॥

तथा चोक्तानि श्रीमद्भागवते श्रीभगवता उद्धवं प्रति शिष्यलक्षणानि।°

No authorities, except *Purāṇas*, *Bhagavadgītā*, *Vishṇurahasya*, *Vaishṇavatantra* (fol. 93*b*), and such-like works have been met with.

For the contents of the work, cp. Rāj. Mitra, Notices, viii., p. 279.

The MS. is not quite complete, the 16th *kalā* beginning on fol. 146*b*; and the last leaf breaking off at ॥ अथ फाल्गुने मासि श्रीविष्णोः—

[Gaikawar.]

2507.

735. Foll. 158; size 13 in. by 4¼ in.; clear, modern Bengalī handwriting; eight lines in a page.

Vishṇubhaktidarpaṇa, or *Vishṇudarpaṇa*, another compendium of devotional worship, in fifteen chapters, by *Upendrācārya.*

I. वासुदेवादिका मूर्तीर्दधानं परमं पदं।
नारायणं शास्त्रयोनिं नमामि हरिमीश्वरं॥

गुरुं प्रणम्य श्रीविष्णुं पूजनं परमात्मनः।
अष्टाङ्गभक्तियोगाढ्यं मन्त्रैरष्टाक्षरादिकैः॥

दृष्ट्वा तन्त्रपुराणानि मतं भागवतस्य च।
मन्त्रार्थकथनोपेतं लिखिष्यामि यथामति॥

यमाश्च नियमाश्चैव आसनं प्राणसंयमः।
प्रत्याहारो धारणा च ध्यानं समाधिरेव च॥

अष्टावङ्गानि योगस्य भक्तेर्भक्तिविदो विदुः।
अहिंसाद्या यमाः प्रोक्ताः शौचाद्या नियमा मताः॥

Digitized by Microsoft®

अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसंचयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमार्जवं ॥
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्पणं (? मृद्° = गो-
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥ [पीमृत्तिका) ।
एते यमाः सनियमा उभयोर्द्वादश स्मृताः ।
आसनं स्वस्तिकाख्यं स्याद्वीरासनमथापि वा ॥°

II. अथ दीक्षां लिखिष्यामि सर्वशक्यां कलावतीं ।
दीक्षां विना पशुत्वं हि विप्रस्य न निवर्तते ॥ fol. 10*b*.

III. भक्त्यंगान्यथ वक्ष्यामि भक्तानां चैव लक्षणं ।
नैष्कर्म्यं पापशुद्धिं च विष्णुभक्तेश्च नित्यतां ॥ 20*b*.

IV. अथ साधनयोगस्य माहात्म्यं लिख्यते ऽधुना ।
यथा दृष्टं पुराणेषु श्रुत्वा जननमुत्तमं ॥ 30*b*.

V. अथ प्रणम्य विश्वेशं विधानं सार्वमन्त्रिकं ।
प्रातःप्रभृति सायान्तं लिखिष्यामि यथामति ॥ 43*a*.

VI. पीठन्यासं विधायैवं तत्र विष्णुं स्मरेत्प्रभुं ।
स्वाधिष्ठानसमुद्भूतनादेन प्रणवात्मना ॥ 56*b*.

VII. अथ विज्ञानमानन्दं ब्रह्म नत्वा महेश्वरं ।
पूजायां तस्य मन्त्राणां प्रकाशाद्यथ कथ्यते ॥
एको नारायणो देवः सर्वः सर्वेश्वरो विभुः ।
भक्तानां कार्यसिद्ध्यर्थं चतुर्मूर्तिर्महीयते ॥ 68*a*.

VIII. सत्यं ज्ञानमनन्तं यज्जन्माद्यस्य यतो भवेत् ।
तं विष्णुमव्ययं पूर्णं प्रणम्य जगदीश्वरं ॥
द्वादशाक्षरमन्त्रस्य वक्ष्यामि विधिमुत्तमं ।
भक्तानुग्रहणार्थाय वासुदेवेति यं विदुः ॥
वेदादिर्हृदयं तेऽन्तो भगवान्वालहंसकौ ।
नारायणविष्णुयुक्तौ सत्यतुष्टेन संयुतः(!) ॥ 78*b*.

IX. अथ प्रणम्य विश्वेशं भवबन्धघ्नमच्युतं ।
विधानं तस्य पूजाया यथोक्तं लिख्यते ऽधुना ॥ 89*b*.

X. अथ सज्ज्ञानन्दमयं ब्रह्म नत्वा महेश्वरं ।
लिख्यते तस्य पूजाया विधानं कलितारणं ॥ 97*a*.

XI. ङेन्तौ* च कृष्णगोविन्दौ मन्त्राद्यौ मदनादधः ।
अष्टादशाक्षरो मन्त्रो भक्तानां सुरपादपः ॥ 106*b*.

XII. अथ संक्षिप्तबुद्धीनां विधानं सार्वमन्त्रिकं ।
यथामति लिखिष्यामि मालाशुद्धिं पुरस्क्रियां ॥ 114*a*.

XIII. अथ पौराणिकैर्मन्त्रैरुपचारविधिं ब्रुवे ।
महापूजाविधानेन गृहदानविधिं तथा ॥ 123*a*.

XIV. अतः परं लिखिष्यामि शयनोत्थादिकं विधिं ।
श्रीहरेर्जागरं पुण्यं वैष्णवानि व्रतानि च ॥ 141*a*.

XV. अथ श्रीभागवतोक्तपयोव्रतपद्धतिर्लिख्यते । तत्र फाल्गुनामावास्यायां ब्राह्मे मुहूर्ते उत्थितः कृतमैत्रादिः श्रोतजले स्नानसंकल्पं कृत्वा° fol. 157*a*.

It ends: ततो यजमान आचार्यादिभ्यो यथाशक्ति वित्तशाठ्यं वर्जयित्वा दक्षिणां सुवर्णं तदर्धं पादं वा दत्त्वा तानन्यानपि ब्राह्मणान् सद्गुणेन भोजनेन भोजयेत् । यथाशक्ति च चाण्डालादिभ्यो ऽपि भोजनं दद्यात् । ततो ऽच्छिद्रमवधार्य बन्धुभिः सह भुञ्जीत । व्रतेनानेन भगवन्तमाराध्य सकलयज्ञव्रततपसां सिद्धिमाप्य भगवल्लोकमाप्नुयात् ॥ इति श्रीभागवतोक्तपयोव्रतविधिः समाप्तः ॥ इति श्रीमानुपेन्द्राचार्यविरचितं श्रीविष्णुदर्पणं समाप्तं ॥

The other colophons run: इति विष्णुभक्तिदर्पणे (प्रथमः) परिच्छेदः (corrected everywhere for original पटलः). [H. T. Colebrooke.]

2508.

823e. Foll. 38; size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; six lines in a page.

Haribhaktikalpalatikā, a treatise, by *Kṛishṇa Sarasvatī*, on the nature of '*bhakti*' and the various grades of it through which the votaries of *Kṛishṇa* have to pass before attaining perfection of faith.

It begins:

सर्वात्मानमशेषलोकपितरं सर्वेश्वरं शाश्वतं
यं नो वेत्ति जगन्निवासममृतं यन्माययान्धं जगत् ।
यं ज्ञात्वा कृतिनो विशन्ति परमानन्दावबोधं च यं
तं भक्तप्रियबान्धवं शरणदं वन्दे मुरद्वेषिणं ॥ १ ॥
व्रजस्त्रीणां प्रेमप्रणयहृदयो वा किमथवा
कृपायुक्तो भक्तेष्वसुरनिधनश्छद्मनिपुनः ।
अपि स्वात्मारामो य इह विजिहीर्षुर्व्रजमगात्
तमानन्दं वन्दे नवजलदजालोदरनिभं ॥ २ ॥

* The guttural nasal here may possibly be intended for the nasal sound which occurs in many of the formulas in this and several other chapters, *e.g.* प्रं प्रद्युम्नाय । अँ अनिरुद्धाय नमः । श्रिँ श्रियै नमः । उँ सोममण्डलाय नमः ॥

Digitized by Microsoft®

असत्यमपि संसारं यद्भक्तिः सत्यतां नयेत् ।
गोपीनां सदयानन्दं तमानन्दमुपास्महे ॥ ३ ॥

पुण्याम्भोधिभवा तमोविघटिनी सत्सङ्गमूलोद्गमा
श्रद्धापल्लविनी विविक्तिकलिकाप्रेमप्रसूनोज्ज्वला ।
सान्द्रानन्दरसावहं च परमज्ञानं फलं बिभ्रती
सेयं श्रीहरिभक्तिकल्पलतिका भूयात्सतां प्रीतये ॥ ४ ॥

The work is divided into fourteen *stavakas*, viz.: I. (verses 46) on the nature of the god; II. (vv. 78) on the kinds of worshippers; III. (vv. 17) on the nine grades of *bhakti*, to each of which is devoted one of the succeeding chapters; IV. (vv. 21) on *śravaṇa*, the recital of *Hari's* actions and sayings; V. (vv. 60) on *kīrtana*, invocation of his names and eulogizing of his qualities; VI. (vv. 34) on *smaraṇa*, or conception of *Krishṇa* as the aggregate of all that delights the human heart; VII. (vv. 27) on *pādasevana*, or paying tribute of admiration by meditating on his acts and offering magnificent presents; VIII. (vv. 48) on *arcana*, or worshipping him by sixteen different kinds of offerings, such as *tulasī*, etc.; IX. (vv. 12) on *vandana*, or prostration before the deity; X. (vv. 19) on *dāsya*, or complete absorption of soul and mind in the divine being; XI. (vv. 5) on *sakhya*, or love for the deity; XII. (vv. 10) on *ātmanivedana*, or annihilation of one's individuality and becoming one with *Krishṇa*; XIII. (vv. 13) on knowledge of the divine; XIV. (vv. 19) on the atonement for transgressions and relapses of the soul.

Occasionally explanatory remarks are inserted between the verses, in which the author speaks of himself in the third person, as to what the succeeding verses are intended to show.

It ends:

ये शृण्वन्ति पठन्ति वानिशमिदं भक्तिप्रबोधामृतं
ये वा साधु निरूपयन्ति भगवद्भक्तेषु निर्मत्सराः ।
ते निर्धूय भवान्धकारमखिलं भक्तिप्रबोधामृतं
सान्द्रानन्दमनावृतं तदमृतं विन्दन्ति विष्णोः पदं ॥ १९ ॥
इति श्रीहरिभक्तिकल्पलतिकायां चतुर्दशस्तवकः ॥ १४ ॥
श्रीकृष्णसरस्वतीविरचितो ग्रन्थः संपूर्णः ॥

[H. T. COLEBROOKE.]

2509.

827b. Foll. 18; size 12⅜ in. by 5 in.; good, modern Bengalī handwriting; seven lines in a page.

Bhaktilaharī, apparently a work of a similar nature, by *Maṇirāma*. This MS. contains only the fourth chapter (*viśvasamuddeśa-taraṅga*), explaining the evolution of the universe, with the heaven of *Vishṇu* as the crowning of the edifice. It begins:

गुरुं विश्वेश्वरं कृष्णं प्रणिपत्य प्रणीयते ।
मणिरामेण विश्वस्य समुद्देशो यथामति ॥ १ ॥
नित्यस्थलजलादीनां तेजसा पञ्चमस्य च ।
सुतानध्वनिना सार्धं ज्योतिरुत्पद्यते महत् ॥ २ ॥
उभाभ्यां जडितीभूय व्याप विष्टो दिशो दश ।
विरेजे सूक्ष्मरूपेण विराट् तेन निगद्यते ॥ ३ ॥
शब्दस्वरूपा प्रकृतिर्ज्योतीरूपस्तु पूरुषः ।
प्रकृतेः समवायाद्वै तेजसश्चोपपद्यते ॥ ४ ॥
तेजोयोगाद्विभिन्नः सन् प्राज्ञः साक्षी निरञ्जनः ।
अव्याहताज्ञप्रकृतिराद्या सृष्टिविधायिनी ॥ ५ ॥
जिह्वारमणयोगात्सा गुणाः(?r. गुणान्) सत्त्वं रजस्तमः ।
पञ्चभूतानीन्द्रियाणि संभूतान्यसृजन्मुहुः ॥ ६ ॥
गुणास्तन्मात्रसहितैः पञ्चभूतैः समन्ततः ।
इच्छाज्ञानक्रियाभिस्ते ब्रह्माण्डं प्रकृता अजः (!) ॥ ७ ॥

It ends:

ब्रह्मलोकश्च वैकुण्ठः शिवलोकस्ततः परः ।
शक्तिलोकस्तु गोलोको महामायाभिधः परः ॥ २३३ ॥
गुरुलोकः सप्तविधः सत्यलोकः प्रकीर्तितः ।
गोलोकाद्गुरुलोकान्तं पञ्चाशत्कोटियोजनं ॥ २३४ ॥
इति विश्वसमुद्देशः संक्षेपात्कथितो मया ।
विस्तरेण सहस्रास्यो वक्तुं नैव क्षमो भवेत् ॥ २३५ ॥
इति भक्तिलहर्यां विश्वसमुद्देशो नाम चतुर्थस्तरङ्गः ॥

[H. T. COLEBROOKE.]

Digitized by Microsoft®

2510.

939b. Foll. 10; size 12¾ in. by 4¼ in.; fair, modern Bengalī handwriting; eight lines in a page.

Gauragaṇoddeśadīpikā, or *Gaurāṅgagaṇoddeśadīpikā*, an account of the chief disciples of *Caitanya* (*Gaura, Gaurāṅga*), and the reformer's own mythic succession; composed, in 1544 A.D., by *Paramānandadāsa*, usually called *Kavikarṇapūra*, son of *Śivānanda Sena*; and pupil of *Śrīnātha*.

It begins: श्रीचैतन्यचन्द्राय नमः ॥

य: श्रीवृन्दावनभुवि पुरा सच्चिदानन्दसान्द्रो
 गौराङ्गीभिः सदृशरुचिभिः श्यामधामा ननर्त ।
तासां शश्वद् दृढतरपरीरम्भसंभेदतः किं
 गौराङ्गः सन् जयति स नवद्वीपमालम्बमानः ॥ १ ॥

नमस्यामो ऽस्यैव प्रियपरिजनान् वत्सलहृदः
 प्रभोरद्वैतादीनपि जगदघौघक्षयकृतः ।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
 स्वरूपाद्या ये ऽमी सरसमधुरास्तानपि नुमः ॥ २ ॥

गुरुं तं श्रीनाथाभिधमवनिदेवाद्वयविधुं
 नुमो भूपारत्नं भुव इव विभोरस्य दयितं ।
यदा स्यादुन्मीलन्निरवकरवृन्दावनरहः
 कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥ ३ ॥

पितरं श्रीशिवानन्दं सेनवंशप्रदीपकं ।
वन्दे ऽहं परया भक्त्या पार्षदाग्र्यं महाप्रभोः ॥ ४ ॥

ये विख्याताः परीवाराः श्रीचैतन्यमहाप्रभोः ।
नित्यानन्दाद्वैतयोश्च तेषामपि महीयसां ॥
गोपालानां च पूर्वाणि यानि नामानि कानिचित् ।
स्वस्वग्रन्थे स्वरूपाद्यैर्दर्शितान्यादिसूरिभिः ॥
विलोक्यान्यानि साधूनां मथुरौड्रनिवासिनां ।
गौडीयानामपि मुखान्निशम्य स्वमनीषया ॥
विविच्याम्रेडितः कैश्चित् कश्चित्तानि लिखाम्यहं ।
नाम्ना श्रीपरमानन्ददासः सेवितशासनः ॥
यद्वा पुरा कृष्णचन्द्रः पञ्चतत्त्वात्मको ऽपि सन् ।
प्राक्तः प्रकटतां तद्वद्गौरः प्रकटतामियात् ॥
स्वाभिन्नेन युतं तत्त्वं पञ्चतत्त्वमिहोच्यते ।
अन्यथा तदसंबन्धात्तत्त्वं स्याच्चतुष्टयं ॥

तद्भिन्नं यत्तदेवात्र तदभिन्नं विभाव्यते(°तां Tüb.) ।
यतः स्वशक्त्येच्छयया(स्वयेच्छया शक्त्या T.) कृष्णस्ताद्-
स्वरूपचरणैरुक्तं पञ्चतत्त्वनिरूपणे । [शतां गतः ॥
उपाधिभेदात्पञ्चत्वं तत्त्वस्येह प्रदर्श्यते ॥
पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकं ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकं ॥
अस्य विवृतस्तैस्तैर्यैः स संक्षिप्य विलिख्यते ।
भक्तरूपो गौरचन्द्रो यतो ऽसौ नन्दनन्दनः ॥
भक्तस्वरूपनित्यानन्दः (!) विश्वरूपश्च मुख्यकः ।
भक्तावतार आचार्याद्वैतो यः श्रीसदाशिवः ॥
भक्ताख्याः श्रीनिवासाद्या यतस्ते भक्तरूपिणः ।
भक्तशक्तिर्द्विजाग्रण्यः श्रीगदाधरमुख्यकः ॥
श्रीमद्विश्वंभराद्वैतनित्यानन्दावधूतकाः ।
अत्र त्रयः समुन्नेया विग्रहाः प्रभवश्च ते ॥
एको महाप्रभुर्ज्ञेयः श्रीचैतन्यो दयाम्बुधिः ।
प्रभू द्वौ श्रीयुतौ नित्यानन्दाद्वैतौ महाशयौ ॥
गोस्वामिनश्च विज्ञेयास्ते द्विजश्च गदाधरः ।
पञ्चतत्त्वात्मका एते श्रीनिवासश्च पण्डितः ॥
यदुक्तस्तत्र गोस्वामी श्रीस्वरूपपदाम्बुजैः ।
त्रयो ऽत्र विग्रहाः ज्ञेयाः प्रभवश्चात्र ते त्रयः ॥
एको महाप्रभुर्ज्ञेयो द्वौ प्रभू संमतौ सतां ।
गोस्वामिनश्च चत्वारो वाच्याः प्रथमपुत्रवत् ॥
एषां पार्षदवर्गा ये महान्तः परिकीर्तिताः ।
नित्यानन्दगणाः सर्वे गोपालाश्चोपगोपकाः ॥
एषां संबन्धसंपर्कादुपगोपालसत्तमाः ।
तत्र श्रीमन्नवद्वीपे विश्वंभरसमीपतः ॥
विलसन्ति स्म ते ज्ञेया वैष्णवा हि महत्तमाः ।
नीलाचले च ये ख्यातास्ते हि ज्ञेया महत्तराः ॥
दक्षिणादिदिशां याने यैर्यैः सङ्गो महाप्रभोः ।
ते ते महान्तो मन्तव्याः परे ज्ञेयाः स्वयोग्यतः ॥
अतः स्वरूपचरणैरुक्तं गौरनिरूपणे ।
पञ्चतत्त्वस्य संपर्का ये ये ख्याता महत्तमाः ।
ते ते महान्तो गोपालाः स्यानाच्छ्रेष्ठ्यादिवाचकाः ॥

रसज्ञाः श्रीवृन्दावनमिति यमाहुर्बहुविदो
 यमेतं गोलोकं कतिपयजनाः प्राहुरपरे ।
श्वेतद्वीपं प्राहुः परमपि परे व्योम जगदुर्
 नवद्वीपः सो ऽयं जयति परमाश्चर्यमहिमा ॥

Digitized by Microsoft ®

तस्मिन्त्रासमुरीचकार नृहरिर्विश्वंभराख्यं दधत्
तच्चेष्टावशतः समस्तमहतां वासो ऽपि तत्राभवत् ।
तैः साकं महती हरेरनु गुणाकारापि लीलाभवत्
तत्रासीज्जगतां मनो ऽपि परमानन्दाय मन्दं यतः ॥

यः सत्ये (ऽ)सितवर्णमादधदसौ श्रीहंसनामाभवत्
त्रेतायां मखभुग्मखाख्य उचितो ऽभूद्रक्तवर्णं दधत् ।
यः श्यामो दधदासवर्णकममुं श्यामं युगे द्वापरे
सो ऽयं गौरविधुर्विभाति कलयन्नानावतारं कलौ ॥

प्रादुर्भूताः कलियुगे चत्वारः सांप्रदायिकाः ।
श्रीमाध्वीरुद्रसनका भवाः पाद्मे यथा स्मृताः ॥

अतः कलौ भविष्यन्ति चत्वारः संप्रदायिनः ।
श्रीमाध्वीरुद्रसनका वैष्णवाः क्षितिपावनाः ॥

तत्र माध्वीसंप्रदायः प्रस्तावात्परिलिख्यते ।
परव्योमेश्वरस्याभूच्छिष्यो ब्रह्मा जगत्पतिः ॥

तस्य शिष्यो नारदो ऽभूद् व्यासस्तस्याप शिष्यतां ।
शुको व्यासस्य शिष्यत्वं प्राप्तो ज्ञानावबोधनात् ॥

तस्य शिष्याः प्रशिष्याश्च बहवो भूतले स्थिताः ।
व्यासाल्लब्धकृष्णदीक्षो मध्वाचार्यो महायशाः ॥

चक्रे वेदान् विभज्यासौ संहितां शतदूषणीं ।
निर्गुणाद् ब्रह्मणो यत्र सगुणस्य परिष्क्रिया ॥

तस्य शिष्यो ऽभवत् पद्मनाभाचार्यो महाशयः ।
तस्य शिष्यो नरहरिस्तच्छिष्यो माधवो द्विजः ॥

पद्मनाभस्तस्य शिष्यो ऽभूत् (!) तच्छिष्यो जयतीर्थकः ।
तस्य शिष्यो ज्ञानसिन्धुस्तस्य शिष्यो महानिधिः ॥

विद्यानिधिस्तस्य शिष्यो राजेन्द्रस्तस्य सेवकः ।
जयधर्मो मुनिस्तस्य शिष्यो ऽभूद् गणमध्यतः ॥

श्रीमद्विष्णुपुरी यस्य भक्तिरत्नावली कृतिः ।
जयधर्मस्य शिष्यो ऽभूद् ब्रह्मण्यः पुरुषोत्तमः ॥

व्यासतीर्थस्तस्य शिष्यो यश्चक्रे विष्णुसंहितां ।
श्रीमांल्लक्ष्मीपतिस्तस्य शिष्यो भक्तिरसाश्रयः ॥

तस्य शिष्यो माधवेन्द्रो यद्धर्मो ऽयं प्रवर्तितः ।
कल्पवृक्षस्यावतारो व्रजधामनि तिष्ठतः ॥

प्रीतप्रेयोवत्सलतोज्ज्वलाख्यफलधारिणः ।
तस्य शिष्यो ऽभवच्छ्रीमानीश्वराख्यपुरी यतिः ॥

कलयामास शृङ्गारं यः शृङ्गारफलात्मकः ।
अद्वैतः कलयामास दाससख्ये फले उभे ॥

श्रीमान् रङ्गपुरीति सद्वात्सल्ये यत्समाश्रितः ।
ईश्वराख्यपुरीं गौर उररीकृत्य गौरवे ॥

जगदाप्लावयामास प्राकृताप्राकृतात्मकं ।
स्वीकृत्य राधिका भावकान्ती पूर्वसुदुष्करे ॥

अन्तर्बाह्यरसाम्भोधी श्रीनन्दनन्दनो ऽपि सन् ।
आद्यो व्यूहो ऽपि चैतन्यमविशद् यत्परे पुरा ॥

विचुक्षोभ मनस्तस्य दृष्ट्वा गन्धर्वनर्तनं ।
द्वारकास्थो ऽपि भगवानविशच्छ्रीमच्छचीसुतं (!) ॥

नानावतारः सुतरामेककालप्रभावतः ।
यथा श्यामो ऽविशत्कृष्णं भगवन्तं पुरा स्वयं ॥

योगमायाबलादेते तिष्ठन्तो ऽन्यत्र यद्यपि ।
तथापि प्राविशन् गौरे ऽचिन्त्यलक्षणलक्षतः ॥

यथोक्तं व्यासचरणैः प्रभासखण्डमध्यतः ।
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति ॥

रघुनाथं प्रविश्यापि यथा तिष्ठति भार्गवः ।
एवं श्रीनारदमुखास्तिष्ठन्तो ऽन्येषु धामसु ॥०

It ends:

श्रीगौराङ्गगणोद्देशदीपिका रचिता मया ।
दीप्यतां परमानन्दसंदोहभक्तवेश्मनि ॥

शाके रसारसमिते मनुनैव युक्ते
ग्रन्थो मयाविरभवत् कतमस्य वक्त्रात् ।
चैतन्यचन्द्रचरितामृतमग्नचित्तैः
शोध्यः समाकलितगौरगणाख्य एषः ॥

इति श्रीकविकर्णपूरविरचिता श्रीगौरगणोद्देशदीपिका समाप्ता॥
श्रीभैरवचन्द्रदेवशर्मणो लिखितमिदं ॥

For another MS. see Roth, Tübingen MSS., p. 9. [H. T. Colebrooke.]

2511.

199. Foll. 29; size 11 in. by 5 in.; indifferent Devanāgarī writing of about 1750 A.D.; 10–14 lines in a page.

Brahmasaṃhitā (or *Bhagavatsiddhāntasaṃgraha*), *Adhyāya* V., consisting of a (*Paurāṇik*) account of the origin and divinity of *Kṛishṇa*, followed by a hymn to the same deity; with a commentary, entitled *Digdarśanī*, by *Rūpa*, younger brother of *Sanātana*, and elder brother of *Vallabha*.

Digitized by Microsoft®

The entire work is stated to consist of a hundred *adhyāyas*.

A. The text contained in the present MS. runs as follows:

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणं ॥ १ ॥

सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसंभवं ॥ २ ॥

कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकं ।
षडङ्गं षट्पदीस्थानं प्रकृत्या पुरुषेण च ॥ ३ ॥

प्रेमानन्दमहानन्दरसेनावस्थितं हि यत् ।
ज्योतीरूपेण मनुना कामबीजेन संगतं ॥ ४ ॥

तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ।
चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतं ॥ ५ ॥

चतुरस्रं चतुर्मूर्तेश्चतुर्धाम चतुष्कृतं ।
चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतं ॥ ६ ॥

शूलैर्दशभिरानद्धमूर्ध्वाधो दिग्विदिक्ष्वपि ।
अष्टाभिर्निधिभिर्युक्तमष्टाभिः सिद्धिभिस्तथा ।
अनुरूपैश्च दशभिर्दिक्पालैः परितो वृतं ॥ ७ ॥

श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ ८ ॥

एवं ज्योतिर्मयो देवः सदानन्दपरात्परः ।
आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ ९ ॥

मायया रममाणस्य न वियोगस्तया सह ।
आत्मना रमया रेमे त्यक्तकालं* सिसृक्षया ॥ १० ॥

नियतिः सा रमा देवी तत्प्रिया तद्वशंवदा ।
तल्लिङ्गं भगवाञ्शंभुर्ज्योतीरूपः सनातनः ॥ ११ ॥

या योनिः सा परा शक्तिः कामो बीजं महद्धरेः ।
लिङ्गयोन्यात्मिका जाता इमा माहेश्वरीप्रजाः† ॥ १२ ॥

शक्तिमान्पुरुषः सो ऽयं लिङ्गरूपी महेश्वरः ।
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १३ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः‡ ॥ १४ ॥

नारायणः स भगवानापस्तस्मात्सनातनात्§ ।
आविरासन् कारणार्णोनिधिसंकर्षणात्मकः ॥ १५ ॥

योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ।
तद्रोमबिलजालेषु बीजं संकर्षणस्य च ॥ १६ ॥

हैमान्यण्डानि जातानि महाभूतावृतानि तु ।
प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयं ॥ १७ ॥

सहस्रमूर्धा विश्वात्मा महाविष्णुः सनातनः ।
वामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिं ॥ १८ ॥

ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवासृजत्‖ ।
अहंकारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ १९ ॥

अथ तैस्त्रिविधैरंशैर्लीलामुद्वहतः किल ।
योगनिद्रा भगवती तस्य श्रीरेव संगता ॥ २० ॥

सिसृक्षया ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनलिनं ब्रह्मणो लोकमद्भुतं ॥ २१ ॥

तत्त्वानि पूर्वरूपाणि कारणानि परस्परं ।
समवायेत् प्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥ २२ ॥

चिच्छक्त्या सज्जमानो ऽथ भगवानादिपूरुषः ।
योजयन्मायया देवो योगनिद्रामकल्पयत् ॥ २३ ॥

योजयित्वाथ तामेव प्रविशति स्वयं गुहां ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २४ ॥

स नित्यो नित्यसंबन्धः प्रकृतिश्च परैव सा ।
एवं सर्वात्मसंबन्धं नाभ्यां पद्मं हरेरभूत् ॥ २५ ॥

तत्र ब्रह्माभवद्भूयश्चतुर्वेदी चतुर्मुखः ।
स जातो भगवच्छक्त्या तत्कालं किल चोदितः ॥ २६ ॥

सिसृक्षायां मतिं चक्रे पूर्वं संस्कारसंस्कृतां ।
ददर्श केवलं ध्वान्तं नान्यत्किमपि सर्वतः ॥ २७ ॥

उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
कामः कृष्णाय गोविन्द ङों गोपीजन इत्यपि ॥ २८ ॥

वल्लभाय प्रिया वह्नेरयं ते दास्यति प्रियं ।
तप त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ २९ ॥

अथ तेपे स सुचिरं प्रीणन्गोविन्दमव्ययं ।
श्वेतद्वीपपतिं कृष्णं गोलोकस्थं परात्परं ॥ ३० ॥

प्रकृत्या गुणरूपिण्या रूपिण्या पर्युपासितं ।
सहस्रदलसंपन्ने कोटिकिञ्जल्कबृंहिते ॥ ३१ ॥

---

* स्रष्टुमिच्छया त्यक्तः सृष्ट्यर्थं प्रहितः कालो यस्माद्रमणात् तादृशं यथा स्यात्तथा रेमे ।

† माहेश्वरी माहेश्वर्यः ।

‡ सहस्रं सूते सृजति ।

§ आपो वै नरसूनवः ।

‖ भ्रुवोर्मध्यात् ।

Digitized by Microsoft®

भूमिश्चिन्तामणिस्तत्र कर्णिकारे महासने ।
समासीनं चिदानन्दं ज्योतीरूपं सनातनं ॥ ३२ ॥
शब्दब्रह्ममयं वेणुं वादयन्तं मुखाम्बुजे ।
विलासिनीगणवृतं स्वैः स्वैरंशैरभिष्टुतं ॥ ३३ ॥
अमूला तत्क्रमा ज्ञेया क्षांतिः सृष्टिरुदाहृता ।
सर्वेषामेव मंत्राणां विद्यानां च यशस्विनि ॥

इयं योनिः समाख्याता सर्वतंत्रेषु सर्वदा ॥ fol. 26*a*.

After a general discussion, the explanation of these 4½ *ślokas* begins fol. 44*b*:

सर्वत्र स्वस्वभावात्मकप्रभावप्रख्याप्रसरानिरोधो यस्या इत्यामंत्रणे यस्येति शोभने व्रतेन तदयमत्र संक्षेपार्थः ॥ स्वातंत्र्यैकरसावेशचमत्कारैकलक्षणा । परा भगवती नित्यं भासते भैरवी स्वयं॥ तस्याः स्वभासा योगो यः सो निरुद्धः सदोदितः। सदाशिवधरा तिर्यङ्नीलपीतसुखादिभिः ॥ भासमानैः स्वस्वभावैः स्वयं प्रथनशालिभिः । प्रथते संविदाकारः स्वसंवेदनसारकः ॥ स्वस्वसंवेदनं नाम प्रमाणमिति वर्ण्यते । बालतिर्यक्सर्वविदां यत्साम्येनैव भासते॥ इंद्रियाणि त्रिरूपं च लिंगं परवचःक्रमः। सारूप्यमन्यथा योगः प्रतीत्यनुदयो यमः ॥ इत्यादिको यस्य सर्वं द्वारमात्रे निरूप्यते । तत्स्वसंवेदनं प्रोक्तमविच्छेदप्रथामयं ॥ येषां नाक्षत्रिरूपादिनाममात्रे ऽप्यभिज्ञता । तेषामपि तिरश्चां हि सा सा संवित्प्रकाशते ॥ एवंभासा स्वभावेन स्वरूपामर्शनात्मिका । स्वरूपामर्शनं यच्च तदेव परवाग्वपुः ॥ तद्विचित्रस्वभावत्वाद्विचित्रप्रथनामयं । प्रथने पारतंत्र्यं हि न जातु भजते क्वचित् ॥ अपारतंत्र्यात्संकेतप्रत्यूहादेः कथं स्थितिः । अतः संकेतरहितं स्वस्वरूपविमर्शनं ॥ देशकालकलामायास्थानघातक्रियोत्तरं । परिपूर्णं स्वतः सर्वं सर्वाकारविलक्षणं ॥ स्वाभाविकमहासंवित्सत्संस्कारैकलक्षणं । शुद्धविद्यात्मकं रूपमहमित्युभयात्मकं ॥ तदेव मातृकारूपं धरादीनां निजं वपुः । तत्पारमार्थिकाकारं द्रुत्याशयानस्वरूपतः॥ बीजयोन्यात्मकं प्रोक्तं शिवशक्तिस्वरूपकं। शिवशक्त्योस्तु संघट्टादन्योन्योच्छलितत्वतः ॥ परस्परसमापत्तिर्जगदानंददायिनी। अंतःस्थविश्वपार्यंतपारमार्थिकसद्वपुः ॥ यद्वीर्यमिति निर्णीतं तद्विश्लेषणयोजना । विसर्ग इति यत्प्रोक्तं धुमधाम(?) तदुच्यते॥ अनुत्तरपदावाप्तौ स एष सुघटो विधिः। अस्मादेव त्वमायीयाद्वर्णपुंजान्निरूपिता ॥ मायामालंब्य भिन्नैव श्रीपूर्वे सृष्टिराक्षसी । पंचाशद्भेदसंभिन्नप्रत्ययप्रसवात्मिका ॥ बंधरूपा स्वभावेन स्वरूपा वरणात्मिका । अत्रैवांतर्गतास्तास्ताः खेचर्यो विषयात्मिकाः॥ तन्वते संसृतिं चित्रां कर्ममायाणुतामयीं। अस्यां साम्यं स्वभावेन शुद्धभैरवतामयं ॥ प्रोक्तं प्रागेव जीवत्वं मुक्तत्वं पारमार्थिकं । भिन्नाया वर्णसृष्टेश्च तदभिन्नं वपुः परं ॥ वीर्यमित्युक्तमत्रैव यद्गुप्त्या मंत्रगुप्तता । तदेतदहमित्येव विसर्गानुत्तरात्मकं ॥ स्वं स्वभावं परं ज्ञानञ्जीवन्मुक्तः सकृद्बुधः। सिद्धादिप्रेप्सवस्तेन कृप्तसंकोचसूत्रितं ॥ नाभिकुंडलहृद्व्योम्नोर्योगिनोहमुपासते(?)। तदेतत्किल निर्णीतं यथागुर्वागमं मनाक् ॥ एतां संविदमालंब्य यत्स्यात्तत्पृच्छता स्वचित् । नैतावतैव तुलितं मार्गांशस्तु प्रदर्शितः ॥ इयतीति व्यवच्छिंद्याद्भैरवीं संविदं हि कः । एतावाञ्शक्तिपातो ऽयमस्मासु प्रविजृंभितः ॥ येनाधिकारितैरेतदस्माभिः प्रकटीकृतं । अस्माकमन्यमातॄणामद्य कालांतरे ऽपि वा ॥ भवत्यभूत्वाभविता तत्कः सूक्ष्मतमो ऽप्यतः । यः सर्वयोगावयवप्रकाशेषु गभस्तिमान् ॥ श्रीपूर्वशास्त्रे निर्णीतो येन मुक्तश्च मोचकः । एतत्तु सर्वथा ग्राह्यं विमृश्यं च परेप्सुभिः ॥ क्षणं मर्त्यत्वसुलभां हित्वासूयां विचक्षणैः । आलोचलक्षणादूर्ध्वं यद्भवेदात्मनि स्थितिः ॥ चिदर्कोभ्रलवास्तेन संशाम्यंते स्वतो रसात् ॥ Then follows a *prākṛit* passage: परसंवेअण भाससजइण थिर अरसुहसो आइसजइणसइ भासइस ° fol. 56*b*.

ततश्च विस्तरतो ऽनुत्तरस्वरूपनिरूपणाय ग्रंथावतारस्तन्निरूपयति ॥ चतुर्दशयुतं भद्रे तिथीशांतसमन्वितं । तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः॥ एतन्नायोगिनीजातो नारुद्रो लभते स्फुटं । हृदयं देवदेवस्य सद्यो योगविमोक्षदं ॥ अस्योच्चारे कृते सम्यङ्मंत्रमुद्रागणो महान् । सद्यस्तन्मुखतामेति स्वं देहावेशलक्षणं॥ मुहूर्तं स्मरते यस्तु चकेनाभिमुद्रितः। स बध्नाति तदा सर्वं मंत्रमुद्रागणं नरः ॥ अतीतानागतानर्थान्पृष्टो ऽसौ कथयत्यपि। प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन्॥ साक्षात्पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः। प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन्॥ त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः । वीरा वीरेश्वराः सिद्धा बलवाञ्शाकिनीगणः ॥ आगत्य समयं दत्त्वा भैरवेण प्रचोदिताः। यच्छंति परमां सिद्धिं फलं यद्वा समीहितं॥ अनेन सिद्धाः सेत्स्यंति साधयंति च मंत्रिणः । यत्किंचिद्भैरवे तंत्रे सर्वमस्मात्प्रसिध्यति ॥ अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः । प्रसिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥ fol. 59*a*.

°यदुक्तं कुलात्परतरं त्रिकमिति सर्वोत्तरमनुत्तरत्वं तन्निरूपयति ।

Digitized by Microsoft®

अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग् भवेन्नित्यं स योगी स च दीक्षितः ॥
[fol. 68*b*.

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः । fol. 69*a*.

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ।
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ॥
कालाग्निमादितः कृत्वा मायांतं ब्रह्मदेहगं ।
शिवो विश्वाद्यनंतश्च परशक्तित्रयं मतं ॥ fol. 69*b*.

तदंतर्वर्ति यत्किंचिच्छुद्धमार्गे व्यवस्थितं ।
अणुविशुद्धमचिरादैश्वरं ज्ञानमश्नुते ॥
तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ।
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ॥
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरं ॥
एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता ॥ fol. 70*a*.

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ।
न्यासं कृत्वा शिखां बद्ध्वा सप्तविंशतिमंत्रितां ॥
एकैकं तु दिशां बंधं दशानामपि योजयेत् ।
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशांतये ॥
शिखासंख्याभिजप्तेन तोयेनाभ्युक्षयेत्ततः ।
पुष्पादिकं क्रमात्सर्वं लिंगे वा स्थंडिले च वा ॥
चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ।
ततः सृष्टिं यजेद्वीरः पुनरेवासनं ततः ॥
सृष्टिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ।
सर्वतत्त्वसुसंपूर्णां सर्वाभरणभूषितां ॥
यजेद्देवीं महेशानीं सप्तविंशतिमंत्रितां ।
ततः सुगंधिपुष्पैस्तु यथाशक्त्या समर्चयेत् ॥
पूजयेत्परया शक्त्या आत्मानं च निवेदयेत् ।
एवं यजनमाख्यातमग्निकार्ये ऽप्ययं विधिः ॥ fol. 71*b*.

कृतपूजाविधिः सम्यक् स्मरन्बीजं प्रसिध्यति ॥ 73*b*.

आद्यंतरहितं बीजं विकसत्तिथिमध्यगं ।
हृत्पद्मांतर्गतं ध्यायेत्सोमांशं नित्यमभ्यसेत् ॥ fol. 75*a*.

यान्यान्कामयते कामांस्तांस्ताञ्शीघ्रमवाप्नुयात् ।
तस्मात्प्रत्यक्षतामेति सर्वज्ञत्वं न संशयः ॥
एवं मंत्रफलप्राप्तिरित्येतद्रुद्रयामलं ।
एतदभ्यासतः सिद्धिः सर्वज्ञत्वमवाप्यते ॥

Whether any other verses occurring in the MS. belong to the original treatise, it is difficult to make out.

Abhinavagupta's exposition concludes with the following genealogical account:

इत्थं प्रपन्नजनतोद्धरणप्रवृत्त-
श्रीमन्महेश्वरपदांबुजचंचरीकः ।
वृत्तिं व्यधात् त्रिकरहस्यविमर्शगर्भां
काश्मीरकाच्चुखलकादधिगम्य* जन्म ॥ १ ॥

एतावदेतदिति कस्तुलयेत्प्रसह्य
श्रीशांभवं मतमनर्गलिताश्च वाचः ।
एतत्तु तावदखिलात्मनि भाति यन्मे
भातं ततो ऽत्र सुधियो न पराङ्मुखाः स्युः ॥ २ ॥

अज्ञस्य संशयविपर्ययभागिनो वा
ज्ञानं प्रकंपरहितं प्रकरोति सम्यक् ।
रूढस्य निश्चयवतो हृदयप्रतिष्ठां
संवादिनीं प्रकुरुते कृतिरीदृशीयं ॥ ३ ॥

एतावदर्थरससंकलनाधिरूढ-
धारानिरूढहृदयो विमृशेदतो ऽपि ।
यद्युत्तरं तदपि नैव सहेत नेदं
सोपानमेतदमलं पदमारुरुक्षोः ॥ ४ ॥

काश्मीरेषु यशस्करस्य नृपतेरासीदमात्याग्रणीः
श्रीमान्वल्लभ इत्युदाहृततनुर्यः प्राग्र्यजन्मा द्विजः ।
तस्य स्वांगभवः प्रसिद्धपदवीपात्रं समग्रैर्गुणैः
श्रीशौरिः शिशुचंद्रचूडचरणध्यानैकरत्नाकरः ॥ ५ ॥

शीलस्यायतनं परस्य यशसो जृंभास्पदं नर्मभूर्
वात्सल्यस्य समग्रलोककरुणाधर्मस्य जन्मस्थितिः ।
श्रीमद्वत्सलिकाभिधा च सहजा(सहचरी B.) तस्यैव
[भक्त्युल्लसत्
प्रोद्रिक्तांतरवृत्तिशंकरनुतौ यस्या मनो जृंभते ॥ ६ ॥

तस्यैवात्मभवो विभावितजगत्सर्गस्थितिः शंकर-
ध्यानार्चापरिचिंतनैकरसिकः कर्णाभिधानो द्विजः ।
यो बाल्ये ऽप्यथ यौवने ऽपि विषयासक्तिं विहाय
[स्थिराम्
एनामाश्रयते विमर्शपदवीं संसारनिर्मूलिनीं ॥ ७ ॥

---

* Prof. Bühler's Report has काश्मीरिकाद्विचुलकादधिगम्य.

Digitized by Microsoft®

भ्राता ममैव शिवशासनरूढचेता:
प्रेप्सु: परात्मनि मनोरथगुप्तनामा ।
य: शास्त्रतंत्रमखिलं प्रविवेक्तुकाम:
प्राप्तुं परं शिवपदं भवभेदनाय ॥ ८ ॥

शिवशास्त्रैकरसिक: पदवाक्यप्रमाणवित् ।
रामदेवाभिधानश्च भूपितोत्तमजन्मक: ॥ ९ ॥

एतत्प्रियहितकरणप्ररूढहृदयेन यन्मया रचितं ।
मार्गप्रदर्शनं तत्सर्वस्य शिवाप्तये भूयात् ॥ १० ॥

अंतर्वेद्यामत्त्रिगुप्ताभिधान:*
प्राप्योत्पत्तिं प्राविशत्प्राग्र्यजन्मा ।
श्रीकाश्मीरांश्चंद्रचूडावतारैर्नि:-
संख्याकै: पावितोपांतभागान् ॥ ११ ॥

तस्यान्ववाये महति प्रसूताद्वराहगुप्तात्प्रतिलब्धजन्मा ।
संसारवृत्तांतपराङ्मुखो य: शिवैकचित्तश्चुखलाभिधान:
[॥ १२ ॥

तस्माद्विवेचितसमस्तपदार्थशास्त्राल्
लब्ध्वापि देहपदवीं परमेशपूतां ।
प्राप्ताभयो ऽभिनवगुप्तपदाभिधान:
प्रावेशयत् त्रिकसतत्त्वमिदं निगूढं ॥ १३ ॥

ये तावत्प्रविवेकवंध्यहृदयास्तेभ्य: प्रणामो वर:
के ऽप्यन्ये प्रविविंचते न च गता: पारं धिगेताञ्जडान्।
यस्त्वंत: प्रविमर्शसारपदवीसंभावनासु स्थितो
लक्षैको ऽपि स कश्चिदेव सफलीकुर्वीत यत्नं मम
[॥ १४† ॥

स्वात्मानं प्रविवेक्तुमप्यलसता ये बिभ्रति प्रार्थना[त्]
तान्प्रत्यात्मकदर्थनान्न परत: किंचित्फलं शोध्यते ।
विश्वस्यास्य विविक्तये स्थिरधियो ये संरभंते पुनस्
तानभ्यर्थयितुं मयैष विहितो मूर्ध्ना प्रणामादर: ॥ १५ ॥

भ्राम्यंतो भ्रमयंति मंदधिषणास्ते जंतुचक्रं जडं
स्वामी कृत्यगुणाभिधानवशतो बद्धा दृढं बंधनै: ।
दृष्ट्वेत्थं गुरुभारवाहविधये यातानुयातान्पशू-
स्तत्पाशप्रविकर्तनाय घटितं ज्ञानत्रिशूलं मया ॥ १६ ॥

बहुभिरपि सो ऽहमेव भ्रमितस्तत्त्वोपदेशकंमन्यै: ।
तत्त्वमिति वर्णद्वय(*r.* युग)मपि रसना येषां न पस्पर्श ॥१७॥

परमेश्वर: प्रपन्नप्रोद्धरणकृपाप्रयुक्तगुरुहृदय: ।
श्रीमान्देव: शंभुर्मामिषति नियुक्तवांस्तत्त्वे ॥ १८ ॥

तत्तत्त्वनिर्मलस्थितिविभागिहृदये स्वयं प्रविष्टमिव ।
श्रीसोमानंदमतं प्रविमृश्य मया निबद्धमिदं ॥ १९ ॥

हंहो हृच्चक्रचारप्रविरचनलसन्निर्भरानंदपूर्णा-
देव्या: सत्पाशकोटिप्रविघटनपटुज्ञानशूलोर्ध्वधारा: ।
चेतोवाक्कायमेतद्विगतभवभयोत्पत्ति युष्मासु सम्यक्
प्रोतं यत्नेन मह्यं व्रजत किल हृदि द्राक्प्रसादं प्रसह्य
[॥ २० ॥

व्याख्यादिकर्मपरिपाटिपदे नियुक्तो
युष्माभिरस्मि गुरुभावमनुप्रविश्य ।
वाक्चित्तचापलमिदं मम तेन देव्यास्
तच्चक्रचारुचतुरस्थितय: क्षमध्वं ॥ २१ ॥

समाप्तमिदं त्रिंशिकातत्त्वविवरणं ॥ कृतिस्त्रिनयनचरणचिं-
तनलब्धप्रसिद्धे: श्रीमद्राजानकाभिनवगुप्तस्य ॥

शतैरेकोनविंशत्या त्रिंशिकेयं विवेचिता ।
सर्वेषु त्रिकशास्त्रेषु ग्रंथीन्निर्दलयिष्यति ॥

शुभमस्तु सर्वजगतो परहितनिरता भवंतु भूतगणा: ।
दोषा: प्रयांतु शांतिं सर्वेश्च सुखी भवतु लोक: ॥

From the way in which *Somānanda* is referred to in the above extracts, it seems clear that he must have been the author of the *Triṃśikā* (see Hall, Index, p. 198, where the author is called *Someśvara*), and that he also wrote a commentary on his own verses, referred to as *nijavṛitti* (once *nijavivṛiti*, fol. 55*a*). His *Śivadṛishṭi* is likewise quoted at foll. 29*b*, 33*a* (where *Somānanda* is expressly mentioned as the author), 75*a*; whilst a *śloka* by him is quoted at fol. 17*b* [यदुक्तं सोमानंदपादैरपरस्थितौ । सा बुद्धिर्यत्पुन: सूक्ष्मं सर्वदिक्कमवस्थितं । ज्ञानं बोधमयं तस्य शिवस्य सहजं सदेति]. And further, fol. 25*a*: तथा हि केषुचिद्वृद्धपुस्तकेष्वीदृक् श्लोकांतरं दृश्यते। श्रुतं देव महाज्ञानं त्रिकाख्यं परमेश्वर। उत्तरं च तथा ज्ञानं त्वत्प्रसादावधारितमिति ॥ तदस्मच्छ्रीसोमानंदपादनिरूपितव्याख्यानुसारेणैव यद्गुरव: समादिक्षंस्तदेव सर्वस्य करोति शिवं । °

* Prof. Bühler's MS. reads अन्तर्वेद्यां मंत्रिगुप्ताभिधान:

† The MS. again makes this verse 13; the succeeding verses then being likewise numbered wrongly. See Prof. Bühler's Report, where a similar mistake is made by the two *S'ālinī* verses 11 and 12 being numbered as a single stanza.

Digitized by Microsoft®

Abhinavagupta quotes his own *Śivadṛishṭyālocana* at fol. 30*b*; his commentary *Kramakeli* on (?his own) *Kramastotra*, fol. 64*b*; and four verses from a *stotra* (or *stotras*) of his (मयैव स्तोत्रे ।? the *Kramastotra*), each in a different metre, foll. 15*b*, 44*b*, 53*a*, 60*a*. We also read, fol. 7*a*: तदेतच्छ्री-*Pūrvapañcikāyāṃ* मयैव विस्तरतो निर्णीतमिहानुपयोगाद्ग्रन्थगौरवाच्च न वितत्योक्तं ।; fol. 44*a*: वितत्य च विचारितं मयैतत् *Padārthapraveśanirṇayaṭīkāyām* इति किमिह वृथा वाग्जालेन: and further fol. 4*b* (an *āryā*) without any introduction: गोप्यमुपदेशसारं सद्यो भैरवपदावहं सततं । अभिनवगुप्तेन मया व्याख्यातं प्रश्नसवेस्वं ॥ and fol. 16*b*: तदत्र प्रश्नसवेस्वे ॥ श्रीभैरव उवाच ॥ व्याख्यातं प्रागेवैतत् किं पुनरुक्तता पादनेन भैरवो भरणात्मको महामंत्ररवात्मकश्च ॥

Other authorities referred to are: (*śrīmad-*) *Ucchushmaśāstra*; *Utpaladeva*, fol. 7*b* [ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतं ॥]; fol. 9*a* [स क्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः । घटनेन तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरपि ॥]; fol. 52*b* (*Īśvarapratyabhijñāṭīkāyām*); *Kallaṭa*, fol. 27*b* [यदाहुः श्रीकल्लटपादाः । तुटिपाते सर्वज्ञत्वसर्वकर्तृत्वलाभ इति ॥]; *Kālottara*, fol. 42*a*; *Kiraṇā* (one *śloka*), fol. 69*b*; *Kubjikā(tantra)*, fol. 49*b* [तथा श्रीकुब्जिकामते चक्रविचारे मुमेवार्थं प्रधानतयाधिकृत्यादिष्टं । मायोपरि महामाया त्रिकोणानंदरूपिणीत्यादि ॥]; *Guhyayoginītantra*, fol. 51*a* (two *ślokas*); *Tantrasamuccaya*, fol. 21*a* (one *śloka*: नरशक्तिशिवावेशि ०); *Tantrasāra*, fol. 5*b* [त्रिंशिकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः], fol. 30*b* (*śl.*), fol. 46*b* [निजोत्तमांगच्छायात्त्वम् ।]; *Tilakaśāstra* (?*Śāradātilaka*), fol. 64*a*; *Trikatantrasāra*, fol. 49*b* [शिवशक्तिसमापत्त्या शिवशक्तियनात्मकः । ०], fol. 60*b* [आनंदप्रसरः पूजा तां त्रिकोणे प्रकल्पयेत् । ०]; *Trikahṛidaya*, fol. 4*a* [नित्यं विसर्गपरमः स्वशक्तौ भैरवो विभुः ।०], fol. 41*b*; *Triratnakula*, fol. 51*b* [अष्टाष्टकविभेदेन मातृकाया निरूपितं । तदेव कुलचक्रं तु तेन व्याप्तमिदं जगदिति ॥ मातृकाज्ञानभेदे विस्तरतो निरूपितमेतत् ॥]; *Nārāyaṇa Bhaṭṭa* or *Bh. N.*, fol. 18*a* [त्रैलोक्ये ऽप्यत्र यो यावानानंदः कश्चिदीक्ष्यते । स बिंदुर्यस्य तं वंदे देवमानंदसागरं ॥], fol. 54*b* [प्रणवोर्ध्वार्धमात्रार्थो ऽप्यणव इति ।]; *Niśācara*, fol. 24*a* [वाममार्गाभिषिक्तो ऽपि दैशिकः परतत्त्ववित् । संस्कार्यो भैरवे सो ऽपि कुले काले त्रिके ऽपि सः ॥]; *Pañcasrotaḥ-prabhṛitīni śāstrāṇi*, fol. 4*b*; (*bhagavat*) *Pushpadanta*, fol. 47*a* [स्वश्रुतिसामान्यान्वासिद्धमिति शून्ये हि निश्चले रूपे ऽनुप्रविविक्षायां भास्वररूपसंविन्निसोपानक्रमेण ० इति ।]; *Pūrvaśāstra*, fol. 40*a* [यथेष्टफलसंसिद्धै मंत्रतंत्रानुवर्तिनां ।०], fol. 58*a* (cp. p. 839*b*, l. 34), fol. 65*b* [सार्णेन त्रितयं व्याप्तं त्रिशूलेन चतुर्थकं । ०]; *Bhargaśikhā*, fol. 64*a* [वीरव्रतं चाभिनंदेद्यथायोगं तथाभ्यसेत् ।]; *Bhartṛihari* (*śl.*) fol. 33*b*, (*vākyavicāre*) fol. 65*b*; *Mālinītantra*, fol. 21*a* [एवं सर्वानुसंधानं ० *śl.*], fol. 31*b* (*mālinī-vijayottara-siddhātantrasvacchandādiśāstreshu*); *Mukuṭasaṃhitā*, fol. 64*b* [जातीनां च ब्राह्मणादीनां नास्ति स्थितिः कल्पितत्वादुपदेशव्यंगतेति तु दुर्बुद्धीन्प्रत्यायायेदिति च भगवता मुकुटसंहितायां विस्तरतो निर्णीतं ॥]; *Vādyatantra*, fol. 9*b* [संरुध्य रश्मिचक्रं स्वं पीत्वामृतमनुत्तमं । कालोभयपरिच्छिन्नं वर्तमाने सुखी भवेत् ॥]; *Vāmana*, fol. 53*a* (after quoting a verse from his own *stotra*, he adds इत्येष एव श्रीवामनविरचिते द्वयसंपत्तिवार्त्तिके उपदेशनयो बोद्धव्यः); *Vāyasanīyatantra*(!), fol. 41*b* [तथा श्रीवाजसनीयतंत्रे वर्णान्यथोचितं निवेश्योक्तं । इत्येतन्मातृकाचक्रं दिव्यं विष्णुपदास्पदं ज्ञातं गुरुमुखात्सम्यक्पशोः पाशाविकृंततीति ॥]; *Vīrāvalīśāstra*, fol. 64*a*; *Vaishṇavavāmaśāstrāṇi*, fol. 42*a*; *Sarvācāra*(!), fol. 24*a* [दैशिकः परतत्त्ववित् ०]; *Sarvācāra*, fol. 64*a* [अज्ञानाच्छंकते मूढस्ततः सृष्टिश्च संहृतिः ।० 4 *śl.*]; *Śaivavāmaśāstrāṇi*, fol. 42*a*; (*bhaṭṭāraka-*) *Śrīkaṇṭha* (*-pāda*), fol. 52*b* [पश्यत्यन्यच्छृणोत्यन्यत्करोत्यन्यच्च जल्पति । चिंतयत्यन्यदाभुंक्ते तत्रासांकेतिकी स्थितिः ॥]; *Siddhisantāna*, fol. 24*a* [प्रकाशमाना भासैव यद्गतिस्तत्सदैव हि ।]; *Spandaśāstra*, fol. 5*b* [इति वा यस्य संविर्त्तिः क्रीडा त्वेनाखिलं जगत् । ०], fol. 24*a* [तदस्ति परमार्थेतः ।]; *Svacchandatantra*, fol. 4*a* [गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः । पूर्वोत्तरपदैर्वाक्यैस्तंत्रं समवतारयत् ॥].

Prose *Prākrit* passages occur on foll. 5*a*, 5*b*, 17*a*, 24*b*, 29*a*, 58*a*, 74*b*, without any indication as to their source.

The etymology of '*triṃśikā*' is discussed at fol. 5*a*: अभिनवानां त्रीशिकेति । तिसृणां शक्तीनामिच्छा-

Digitized by Microsoft ®

ज्ञानक्रियाणां सृष्ट्याद्युद्योगादिनामांतरनिर्वाच्यानामीशिका ईश्वरी ईशना चेशितव्या व्यतिरेकेणेव भाविनीत्येतच्छक्तिभेदत्रयोत्तीर्णा तच्छक्त्यविभागमयी संविद्भगवतीभट्टारिकापराभिधेयं। तद्योगादेव चेदमभिधानं त्रिंशिकेत्यपि गुरवः पठंति । अक्षरवर्णसाम्याच्च निरुक्तमाहुः । तिस्रः शक्तीः कायतीति त्रिंशिका। न तु त्रिंशच्छ्लोकयोगात्त्रिंशिका । एतावतो ऽपि त्रिंशिकार्थत्वात् ॥ तथा हि श्रीतंत्रसार° (p. 840*a*, l. 28).

The leaves are marked श्री° परा° (fol. 1 परात्रिं°).

Regarding the author (c. 1000 A.D.), see Bühler, Detailed Rep. on Kaśmīr MSS., p. 80.

[H. T. COLEBROOKE.]

2527.

2235. Foll. 61; size 7 in. by 5½ in.; in European manner; fairly good, modern Devanāgarī writing; twenty-two lines in a page.

Paramārthasārasaṃgraha, a summary of the *Śaiva* doctrine, by *Abhinavagupta;* with a commentary (*vivṛiti*) by *Rājānaka Yogarāja,* of Vitastāpurī.

The commentary begins:

चिद्घनो ऽपि जगन्मूर्त्या श्यानो यः स जयत्यजः ।
स्वात्मप्रच्छादने क्रीडाविदग्धः परमेश्वरः ॥

यो ऽयं व्यधायि गुरुणा युक्त्या परमार्थसारसंक्षेपः ।
विवृतिं करोमि लघ्वीमस्मिन्विद्वज्जनार्थितो योगः ॥

इह शिवाद्वयशासने देहादिप्रमातृप्राधान्यसकल्पसमुत्तशंकातंकालस्यसंशयादिरूपविघ्नौघप्रसरप्रध्वंसपूर्विकां शास्त्रनिष्पत्तिं मन्यमानः परिमितप्रमातृताधस्पदीकारेण चिदानंदैकघनस्वात्मदेवतासमावेशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भां प्रथमतस्तावत्परमेश्वरप्रवणतां परामृशति ।

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्रपद्ये ॥ १ ॥

The last *śloka* of the text runs thus:

आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम् ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥ १०३ ॥

The commentary ends:

श्रीमतः क्षेमराजस्य (योगराजस्य Oxf.) सद्गुर्वाश्रयशासाक्षात्कृतमहेशस्य तस्यांतेवासिना मया ॥ [लिनः ।
श्रीवितस्या(*r.* वितस्ता)पुरीधाम्ना विरक्तेन तपस्विना ।
विवृतिर्योगनाम्नेयं पूर्णाद्वयमयी कृता ॥

इति श्रीपरममहेश्वरश्रीराजानकयोगराजस्य कृतिः परमार्थसारसंग्रहविवृतिरियं संपूर्णा ॥

The author would seem to have been a pupil of *Abhinavagupta,* as well as of the latter's pupil *Kshemarāja.* For the same works, see Aufrecht, Cat. Bodl., no. 575, where a list of the works quoted by the commentator is given.

[R. JOHNSON.]

2528.

1256c. Foll. 23; size 8¾ in. by 4 in.; fairly written, in Devanāgarī, towards the end of last century; nine lines in a page.

Īśvarapratyabhijñāhṛidaya, a string of twenty aphorisms, embodying the essence of the doctrine of 'recognition'; with a commentary, by (*Rājānaka*) *Kshemarāja* (pupil of *Abhinavagupta*).

It begins:

नमः शिवाय सततं पंचकृत्यविधायिने ।
चिदानंदघनस्वात्मपरमार्थावभासिने ॥
शांकरोपनिषत्सारप्रत्यभिज्ञामहोदधेः ।
उद्धरामि परं सारं संसारविषशांतिदम् ॥

इह ये सुकुमारमतयो ऽकृततीक्ष्णतर्कशास्त्रपरिश्रमाः शक्तिपातवशोन्मिषितपरमेश्वरसमावेशाभिलाषिणः कतिचिद्भक्तिभाजस्तेषामीश्वरप्रत्यभिज्ञोपदेशतत्त्वं मनागुन्मील्यते । तत्र स्वात्मदेवताया एव कारणत्वं सुखोपायप्राप्यत्वं च महाफलमभिव्यंक्तुमाह ।

चितिः स्वतंत्रा विश्वसिद्धिहेतुः ॥ [१] ॥ विश्वस्य सदाशिवादेः भूम्यंतस्य सिद्धौ निष्पत्तौ प्रकाशने स्वेत्यात्मनि परप्रेमात् विश्रांत्यात्मनि संहारे। परा शक्तिरूपा चितिरेव । भगवती तुन्नरविमयी शिवभट्टारकाभिन्ना हेतुः कारणं ॥ अस्यां हि प्रसर्पंत्यां जगदुन्मिषति व्यवतिष्ठते च निवृत्तप्रसरायां च निमिषतीति स्वानुभावात्र साक्षी ॥ अन्यस्य तु मायाप्रकृत्यादेश्चित्प्रकाशभिन्नस्याप्रकाशत्वेनासत्त्वादपि न क्वचिद्धेतुत्वं । प्रकाशमानत्वे तु प्रकाशैकात्म्यात् प्रकाशरूपा चिदेव हेतुः। न त्वसौ कश्चित् । अत एव देशकालाकारा एतत्सृष्टा एतदनुप्राणिताश्च नैतत्स्वरूपं

Digitized by Microsoft®

भेत्तुमलमिति व्यापकनित्योदिता परिपूर्णरूपेयमित्यलभ्यमेवैतत् ॥ ननु जगदपि चितो भिन्नं नैव किंचित् । अभेदे च कथं हेतुहेतुमद्भाव उच्यते । चिदेव भगवती स्वच्छस्वरूपा तत्तदनंतजगदात्मना विश्वरूपेण स्फुरतीत्येतावत्परमार्थो ऽयं कार्यकारणभावः । यच्चेयमेव प्रमातृप्रमाणप्रमेयमयस्य विश्वस्य सिद्धौ प्रकाशने हेतुस्ततो ऽस्याः । स्वतंत्राविच्छिन्नस्वप्रकाशरूपायाः सिद्धौ प्रकाशने । अभिनवार्थप्रकाशरूपं न प्रमाणं वराकमुपयुक्तमुपपन्नं वा ।०

ननु यदि विश्वस्य चितिर्हेतुस्तदास्या उपादिनाद्यपेक्षायां भेदवादापरित्यागः स्यादित्याशंक्याह ।

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति ॥ [२] ॥ स्वेच्छया न तु ब्रह्मादिवदन्येच्छा तयैव चाहरूपादानाद्यपेक्षाया एवं हि प्रागुक्तस्वातंत्र्यहान्याचित्वमेव न घटेत स्वभित्तौ न त्वन्यत्र । क्वापि प्राक् निर्णीतं विश्वं दर्पणनगरवदभिन्नमपि भिन्नमिवोन्मीलयति । उन्मीलनं चावस्थितस्यैव प्रकटीकरणमित्यनेन जगतः प्रकाशैकात्म्येनावस्थानमुक्तं । अथ विश्वस्य स्वरूपं विभागेन प्रतिपादयितुमाह ।

तन्नानानुरूपग्राह्यग्राहकभेदात् ॥ [३] ॥ तद्विश्वं नानानेकप्रकारं०

The last two aphorisms run thus:

समाधिसंस्कारवति व्युत्थाने भूयो भूयश्चिदैक्यामर्शान्नित्योदितसमाधिलाभः ॥ १९ ॥ [इदानीमस्य समाधिलाभस्य फलमाह ।] तदा प्रकाशानंदसारमहामंत्रवीर्यात्मकपूर्णाहंतात्मदा सर्वसर्गसंहारकारिनिजसंविद्देवताचक्रेश्वरताप्राप्तिर्भवतीति शिवं ॥ [२०]॥

The following authorities are quoted: *Utpaladeva*, fol. 14*b*; *Kakshyastotram*, fol. 17*b*; *Bhaṭṭa Kallaṭa*, fol. 17*b*; *Jñānagarbha*, fol. 18*a*; *Trikasāra*, fol. 2*b*; *Pratyabhijñā*, foll. 13*b*, 17*a*; *Pratyabhijñāṭīkā*, fol. 8*b*; *Vijñānabhaṭṭārakam*, foll. 2*b*, 18*a*; *Vijñānabhairavam*, fol. 18*b*; *Sarvavīrabhaṭṭārakam*, fol. 11*b*; *Spandaśāstram*, fol. 5*a*. It ends:

देहप्राणसुखादिभिः प्रतिकलं संरुध्यमानो जनः
पूर्णानंदघनामिमां न चिनुते माहेश्वरीं स्वां चितिं ।
मध्ये बोधसुधाब्धिविश्वमखिलं तत्त्वेन पिंडोपमं
यः पश्यत्युपदेशतस्तु कथितात्साक्षात्स एकः शिवः ॥
येषां वृत्तः शांकरः शक्तिपातो
येनाभ्यासात्तीक्ष्णयुक्तिष्वयोग्याः ।
शक्ता ज्ञातुं नेश्वरप्रत्यभिज्ञाम्
उक्तस्तेषामेष तत्त्वोपदेशः ॥

समाप्तमिदमीश्वरप्रत्यभिज्ञाहृदयम् ॥ कृतिः श्रीमत्क्षेमराजस्येति शिवम् ॥

Cf. Rāj. Mitra, Notices, viii., p. 43.

[H. T. Colebrooke.]

2529.

196. Foll. 367 (numbered 1–366, two leaves marked 27); size 10¾ in. by 5 in.; legibly written, in Devanāgarī, about the middle of last century; thirteen lines in a page.

Svacchandoddyota, a commentary, by *Kshemarāja*, on the *Svacchandanaya*, a treatise on *Śaiva* faith and conduct, by the commentator's teacher *Abhinavabodhāditya* (? i.e. *Abhinavaguptācārya*).

The treatise, the text of which is likewise given, is divided into fifteen chapters.

It begins (with the numbers supplied):

विश्वैकरूपविश्वात्मविश्वसर्गादिकारणम् ।
परप्रकाशवपुषं स्तुमः स्वच्छंदभैरवम् ॥ १ ॥
प्रसरच्छक्तिकल्लोलज – – हरिकेलये ।
सर्वसंपन्निधानाय भैरवांभोधये नमः ॥ २ ॥
एकैव बोधजलधेः शक्तिर्मुक्तिर्जयत्यसौ ।
यदन्तर्निखिलं भाति मुक्तामयमिदं जगत् ॥ ३ ॥
स्मृतिमात्रविनिर्वृत्तनिःशेषाज्ञानकिल्बिषः ।
गुरुमूर्तावरस्फारा(?) विजयन्ते जगत्त्रये ॥ ४ ॥
तत्सेवाविमलव्यक्तमहामाहेशदर्शनः ।
क्षेमराजो विवृणुते श्रीस्वच्छंदनयं मनाक् ॥ ५ ॥
अभिनवबोधादित्यद्युतिविकसितहृत्सरोजार्मे(?) ।
रमयत सरसाः परिमलमसारसंसारवासनाशक्त्यै ॥ ६ ॥ ०९ ॥

इहानुजिघृक्षारससरसहृदयपरमसंवित्संमुखीकृतयुक्तमवतारयितुं कश्चिद्देवीशिषु(!) आह ।

कैलासशिखरासीनं भैरवं विगतामयम् ।
चंडनंदिमहाकालगणेशवृषभृङ्गिभिः ॥ १* ॥
कुमारेंद्रयमादित्यब्रह्मविष्णुपुरःसरैः ।
स्तूयमानं महेशानं गणमातृनिषेवितम् ॥ २ ॥

* The MS. only gives the numbers from I. v. 10 to II. v. 53.

Digitized by Microsoft®

सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम् ॥ ३ ॥
सुदितं(?r.मु°) भैरवं दृष्ट्वा देवी वचनमब्रवीत् ।

इह परमेश्वरस्य चिदानं[द]घनस्य ब्रह्मदर्शनोक्तस्वातिशायनीस्वच्छंदभैरवस्फुरत्तात्मापरमार्थे इति भगवतः शास्त्रस्य तदेवाभिधानं सा च स्वात्मैकरूपपंचकृत्यकारित्वमित्याशयेन सृष्ट्यादिपंचकृत्यकरं देवं भैरवं सुदिदं(!) दृष्ट्वा देवी वचनमब्रवीदित्युक्तं । तत्र देवः शिवादिक्षित्यंताशेषसृष्ट्यादिक्रीडापरस्तावदशेषोत्कर्षतया विजिगीषुस्तदभिन्नत्वाद्विश्वस्य जगद्व्यवहाररूपतयापि द्योतमानः शिवमंत्रमहेश्वरादिभिः स्तूयमानः सर्वेषामगतीनां गतिः प्राप्यो भिन्नबोधसारश्च यथोक्तं दिवुक्रीडाविति(!) भैरवो विश्वभरणरवणवमनरूपो भीरूणामभयमिति व्युत्पत्त्या संसारिणामभयदः । भयं भीः संसारत्रासः । तया जनितो रवः सुक्रंदः भीरवः । ततो जातः° ॥ तत्कैलासशिखरं तत्रासीनं तदुत्तीर्णं प्रकाशैकघनं तदशेषव्याप्त्या च विश्वरूपं तत एव विगतामयं प्रणतानां साधकानां यथाभिलषितसंपादनेनार्तिविनाशनं । एवंभूतं देवं भैरवं सुदितं(r.मु°) यथोक्तदेवरूपैव देवी स्वातंत्र्यशक्तिर्दृष्ट्वा साक्षात्कृत्य वचनमब्रवीत् । °

श्रीदेव्युवाच ॥

यत्त्वया कथितं मह्यं स्वच्छंदं परमेश्वर ॥ ४ ॥

शतकोटिप्रविस्तीर्णं भेदानंत्यविसर्पितम् ।
चतुष्पीठं महातंत्रं चतुष्टयफलोदयम् ॥ ५ ॥

न शक्तिवर्तिमनुजाः स्वल्पवीर्यपराक्रमाः ।
अल्पायुषो ऽल्पवित्ताश्च अल्पसत्त्वाश्च शंकर ॥ ६ ॥

तदर्थं संग्रहं तस्य स्वल्पशास्त्रार्थविस्तरम् ।
भुक्तिमुक्तिप्रदातारं कथयस्व प्रसादतः ॥ ७ ॥

हे शंकर अनुग्रहपरतया श्रेयस्कर आत्मरूपपरमेश्वर यत्त्वया मह्यं स्व एव छंद इच्छा यस्य तादृगनर्गलभैरवरूपाभिधायित्वात्स्वच्छंदं ° ॥

कीदृशं च गुरुं विद्यात्साधकं च महेश्वर ।
भयाभयप्रदातारं शिष्यं भूमिं(!) च कीदृशम् ॥ ८ ॥

सत्राश्चैव समासेन कालं चैव समासतः ।
यजनं हवनं चैव अधिवासं रजांसि च ॥ ९ ॥

पंचगव्यं च दं(?) चैव दन्तकाष्ठं च मंडलम् ।
दीक्षां चाप्याभिषेकौ च समया मां धनानि च ॥ १० ॥

कलिमासाद्य सिध्यंति तथा ब्रूहि महेश्वर ।
गुर्वादिभूम्यंतं कीदृशं विद्यात् °

I. (*śl.* 86) इति श्रीमहामाहेश्वरक्षेमराजविरचिते स्वच्छंदोद्योते *mantroddhāraḥ* प्रथमः पटलः ॥ fol. 18*a*; II. *arcanādhikāra*, fol. 46*b*; III. *adhivāsapaṭala*, fol. 65*a*; IV. *dīkshābhishekaprakāśanam*, fol. 125*b*; V. *tattvādidīkshāprakāśanam*, fol. 147*a*; VI. *praṇavādhikāra*, fol. 160*a*; VII. *Kālādhikāra*, fol. 197*a*; VIII. fol. 202*b*; IX. fol. 213*b*; X. *bhuvanādhvadīkshāvidhi*, fol. 306*b*; XI. fol. 329*b*; XII. fol. 355*a*; XIII. fol. 357*a*; XIV. fol. 362*b*.

XV. The text ends:

एवं संक्षेपतः प्रोक्तं सकलं तु वरानने ।
यस्य संप्राशनाद्देवि वीरेशसदृशो भवेत् ॥
तस्माज्ज्ञानार्चनो(?°नै) होमं जपं च वरवर्णिनि ।
कुर्वंति भावितात्मानस्तत्सिध्यंति समंत्रिणः ॥
संपूर्णसिद्धीर्विदधत्स्वच्छंदो जयति प्रभुः ॥
सर्वत्रैव स्फुरति सततं सर्वसर्वात्ममूर्तिर्
योऽसौ स्वच्छच्छलितचलितोर्थोर्थसिद्धः समंतात् ।
स्वच्छंदोऽयं जयति भगवान्सर्वसंपन्निधान(:)
स्फीतस्फूर्जन्निहरुसंबंधास्फारसारस्वशक्ति(?) ॥

इति श्रीस्वच्छंदोद्योते (!) पंचदशः पटलः ॥ १५ ॥

Then follow some more explanatory remarks, after which the commentary ends:

श्रीमतेति(?r. श्रीमतो ऽभि)नवाच्छास्त्रमागमय्य गुरोरिदम् ।
व्यावृणोत्क्षेमराजस्तत्पादधूलिपवित्रित (?° पु वर्तितः) ॥
ग्रस्तो [ऽ]यं सकलो भवो हि गलितः कर्माण्डमायामलः
प्राप्तानन्दघना स्थितिः किमपरं लब्धः प्रकाशः परः ।
श्रीमच्चेतनभैरवस्तुतिरसावादेन लब्धोदयैर् (?)
अस्माभिर्विमलो हृदम्बरतले (!) निर्यंत्रणं स्थीयते ॥
स्वतंत्रस्वच्छात्मा स्फुरति सततं चेतनशिवः
परा शक्तिश्चेयं करणसरणिप्रांतमुदिता ।

तदाभोगैकात्मप्रमर . . . . यस्योपजीवि . . . . यस्योपजीविकृतः क्षेमराजकृतः श्रीमत्स्वच्छंदोद्योतः संपूर्णः । ° संवत् २१ फाल्गुनितृतीयस्यां बुधवासरायां संपूर्णं समाप्तं ॥

[H. T. COLEBROOKE.]

Digitized by Microsoft®

VIII. Mysticism (Tantra).

2530.

147. Foll. 741 (numbered 753; nos. 389–398, 439, 534 and 733 having been passed over, and 731 being double); size 13½ in. by 4¼ in.; fair Devanāgarī writing of 1740 A.D.; seven lines in a page.

Paramāgamacūḍāmaṇi, of the *Nāradapañcarātra*; in 95 *paṭalas*.

It begins: ओं नमो महनीयगुणांभोधये विघ्नवल्लीविध्वंसनकुपराय गणानां पतये श्रीवरदाय ॥

चातुर्विध्यहिरण्यगर्भरसनासिंहासनाध्यासिनी
सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि नः ।
यत्पादामलकोमलांगुलिनखज्योत्स्नाभिरुद्वेल्लितः
शब्दब्रह्मसुधांबुधिर्बुधमनस्युच्छृंखलं खेलति ॥ १ ॥

श्रीप्रह्लादपुरातनादिगणनापुण्यप्रभावोद्भव-
स्पूर्णेनाद्भुतहेतुना समजनि स्वर्णाद्रिवत्तर्कितः ।
दाघोत्तीर्णसुवर्णवर्णतनुवान् संपूर्णसौभाग्यवान्
विस्तीर्णां श्रियमाददातु स विभुर्लक्ष्मीनृसिंहो मम ॥ २ ॥

ब्रह्माद्वैतरसाश्रयस्य जगतो वीजस्य संसाधने
सर्वांगस्त(? स्व)विधिर्विशिष्टवदनात् सुस्पष्टवेदाक्षरः ।
क्षीरोदाद्भुतसुप्रसंगसरणिश्रामत्तरंगावली-
विस्फूर्तीकृतसत्प्रबोधमुदिरः श्रीविट्ठलः पातु नः ॥ ३ ॥

अद्वैतामृत[वा]हिनीपरिलसत्कल्लोलपूरोर्मिषु
स्फारं स्फारविलासवर्त्मकुशलः श्रीराजहंसोपमः ।
यो ऽसौ विट्ठलभक्तिरस्य कमला विष्वक्प्रवृत्तौ मुदा
स्वादं स्वादमनंतयुक्तिगुणवद् भुंक्ते रसं नारदः ॥ ४ ॥

वेदाद्यस्य विधेर्विधेयविधिमानंगोद्भवः केवलं
विष्णोर्भक्तिरतः प्रशस्तपुरुषः प्रेम्णः प्रसंगोत्सवे ।
पृष्टो वेदतरुर्विभागरचनाकर्त्रैषतास्तेन स
श्रीमत्कृष्णरतिप्रसंगजननं प्रोवाच शास्त्रं मुनिः ॥ ५ ॥

पंचानां प्रचुरप्रमेयगुणिनां गौणप्रसंगेन वा
ब्रह्मैकध्यतया निवृत्तिवचनै रात्रिर्निरुक्ता यतः ।
सानंदानुभवेन वास्तवविधौ विध्यानिकान्वेषणात्
ज्ञानानंदशशांकराज्ञसदनात् श्रीपांचरात्रं ततः ॥ ६ ॥

नारं जीवसमूह एम विविधो नारं च तत्त्वग्रहो
नारं नित्यसनातनानुभविनां स्थैर्यादिबुद्धिक्रमः ।
चीनेतान् प्रददाति सत्यकरुणापूरेण शिष्याय यः
सो ऽव्यात् श्रीगुरुमूर्तिरात्मयशसा श्रीनारदो नारदः
[॥ ७ ॥

ह्रस्वाद् ह्रस्वतरं महच्च महतस्तिग्मं च स्निग्धं च यत्
सर्वत्रास्ति समं गजे च मशके रंकेषु भूपेष्वपि ।
तादात्म्येन तदेतदेव तदिदं तेजोमयं तन्मयं
सर्वव्यापि हृदंतरंगनिलयं नित्यं वयं धीमहि ॥ ८ ॥

सारात्सारतरं विचार्य विशदं कर्तव्यमालोक्य च
कृत्वा भारतभावनाभिरभितः सिद्धांतसारावली: ।
सृष्ट्वा वैदिकवृत्तिभागभजनाविश्वाधिकारान् क्रमान्
व्यासे ऽतुष्टमना मनागनुदिनं दध्यौ विधातुं सुखं ॥ ९ ॥

प्राचीनप्रचुरप्रवाहविशदामानंदकंदोज्ज्वलां
संप्राप्याथ सरस्वतीं सुसरितं तत्रावगाह्यापि च ।
तीरे संतमनेकसन्मुनियुतं श्रीनारदं नारदं
नारानंदमये परोपकृतये संपृष्टवान् वस्तुतः ॥ १० ॥

स्वामिन् विश्वविदां वरेण्यगुरवे तुभ्यं नमः सांप्रतं
संतुष्टिर्मनसो ममास्ति न किल प्रोद्दामतृप्तिं विना ।
तत्त्वं विष्णुगुणानुवादनिवहादुत्साहसंपर्किणां
संपर्कविधुरस्य तद्वद विभो विश्वैकनाथ प्रिय ॥ ११ ॥

श्रुत्वा शुद्धविरक्तिभक्तिरुचिमत्प्रेमप्रभाभासुरं
वाक्यं व्यासनिवेदितं मुनिवरः श्रीनारदो ऽचिंतयत् ।
स्नेहार्द्रीकृतचेतनो निरवधिप्रेमानुसंगेन तं
प्रोवाचानुजगर्ज्जनश्रयणतो मेघातिगंभीरवाक् ॥ १२ ॥

पाराशर्य तवाभिमानरहितं श्रुत्वा वचः संप्रति
प्रेमक्षीरपयः पयोदनिवहैः सिक्तं ममांगं मुहुः ।
संतुष्टिर्मनसो ममापि समभूद् वाक्सौधमास्वाद्य मे
चक्षुर्वाक्पुलका भवंति भगवन् वीक्षा अमी साक्षिणः
[॥ १३ ॥

नैसर्ग्यं भवतो भवत्यभिनवां सेवां मुहुः कुर्वतः
कृष्णे कृष्णकथानुवादरसिकतृप्तिं विनानुक्षणं ।
लक्ष्मीकांतगुणामृतं प्रपिबतो ऽप्यानंदकंदादिव
तृष्णावान् परिवर्तसे विमलधीर्वैश्यानुवादान् विटः ॥
[१४ ॥

एवं रत्यभिमानवर्जिततनुर्विश्वोपकारक्षमः
पुंसामुद्धरणाय नौरिव भवान् संसारसिंधोर्मुहुः ।
भूभारं क्षपयिष्णुविष्णुयशसामुद्गीरणे सत्वर
साधो साधु जनातु वर्तिरतये(!) मामेष संपृच्छसि॥१५॥

Digitized by Microsoft ®

विद्वान् विश्वविदः पुराणपुरुषस्यानंदसंदर्भिणः
श्रीकांतस्य कलावतारतनुवान् संप्राप्तजन्मा यथा ।
आर्त्तायुद्धरणाय[आर्त्त्यौउ०] पापहतये नारायणैकांतिनः
श्रीमान् यत्सममूर्तिरस्ति नितरां जानंति सभ्या क्षमी॥१६॥
उद्यद्दिनकररुचिमान् श्रीमान् विश्वाभिरामतां धत्ते ।
हरिपदतिग्मगभस्तिश्रुतशब्दगुणागणे विचरेः ॥ १७ ॥ °
[from v. 37 in *anushṭubh śloka*.

Somo idea of the contents of the work will be obtained from the following list of chapters:

1–10. Philosophical. —1. (*śl.* 126) *paramabrahmaprasaṅgavarṇanam*; 2. (125 *śārdūlav.*) *sṛishṭyādivicitravarṇanam*; 3. (133 ditto) *sṛishṭiniropaṇe'nantaḥkaraṇacatushṭayayantranirūpaṇe svātmāvabodha*; 4. (119 *anushṭ. śl.*) *yantranirūpaṇe vyaktivarṇane subuddhivarṇanam*; 5. (*śl.* 127) *advaitaprasaṅge gatimahimāvarṇanam*; 6. (*śl.* 125) *buddhivibhavavarṇane śrutyarthasāranirṇaya*; 7. (*śl.* 147) *rasavarṇanam*; 8. (*śl.* 147) *buddhivibhavavivekavarṇane pravṛittinivṛittinirūpaṇam*; 9. (*śl.* 125) *sevyasevakabhedapraśaṃsāyām bhaktyudbhāsa*; 10. (*śl.* 140) *sevyasevakabhāvavarṇane bhagavadbhaktivarṇanam*;—

11. (*śl.* 126) *nijāyuḥsārthakākaraṇe brāhmamuhūrtaprātaḥsamayāvadhivaishṇavapravṛitti - nirṇaya*; 12. (*śl.* 125) *bhaktivarṇane ṛinatrayāpākaraṇaprasaṅge pañcayajñanirūpaṇādivicitravarṇane bhaktiyuktitādātmyanirūpaṇam*; 13. (*śl.* 192) *pañcāyatananirūpaṇe brahmajñānāvāptinirṇaya*; 14. (*śl.* 131) °*mahālayasṛishṭikartṛitvaprasaṅga-*; 15. (*śl.* 158) *karmākarmavikarmaprastāve* °*nijādhikārasthitivarṇanam*; 16. (*śl.* 125) *yogāntarāyanirākaraṇanirūpaṇe karaṇapurushavarṇane nāmamahimā*; 17. (*śl.* 125) *pañcāyatanaprakaraṇe hetupurushasahajapurushasvarūpavarṇanam*; 18. (*śl.* 115) *svādhikāramayabhaktivaicitrībhedābhedavibhavasadāśivarūpasaṃgīta*; 19. (*śl.* 136) °*brahmarudrādinā bhagavadaṃśasāmyavarṇanam*; 20. (*śl.* 131) *gotradevatāpūjanādhikāra-*; 21. (*śl.* 138) *dvādaśaparvanirūpaṇam*; 22. (*śl.* 137) *pūrvacitipraśaṃsā*; 23. (*śl.* 124); 24. (*śl* 135) *tulanāpraśaṃsā*; 25. (*śl.* 152) *gṛihasthapraśaṃsāyām anvahavratabrahmacaryanirūpaṇam*; 26. (*śl.* 135) *gṛihasthāśramavarṇane mantradīkshāpraśaṃsā*; 27. (*śl.* 142); 28. (*śl.* 136) *dīkshāmantragrahaṇamahotsava*; 29. (*śl.* 120) *dīkshāgrahaṇam*; 30. (*śl.* 153) *puraścaraṇavidhiśūdravarṇādhikāravarṇanam*; 31. (*śl.* 141) *bhagavadbhaktivilāsamahotsava*; 32. (*śl.* 127) *damanakamahotsava-kelimahotsavanirūpaṇam*; 33. (*śl.* 189) *śayanyutsava*; 34. (*śl.* 131) *pavitrāropaṇamahotsava*; 35. (*śl.* 146) *kaṭidānamahotsavavijayotsava*; 36. (*śl.* 202) *rathamahotsava-dhvajāropaṇamahotsava*; 37. (*śl.* 167) *dīpālikāmahotsava - kārttikīmahotsava - tripurotsava*; 38. (*śl.* 133) *vibhūtipradamahotsava*; 39. (*śl.* 158) *dadhyodanādisītāśanamahotsava*; 40. (*śl.* 147) *hutālīkamahotsava*; 41. (*śl.* 239) *purushottamamahotsava*; 42. (*śl.* 127) *ekādaśīvidhi*; 43. (*śl.* 135); 44. (*śl.* 125); 45. (*śl.* 147); 46. (*śl.* 126); 47. (*śl.* 133); 48. (*śl.* 125) *mahāvāsaravarṇanam*; 49. (*śl.* 143) *rāmanavamīmahotsavavratavidhi*; 50 and 51 (some omission, *śl.* 1–119, then 99–131) *kṛishṇajanmāshṭamīvratamahotsavavidhi*; 52. (*śl.* 106) *śivarātrivratanirṇaya*; 53. (*śl.* 111) *śivaliṅgaśuddhāśuddhapūjananirṇaya*; 54. (*śl.* 153) *śāligrāmagallakīmaṇicakravarṇanam*;—

55–95. Astrological observations, and mystic prayors and performances. 55. *śl.* 159; 56. *śl.* 152; 57. *śl.* 147; 58. *śl.* 163; 59. *śl.* 121; 60. *śl.* 123; 61. *śl.* 132; 62. *śl.* 145; 63. *śl.* 214; 64. *śl.* 99; 65. *śl.* 105; 66. *śl.* 101; 67. *śl.* 103; 68. *śl.* 102; 69. *śl.* 65; 70. *śl.* 62; 71. *śl.* 62; 72. *śl.* 51; 73. *śl.* 39; 74. *śl.* 65; 75. *śl.* 50; 76. *śl.* 46; 77. *śl.* 36; 78. *śl.* 62; 79. *śl.* 60; 80. *śl.* 48; 81. *śl.* 54; 82. *śl.* 67; 83. *śl.* 83; 84. *śl.* 63; 85. *śl.* 63; 86. *śl.* 55; 87. *śl.* 54; 88. *śl.* 66; 89. *śl.* 55; 90. *śl.* 72; 91. *śl.* 63; 92. *śl.* 62; 93. *śl.* 72; 94. *śl.* 102; 95. *śl.* 52.

Foll. 693–703 have been inserted in inverse order between foll. 704 and 705.

Digitized by Microsoft®

It ends:

अविद्यापरिहारेण विद्यया अनुरोपणात्(!) ।
अज्ञानतमसां नाशो ब्रह्मविज्ञानभानुना ॥ ५१ ॥

प्रतीतसर्वशब्दार्थतत्त्वसत्त्वविवेचनात् ।
आत्मैव परमं ब्रह्म व्यासविश्वोपकारकृत् ॥ ५२ ॥

इति श्रीपरमागमचूडामणौ श्रीनारदपंचरात्रे सर्वशास्त्रैकवाक्यनिरूपणं नाम पंचनवतितमः पटलः समाप्तः ॥ नारदपंचरात्रग्रंथं समाप्तं ॥° संवत् १७९७ शके १६६२ प्रमोदनामसंवत्सरे फाल्गुनवद्यपंचमी रविवासरे हस्तनक्षत्रे अमृतसिद्धियोगवेलायां॥° ग्रंथं १३१२५ ॥

According to Prof. Bhandarkar, Rep. 1883-84, p. 8, the *Nāradapañcarātra* includes the following six works: 1. *Lakshmīsaṃhitā*; 2. *Jñānāmṛitasārasaṃhitā* (ed. by K. M. Banerjea, in Bibl. Ind.); 3. *Paramāgamacūḍāmaṇisaṃhitā*; 4. *Paushkarasaṃhitā*; 5. *Pādmasaṃhitā*; 6. *Vṛiddha-Brahmasaṃhitā*; whilst quotations are also met with (ib. p. 72) from 7. *Sātvatasaṃhitā*, and 8. *Paramasaṃhitā* (perhaps identical with 3). [H. T. COLEBROOKE.]

2531.

1193a. Foll. 200; size 12½ in. by 6 in.; careless, modern Devanāgarī writing; thirteen lines in a page.

Paushkarasaṃhitā, of the *Nāradapañcarātra*, consisting of 43 *adhyāyas* in which *Paushkara* is instructed by *Bhagavat* in matters chiefly connected with sacrificial rites.

Rather incorrect; with lacunæ in places.

It begins:

शुक्लांवरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्याये सर्वविघ्नोपशांतये ॥ १ ॥

अथ पौष्करसंहिताप्रारंभः ॥

यदा तीर्णव्रतस्तिष्ठेद् गुरोरग्रे हितैषिणः ।
कदा चाज्ञापयेच्छिष्यं संप्राप्तं कमलोद्भवः ॥ १ ॥

तनु(? ननु) प्रदापयेत् काले पात्रे गुणगणान्विते ।
यस्तदाज्ञापयेत्तं वै गच्छ पुत्र धनं यतः ॥ २ ॥

यागोपकरणार्थं तु येन शांतिमवाप्स्यति ।
यथालब्धं तु तत्पश्चाद् गुरवे विनिवेद्य च ॥ ३ ॥

त्वत्प्रसादेन भगवन्निदं प्राप्तं गृहाण मे ।
दयां कुरु त्वनाथस्य निमग्नस्य भवार्णवे ॥ ४ ॥

एवमादितया(!) ब्रूयात् करुणं वाक्यसंचयं ।
प्रवर्तेत तदर्थं तु गुरुमंडलपूजने ॥ ५ ॥

सूत्रयित्वा विधानेन पूरयित्वा जनैः शुभैः ।
लिखित्वा च क्रमाद्यैर्वा त्वालिख्य घटिकादिकैः ॥ ६ ॥

भूमौ हैमशलाकाद्यैर्विनाभावात् प्रयत्नतः । ६ (!) ।
पूजयेत्फलपुष्पाद्यैरारण्यैर्नित्यसंभवैः ।
पूजितं दर्शयेत्तस्य तं तु विद्धि चतुर्विधं ॥ ७ ॥

आद्यं पद्मोदराख्यं तु तत्त्वसंख्योपलक्षितं ।
अग्नेः ककजगर्भं (!) तु द्वितीयं परिकीर्तितं ॥ ८ ॥

तदनेकप्रकारं च चक्राब्जं स्यात्तृतीयकं ।
यस्य भेदो ऽप्यनेकश्च स खल्वाद्याब्जसंभवः ॥ ९ ॥

मिश्रं चक्राभिधानं तु मंडलं बहुभेदयुक् ।
तच्चतुर्थं समाख्यातं यत्र रुद्रो विमुच्यते ॥ १० ॥

महाख्यं नवनाभं तु बिंबभेदेन यत्स्थितं ।
दृष्टेन पूजितेनाथ तथाग्नौ कल्पितेन च ॥ ११ ॥

मोक्षो येन भवत्याशु भक्तानां केवलेन च ।
भेदयुक्तेन कालेन दृष्टेनेष्टेन वै क्रमात् ॥ १२ ॥

द्वादश्यां प्रतिपक्षं तु वत्सरांते ततो द्विज ।
समर्थात्संभवेद्भक्तं पुत्रकं चापरेण तु ॥ १३ ॥

दृष्टेन पूजितेनापि ह्यनुध्यातेन वै हृदि ।
तथाविधेन कालेन योग्यता तस्य जायते ॥ १४ ॥°

1. (*śl.* 53) इति श्रीनारदपंचरात्रसारे पौष्करसंहितायां *śishyaparīkshālakshaṇam*; 2. (*śl.* 44) इति श्रीनारदपंचरात्रे (thus always subsequently) पौष्करसंहितायां *bhūmiparīkshā*; 3. (*śl.* 117) *diksiddhilakshaṇam*; 4. (*śl.* 206) *maṇḍapalakshaṇam*; 5 (?)-6. (*śl.* 404) *padmalakshaṇam*; 7. (*śl.* 171) *vyūhalakshaṇam*; 8. (*śl.* 224, ? wanting 183–200) *cakralakshaṇam*; 9. (*śl.* 164) *miśralakshaṇam*; 10. (? wanting); 11. (*śl.* 104) *vṛittabimbalakshaṇam*; 12. (*śl.* 28) *pancapadmacakrabimbalakshaṇam*; 13. (*śl.* 13) *sūryabimbalakshaṇam*; 14. (*śl.* 15) *candrabimbalakshaṇam*; 15. (*śl.* 33) *trikoṇabimbalakshaṇam*; 16. (*śl.* 48) *kūrmabimbalakshaṇam*; 17. (*śl.* 47)

Digitized by Microsoft®

śaṅkhabimbalakshaṇam ; 18. (*śl.* 58) *navanābhalakshaṇam ;* 19. (*śl.* 140) *natābhyarcanam ;* 20. (*śl.* 123) *vishvaksenārcanam ;* 21. (*śl.* 22) *parivāralakshaṇam ;* 22. (*śl.* 77) *ādhārāsanalakshaṇam ;* 23. (*śl.* 69) *āsanadevatānyāsa ;* 24. (*śl.* 58) *ādhārāsanadevatālakshaṇam ;* 25. (*śl.* 40) *vṛitivicāra ;* 26. (*śl.* 59); 27. (*śl.* 728) *śrāddhākhyānam ;* 28. (*śl.* 51) *hutāśanayonivibhāga ;* 29. (*śl.* 161); 30. (*śl.* 224) *pavitrārohaṇam ;* 31. (*śl.* 307) *lokadharma ;* 32. (*śl.* 158) *ārādhanalopavicāra ;* 33. (*śl.* 175) *tattvasamādhi ;* 34. (*śl.* 89.) *dhūpaghaṇṭālakshaṇam ;* 35. (*śl.* 67) *dhūpādhāralakshaṇam ;* 36. (*śl.* 455) *āntaravicāra* (!); 37. (*śl.* 66) *atanuvicāra ;* 38. (*śl.* 318) *adhikāranirūpaṇam ;* 39. (*śl.*38) *āgamanirṇaya ;* 40. (*śl.*108) *bhadrapīṭhalakshaṇam ;* 41. (*śl.* 224) *nānādharmapratishṭhāpanam ;* 42. (*śl.* 187) *pādapratishṭhā ;* 43. (*śl.* 194) ends :

पित्रासूनां(!) गतासूनामन्येषां वा करोति यः ।
वैष्णवं च प्रतिष्ठानं स्वशक्त्या विभवेन वा ॥ १९१ ॥

अचिरादेव ते यांति शश्वदेवांतकास्पदं ।
वैष्णवं च परं स्थानं ततः कालांतरेण तु ॥ १९२ ॥

क्षित्यंशं शुभमासाद्य कुलशैलादिकैः सह ।
आचरंति शुभं येन प्राप्नुवंति पुनर्भुवं ॥ १९३ ॥

कृपयानुभवे तावत् प्रतिष्ठां यः समाचरेत् ॥ १९४ ॥

इति श्रीनारदपंचरात्रे पौष्करसंहितायां त्रिचत्वारिंशो ऽध्यायः ॥ ४३ ॥

[H. T. Colebrooke.]

2532.

736. Foll. 327 ; size 12½ in. by 6¼ in.; fair, modern Devanāgarī writing ; thirteen lines in a page.

Pādmatantra, or *Pādmasaṃhitā*, of the *Nāradapañcarātra*, in four sections. Fairly correct.

I. *Jñānapāda*, in 11 *adhyāyas*, begins :

आसीनमाश्रमे कण्वं तदाश्रमनिवासिनः ।
निःश्रेयसकरं कर्म प्रष्टुमारेभिरे मुनिं ॥ १ ॥

ऋषय ऊचुः ॥

आधीताः कण्व भगवन् सांगोपांगाः सविस्तराः ।
वेदास्त्वत्तः सदर्थानि शास्त्राणि च यथातथं ॥ २ ॥

एतेषु यदधीतेषु कैवल्याय न कल्पते ।
कारणं तदपि त्वत्तः श्रोतव्यं नान्यथा गतिः ॥ ३ ॥

कण्व उवाच ॥

श्रूयतां मुनयः सर्वे यथा पूर्वं मया श्रुतं ।
उपसंगम्य संवर्तमृषिमग्निमिवापरं ॥ ४ ॥

प्रदीप्तमेतमेवार्थं पृष्टवानभिवाद्य तं ।
शृण्वतां स महर्षीणां संवर्तः सर्ववित्स्वयं ॥ ५ ॥

मह्यं शुश्रूषमाणाय प्रत्युवाच यथातथं ।

संवर्तक उवाच ॥

अधीताः सकला वेदाः सांगोपांगाः सविस्तराः ॥ ६ ॥

इतिहासपुराणानि वाकोवाक्ययुतानि च ।
श्रुतानि तेषु सर्वेषु दृश्यंते सर्वदेवताः ॥ ७ ॥

स्वतंत्राः फलमप्येषु स्वर्गादन्यश्च दृश्यते ।
विविधानि च शास्त्राणि न तर्काय प्रतिष्ठिताः ॥ ८ ॥

अपवर्गफलोपायं न च पश्यामि कुत्रचित् ।
श्रुतिरेव च तस्यापि प्रमाणमिति शुश्रुम ॥ ९ ॥

निश्चयं नाधिगच्छामि मनसा विमृशन्नपि ।
ततो ऽहं भृशनिर्विण्णः संतप्तहृदयस्तदा ॥ १० ॥

सिद्धाश्रमं समासाद्य द्रुहिणं समपूजयं ।
अत्युग्रं तप आतिष्ठं ततः प्रीतः प्रजापतिः ॥ ११ ॥

ऋषिभिर्दैवतैः सार्धं स्वयमागमदंतिकं ।

ब्रह्मोवाच ॥

वरं वृणीष्व भद्रं ते यत्ते मनसि वर्तते ॥ १२ ॥

वरार्थिनं द्विजं श्रेष्ठदर्शनं वरदं मम ।

संवर्तक उवाच ॥

इत्युक्तो ऽहं भगवता प्रत्यवोचं कृतांजलिः ॥ १३ ॥

ज्ञानं भवतु मे शुद्धं निःसंशयमनाकुलं ।
येन सांसारिकं दुःखं तरामि ज्ञानवर्त्मना ॥ १४ ॥

इत्युक्तो देवदेवस्तु प्रहसन्निदमब्रवीत् ।
शृणु विप्र प्रवक्ष्यामि सिद्ध्युपायमनामयं ॥ १५ ॥

श्रुतिरेव द्विजादीनां निःश्रेयसकरी परा ।
यतो वै श्रुतिमंत्रेण नित्यमाराधयं हरिं ॥ १६ ॥

कैवल्यं परमं प्राप्तो न भूयः संसरेदिह ।

संवर्तक उवाच ॥

भगवन्केन शास्त्रेण देव आराध्यते परः ॥ १७ ॥

Digitized by Microsoft®

कीदृशस्तु परो देवो विधिः को वा तदर्चने ।

ब्रह्मोवाच ॥

वैष्णवं शासनं शुभ्रमच्छिद्रं पापनाशनं ॥ १८ ॥

हिताय सर्वभूतानामादिदेवेन चोदितं ।

चतुष्पादसमायुक्तं चतुर्वर्गफलप्रदं ॥ १९ ॥

तेन शास्त्रविधानेन समाराधय केशवं ।

तच्छास्त्रं श्रुतवान्मतः कपिलो मुनिपुंगवः ॥ २० ॥ °

In this way this '*mahat śāstram*' is represented as being successively communicated by *Keśava* to *Brahmā*, by *Brahmā* to *Kapila*, by *Kapila* to *Padmanāga* (or *Padma*, whence its name), and by *Padma* to *Saṃvartaka*, who finally transmitted it to *Kaṇva*.

संवर्तक उवाच ॥

इत्युक्तो ब्रह्मणा देवः शंखचक्रगदाधरः ।

पार्श्वस्थं रुद्रमालोक्य व्याजहार स्वयं हरिः ॥ ४७ ॥

श्रीभगवानुवाच ॥

षट्प्रकाराणि तंत्राणि त्वद्दैवत्यानि शंकर ।

परस्परविरुद्धानि कुरुष्व त्वं यथातथं ॥ ४८ ॥

अवतारैश्च बहुभिर्मत्स्यादिभिरहं मुने ।

त्वत्प्रणीतानि शास्त्राणि स्थापयानि महीतले ॥ ४९ ॥

अल्पायासेन सुलभं भूयिष्ठं फलमद्भुतं ।

षट्प्रकारे च शास्त्रे ऽस्मिन् दर्शय स्वेमकारणं ॥ ५० ॥

योगशास्त्रस्य कर्तृत्वे विरिंचो ऽपि करिष्यते ।

सांख्यस्य चापि निर्माणे कपिलो ऽधिकरिष्यति ॥ ५१ ॥

बुद्धमूर्तिं समास्थाय बुद्धशास्त्रं सृजाम्यहं ।

ज्ञानापह्नवनिष्णातं ज्ञातृज्ञेयफलानि च ॥ ५२ ॥

आर्हतीं मूर्तिमास्थाय शास्त्रं शास्मि तथार्हतं ।

शास्त्राणि मत्प्रणीतानि भवद्भिर्व्याकृतानि च ॥ ५३ ॥

आभूतः संप्लवाल्लोके स्थास्यंति मम शासनात् ।

वाढमित्येव ते सर्वे प्रणिपत्याब्रुवन् हरिं ॥ ५४ ॥

कृतकृत्यस्तदा ब्रह्मा सार्धं देवैः स्वमालयं ।

जगाम सिद्धगंधर्वचारणादिभिरर्चितः ॥ ५५ ॥

संवर्तक उवाच ॥

पंचरात्रेण तुल्यानि तदाप्रभृति वै मुने ।

शैवादीन्यपि शास्त्राणि प्रथंते शासनाद्धरेः ॥ ५६ ॥

वैष्णव्या मायया लोके प्रचरंति निरंकुशाः ।

शैवादयो ऽपि समयास्तत्र तत्र प्रतिष्ठिताः ॥ ५७ ॥

पंचेतरे पंचरात्रमदूषितमपि स्वयं ।

दूषयंत्येव सृष्टत्वात्तद्दूषयितुमीश्वरैः ॥ ५८ ॥ °

पंचरात्रसमाख्यासौ कथं कृत्वा प्रवर्तते ।

संवर्तक उवाच ।

पंचेतराणि शास्त्राणि रात्रीयंते महत्यपि ॥ ७१ ॥

यत्संविधौ समाख्यासौ तेन लोके प्रवर्तते ।

चंद्रतारागणं यद्वच्छोभते नैव वासरे ॥ ७२ ॥

तथेतराणि शोभंते पंचरात्रस्य संनिधौ ।

पंचत्वमथवा यद्वद्दीप्यमाने दिवाकरे ॥ ७३ ॥ °

तंत्राणां चैव सर्वेषां वक्ता नारायणः स्वयं ।

अनुग्रहार्थं भक्तानां श्रावयामास च स्वयं ॥ ८४ ॥ °

कण्व उवाच ॥

कति भेदास्तु तंत्राणां नामधेयानि कानिचित् ।

श्रोतुमिच्छामि विप्रेंद्र परं कौतूहलं हि मे ॥ ९२ ॥

संवर्तक उवाच ।

शतमेकमथाष्टौ च पुरा हे कण्व शुश्रुम ।

नामधेयानि चैतेषां श्रूयतां कथ्यते मया ॥ ९३ ॥

पाद्मं पद्मोद्भवं मायावैभवं नलकूवरं ।

त्रैलोक्यमोहनं विष्णुं तिलकं परमाह्वयं ॥ ९४ ॥

नारदीयं धनदीयं वासिष्ठं पौष्कराह्वयं ।

सनत्कुमारं सनकं सत्याख्यं कण्वसंहिता ।

सनताख्यं महीप्रश्नः श्रीप्रश्नः पुरुषोत्तमं(!) ॥ ९५ ॥

माहेंद्रसंहिता पंचप्रश्नाख्यं तत्त्वसागरं ।

वागीशं सात्वतं तेजो द्रविणं श्रीकराह्वयं ॥ ९६ ॥

सावर्तं विष्णुसद्भावं सिद्धांतं विष्णुपूर्वकं ।

विष्णुवैभविकं सौरं सौम्यमीश्वरसंहिता ॥ ९७ ॥

पुष्टितंत्रं शौनकीयं मारीचं दक्षसंहिता ।

औपेंद्रं योगहृदयं हारीतं पारमेश्वरं ॥ ९८ ॥

आत्रेयं मंदरं विष्वक्सेनमौशनसाह्वयं ।

वैहायसं विहंगेंद्रं भार्गवं परपूरुषं ॥ ९९ ॥

याज्ञवल्क्यं गौतमीयं पौलस्त्यं शाकटाह्वयं ।

ज्ञानार्णवं जामदग्न्यं याम्यं नारायणात्मकं ॥ १०० ॥

पाराशर्यं च जावालं कापिलं वामनाह्वयं ।

जयोत्तरं बार्हस्पत्यं जैमिनं सात्वताह्वयं ॥ १०१ ॥

कात्यायनकं वाल्मीकमौपगायनसंहिता ।

हैरण्यगर्भमागस्त्यं कार्ष्ण्यं बोधायनाह्वयं ॥ १०२ ॥

भारद्वाजं नारसिंहं भार्ग्यमुत्तरपू[र्वे]कं ।

शातातपमांगिरसं काश्यपं पैंगलाह्वयं ॥ १०३ ॥

Digitized by Microsoft®

त्रैलोक्यविजयं योगं विज्ञाख्यं चैव वारुणं ।
कृष्णाचामरमाग्नेयं मार्कंडेयस्य संग्रहः ॥ १०४ ॥
महासनत्कुमाराख्यं व्यासाख्यं विष्णुसंहिता ।
संहिता चाहिर्बुध्नस्य ब्रह्मन् राघवसंहिता ॥ १०५ ॥

संवादं शुक्ररुद्राभ्यामुमामाहेश्वराह्वयं ।
दत्तात्रेयं शार्वाख्यं[च]वाराहमिहराह्वयं(!) ॥ १०६ ॥

संकर्षणाख्यं प्रद्युम्नसंहिता कल्किसंहिता ।
प्राचेतसाख्यमित्येते शतमष्टोत्तरं स्मृतं ॥ १०७ ॥

एतानि तंत्रनामानि मयोक्तानि महामते ।
तंत्रास्त्वनेके बोध्यंते मुक्त्युपायाः पृथक् पृथक् ॥ १०८ ॥

इति तंत्रं समाख्यातं शास्त्रमेव मनीषिभिः ।
तंत्राणां नामधेयानि यो नित्यं पक्यते(!) नरः ॥ १०९ ॥
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनं ॥

1. (*śl.* 110) इति श्रीनारदपंचरात्रे महोपनिषदि पाद्मे तंत्रे (thus generally) ज्ञानपादे *śāstrāvatāraḥ*; 2. (*śl.* 49) °पाद्मतंत्रे° *mūrtyutpattikathanam*; 3. (*śl.* 27) *brahmādisṛishṭikathanam*; 4. (*śl.* 44) *purushavivekaḥ*; 5. (*śl.* 40) *brahmalakshaṇaprāptyupāyakathanam*; 6. (*śl.* 52) *brahmaṇaḥ sarvataḥpāṇipādatvavarṇanam*; 7. (*śl.* 69) *jñānotpattikāraṇakathanam*; 8. (*śl.* 47) *muktibhedatattvanirṇayaḥ*; 9. (*śl.* 65) *bhūgolavarṇanam*; 10. (*śl.* 25) *bhūlokalakshaṇam*; 11. (called 12; *śl.* 92) *bhuvarlokādivistāraḥ*.

II. *Yogapāda* (concentration of mind) of 5 *adhyāyas*: 1. (*śl.* 22) *āsanabhedavidhiḥ*; 2. (*śl.* 40) *nāḍīsvarūpakathanam*; 3. (*śl.* 36) *prāṇayāmalakshaṇam*; 4. (*śl.* 23) *pañcabhūtasthānabhedanirṇayaḥ*; 5. (*śl.* 31) *yogalakshaṇam*.

III. *Kriyāpāda* (on the ceremonies connected with the construction of houses, villages, temples, idols, altars, etc.), in 32 *adhyāyas*: 1. (*śl.* 55) *bhūparīkshāpraveśabali*; 2. (*śl.* 66) *grāmādivinyāsa*; 3. (*śl.* 48) *karshaṇādividhi*; 4. (*śl.* 43) *bālālayakalpanam*; 5. (*śl.* 90) *prathameshṭakāvidhi*; 6. (*śl.* 51) *prāsādasya garbhanyāsavidhi*; 7. (*śl.* 72) *upapādādhishṭhānalakshaṇam*; 8. (*śl.* 93) *prāsādabhedalakshaṇam*; 9. (*śl.* 77) *mūrdheshṭakāvidhivimānadevatākalpanam*; 10. (*śl.* 139) *parivāradevatākalpanam*; 11. (*śl.* 105) *śilānusaṃgraha*; 12. (*śl.* 54) *dhruvaverapramāṇāṅgulādilakshaṇam*; 13. (*śl.* 116) *śūlasthāpanavidhi*; 14. (*śl.* 108) *varṇavidhānam*; 15. (*śl.* 99) *sthityāsanādibheda*; 16. (*śl.* 77) *caturviṃśaty-ashṭamūrtilakshaṇam*; 17. (*śl.* 111) *daśāvatāralakshaṇam*; 18. (*śl.* 67) *mūrtibhedakathanam*; 19. (*śl.* 64) *shaḍveranirṇaya*; 20. (*śl.* 129) *pratimāmāna-pratimālakshaṇa-bhūshaṇalakshaṇam*; 21. (*śl.* 82) *śriyādilakshaṇam*; 22. (*śl.* 70) *parivāradevatālakshaṇam*; 23. (*śl.* 62) *pūjopakaraṇavidhi*; 24. (*śl.* 94) ? *ācāryalakshaṇam*; 25. (*śl.* 111) *pratishṭhopakaraṇam*; 26. (*śl.* 83) *jalādhivāsanam*; 27. (*śl.* 210) *adhivāsanādi*; 28. (*śl.* 124) *pratishṭhāvidhi*; 29. (*śl.* 54) *mīnādipratishṭhāvidhānam*; 30. (*śl.* 190) *lakshmyādigrahaṇam*; 31. (*śl.* 53) *akshamālāpratishṭhāvidhi*; 32. (*śl.* 138) इति° क्रियापादे संवर्तकप्रोक्तायां संहितायां *grahārcāsthāpanavidhiḥ*.

IV. *Caryāpāda* (on practical worship, esp. at the celebration of the *Vaishṇava* festivals), 33 *adhyāyas*: 1. (*śl.* 55) *jātinirṇaya*; 2. (*śl.* 92) *dīkshāvidhi*; 3. (*śl.* 185) *nityayāgavidhi*; 4. (*śl.* 70) *agnikāryavidhi*; 5. (*śl.* 82) *nityotsavasamārādhanakālavidhānam*; 6. (*śl.* 79) *nṛisūktopacāranīrājanavidhi*; 7. (*śl.* 120) *maṇḍalārādhanācāryābhishekavidhi*; 8. (*śl.* 222) *snapanabhedavidhi*; 9. (*śl.* 137) *sahasrakalaśābhishekavidhi*; 10. (*śl.* 155) *dhvajārohaṇavidhānam*; 11. (*śl.* 290) *mahotsavavidhi*; 12. (*śl.* 91) *pushpahavirvidhānam*; 13. (*śl.* 80) *pañcakālavidhi*; 14. (*śl.* 195) *pavitrādyutsavavidhi*; 15. (*śl.* 135) *vratānushṭhānakathanam*; 16. (*śl.* 91) *sammārjanādiphaladevadravyavyāpahāradoshakīrtanam* 17. (*śl.* 59) *jīrṇoddhārasamprokshaṇavidhi*; 18. (*śl.* 152) *prāyaścittavidhi*; 19. (*śl.* 166) *utsavaprāyaścitta-nārāyaṇabali*; 20. (*śl.* 104) *hiraṇyagarbhādividhi*; 21. (*śl.* 84) *adhikārivyavasthā*; 22. (*śl.* 71) *mudrāvidhi*; 23. (*śl.* 183) *mantra-*

Digitized by Microsoft®

kādyarthavarṇanam; 24. (*śl.* 192) *dvādaśākshara-kalpa*; 25. (*śl.* 272) *śrīmadashṭāksharamantram*; 26. (*śl.* 84) *vishṇugāyatryādimantroddhāra*; 27. (*śl.* 365) *matsyādimūrtimantroddhāra*; 28. (*śl.* 254) *annādhipatimantroddhāra*; 29. (*śl.* 190) *śriyādiparivāramantrakalpanam*; 30. (*śl.* 203) *mantroddhāra*; 31. (*śl.* 436) *gaṇeśotpattikathanamantroddhāra*; 32. (*śl.* 299) *mantroddhāra*; 33. (*śl.* 208) ends:

केन वा कथितं शास्त्रं ऋषयः कल्मषापहाः ।
इमां महोपनिषदं श्रद्दधानः शृणोति यः ॥ २०५ ॥
स याति शाश्वतं ब्रह्म दुष्प्रापमकृतात्मभिः ।
येन मां प्रथयामास यथा पद्मगुरोर्गुरुः ॥ २०६ ॥
तेनेदं ध्रियते पुण्यमतनोत्पाद्मसंहिता ।
ऋषयस्तं भवंतो ऽपि भजंतु पुरुषोत्तमं ॥ २०७ ॥
प्रदास्यति स युष्मभ्यमपवर्गं तपोधनं ।
इत्यध्यायस्त्रयस्त्रिंशश्चर्यापादः प्रकीर्तितः ॥ २०८ ॥

इति श्रीनारदपंचरात्रे महोपनिषदि पाद्मे तंत्रे चर्यापादे समाराधनागमंत्रोद्धारो नाम त्रयस्त्रिंशो ऽध्यायः ३३ ॥

[H. T. COLEBROOKE.]

2533.

1193b. Foll. 120; size 12½ in. by 6 in.; fairly good, modern Devanāgarī writing; 13 lines in a page.

Lakshmītantra, or *Nāradapañcarātrasāra*, a work in fifty *adhyāyas*, devoted to the praise and worship of *Lakshmī*, as the female *śakti* of *Nārāyaṇa-Vishṇu*, and the ultimate cause of the world; and representing itself as having been revealed by the goddess herself, under the name of *Śrī*, to *Śakra-Indra*.

It begins:

नमो नित्यानवद्याय जगतः सर्वहेतवे ।
ज्ञानाय निस्तरंगाय लक्ष्मीनारायणात्मने ॥ १ ॥
खगासनारुणाधारमीदृशं सोमभूषणं ।
अकलंकेंदुसूर्याग्निलक्ष्मीरूपमुपास्महे ॥ २ ॥
वेदवेदांगतत्त्वज्ञं सर्वशास्त्रविशारदं ।
सर्वसिद्धांततत्त्वज्ञं धर्माणामागमागमं ॥ ३ ॥
जितेंद्रियं जिताधारं रागद्वेषावशीकृतं ।
चतुर्दशांगयोगस्थं प्रसंख्यानपरायणं ॥ ४ ॥
विद्धे स्वर्भानुना भानौ पुरा तपनतां गतं ।
निदानं तपसामाद्यं तेजोराशिमनामयं ॥ ५ ॥
अत्रिमत्रिगुणोन्मेषमत्रिवर्गस्थमव्ययं ।
ध्यायंति विधिहर्याद्यास्त्वां त्वं ध्यायसि कं पुनः॥ ४॥

मां वदंति परां शक्तिं त्वां वदंति परं शिवं।
आवयोरपि किं ध्येयं तत्त्वं मे कृपया वद॥ ५॥

इति श्रुत्वा वचस्तस्याः स्मित्वा किंचिन्महेश्वरः।
उपवेश्य विधीन्द्रादीन् वाक्यमेतदुवाच ह॥ ६॥

नराणां परमं वृद्धेरायुः सौराः शतं समाः।
तदब्दं देवयोनीनां दिनमायुश्च तच्छतं॥ ७॥

वृध्यते परमं तस्य मानं कलियुगस्य तत्।
धर्माधर्मार्धसंपूर्णं धर्माणां तं प्रमाणतः॥ ८॥

इदं भूशैलनिहतमैंद्रायुर्मानवं परं।
कृतप्रमाणमब्दं तु समयः कापपूरकः॥ ९॥

एवमिंद्रैरिंद्रसंस्थैर्ब्रह्मणो दिनमुच्यते।
या ध्यायते महामाया मया तेच्छ्वासनिर्गमः (!)॥ १०॥

प्रपंचो ब्रह्मदिवसः कुंभको रात्रिरस्य तु।
एवं तस्या घटिकया वर्षमेकं विधेः स्मृतं॥ ११॥

घटीशतमितं तस्या ब्रह्मा जीवति कीटवत्।
पक्षमेकं सतीरूपा शुक्लं कृष्णं तु पार्वती॥ १२॥

ऋतुमात्रं हरिर्जीवेद्वर्षमात्रमहं शिवः।
एवं सा शतवर्षा वै महाकालस्य गेहिणी॥ १३॥

सर्पकंचुकवद्देहं त्यक्त्वा त्यक्त्वा पुनर्युवा।
स सदैव युवा तिष्ठेत्समया विषयीकृतः॥ १४॥

एवं श्रुत्वा वचस्तस्य देवी ब्रह्मा हरिः सुराः।
अहंकारस्य विलयं कृत्वा भीता नता पुनः॥ १५॥

Digitized by Microsoft®

देवा ऊचुः ॥

त्राहि त्राहि महादेव शरणागतवत्सल ।
साहंकारा वयं मूढा ईश्वरा इति वादिनः ॥ १६ ॥

निर्जिता अपि निर्लज्जा जलंधरवधैषिणः ।
मशकाश्च वयं देव न च त्वं मशकायसे ॥ १७ ॥

यस्या अग्रे सापि यस्य पदार्धांशेन नो समा(?) ।
महाकालः कथं ज्ञेयः कथं मुक्तिर्भवेच्छिव ॥ १८ ॥

मुक्तयः कतिधा देव श्रेष्ठा का किं च साधनं ।
वदास्माकं यदि कृपा देव्यां विष्णौ सुरेषु च ॥ १९ ॥

ईश्वर उवाच ॥

ज्ञायते तत्प्रभावेन सकलं देववाक्यतः ।
पुनर्मोदयते बुद्धिं तस्य माया दुरत्यया ॥ २० ॥

मया कृतानि तंत्राणि संख्ययाष्टोत्तरं शतं ।
येन येन प्रार्थितो ऽहं देवी संप्रार्थिता मया ॥ २१ ॥

देवीभिः प्रमथैर्देवैस्तत्तन्मोक्षश्चतुर्विधः ।
येन मार्गेण भवति स स मार्गः प्रकाशितः ॥ २२ ॥

तत्रापि तांत्रिका देवा अहंकारेण मोहिताः ।
अन्यान्देवान्विनिंदंति षट्कर्मनिरताः सदा ॥ २३ ॥

कलिना हृतसौभाग्याः स्थाने याने च मैथुने ।
जायंते निरतास्तेन निर्धनाः प्रेतरूपिणः ॥ २४ ॥

दृश्यंते ते कलौ तस्माद्भवद्भिः सम्यगीरितं ।
वेदसारं धर्मसारं तंत्राणां हृदयं परं ॥ २५ ॥

महाकालेन यत्प्रोक्तं पंचमीमुक्तिसाधनं ।
सर्वेषां मेरुतां यातं तत्तंत्रं मेरुसंज्ञितं ॥ २६ ॥

शृण्वंतु तद् दृश्यमानं मनो दत्त्वा पृथक् पृथक् ।
पृच्छया निजसंदेहं दूरीकुर्वंत्वशंकिताः ॥ २७ ॥ °

Some idea of the contents of the work may be formed from the colophons of the different chapters (*prakāśa*): 1. (fol. 5*a*) *vyavasthāprakāśa*; 2. (fol. 13*b*) *saṃskāra*; 3. (fol. 34*a*) *dīkshā*; 4. (fol. 39*a*) *homavidhi*; 5. (fol. 72*a*) *āhnika* (i.e. *āmnāyānāṃ rahasyaṃ*); 6. (fol. 94*a*) *puraścaryā*; 7. (fol. 102*a*) *siddhisthirīkaraṇa*; 8. (fol. 107*b*) *mudrālakshaṇa*; 9. (fol. 114*b*) *pārthivapūjāvidhi*; 10. (fol. 148*a*) *puraścaryā-kaulikācāra*; 11. (fol. 177*a*) *kalisaṃsthitaṃ savidhimantrakathanaṃ*; 12. (fol. 193*a*) *vedamantra*; 13. (fol. 202*a*) *navagrahakathana*; 14. (fol. 208*b*) *pratyaṅgirāmantrakathana*; 15. (fol. 217*b*) *vaidikayantrakathana*; 16. (fol. 224*a*) *dakshiṇāmnāyagaṇapatimantra*; 17. (fol. 245*a*) *ūrdhvāmnāyagaṇapatimantra*; 18. (fol. 250*b*) *pūrvāmnāyagaṇapatimantra*; 19. (fol. 268*a*) *paścimāmnāyagaṇapatimantra*; 20. (fol. 272*a*) *uttarāmnāyagaṇapatimantra*; 21. (fol. 275*a*) *sūryamantra*; 22. (fol. 279*a*) *navagrahamantra*; 23. (fol. 314*a*) *brāhmyādyashṭaśaktimantra*; 24. (fol. 319*b*) *daśadigīśamantra*; 25. (fol. 321*a*) *dīpavidhi*. The 26th *prakāśa* is left unfinished, breaking off after v. 993.

A MS. described in the Cat. of Skr. MSS. in the N.-W. Prov., pt. vi., p. 56, is stated to consist of 35 chapters.

[H. T. Colebrooke.]

2571.

721d. Foll. 27 (besides a *śuddhapattram* to fol. 8); size 16 in. by 5 in.; clear, somewhat small, modern Bengalī writing; thirteen lines in a page.

I. Foll. 1–8*a*. *Bījavyākaraṇa-mahātantra*, a *Tantric* tract, in six chapters, consisting of speculations on the mystic value of the letters of the alphabet, a mystery the knowledge of which is represented as containing the germ of the whole visible and invisible universe. The revelation is, as usual, made by *Mahādeva* to his inquisitive consort.

It begins:

नत्वा ज्ञानमयीं देवीं कालीं ब्रह्माण्डसूतिकां ।
बीजं बीजार्थकं यत्तु शिव आह यथायथं ॥ १ ॥

श्रीपार्वत्युवाच ॥

हे नाथ जगदाधार शम्भो संसारतारक ।
यत्पृच्छाम्यद्य देवेश तन्मे वक्तुं त्वमर्हसि ॥ २ ॥

श्रुतं व्याकरणं देव तर्कं पदर्थसूचकं(?तर्कपद°) ।
पातञ्जलं विशेषं च सांख्यं वेदान्तकं विभो ॥ ३ ॥

सरहस्यं सोपदेशं सर्वमेतद् यथोचितं ।
आगमं निगमं वापि नैगमं वेदमेव वा ॥ ४ ॥

Digitized by Microsoft®

वेदार्थमथ तत्त्वं च यन्त्रं तदुपासकं ।
तस्यार्थमथ तत्त्वं च आभासं विहितं चितेः ॥ ५ ॥
चितेर्महाभासमथ चात्मज्ञानं स्वनुष्ठितं ।
तोयविम्बसमं देहं गेहं वाथ निरर्थकं ॥ ६ ॥ ० ११ ॥
तत्तदन्यच्च मे देव सर्वं कथितवान् पुरा ।
अधुना संप्रवक्ष्यामि दासीत्वात्तव धीमतः ॥ १२ ॥
अतिगुप्ततरं वक्ष्ये तुभ्यं काशीपते वद ।
नो चेत् प्राणान्परित्यज्य यास्यामि ब्रह्म शंकरं॥१३॥०३३॥

Mahādeva at first refuses to reveal to her this mystery of mysteries, but is at last obliged to yield.

शृणु देवि महेशानि कथां कामदुघां नृणां ।
देवानामपि देवेशि सेन्द्रादीनां दिवौकसां ॥ ३४ ॥
आदौ वर्णं वदाम्यद्य स्वरं हलविसूचकं ।
ततो युग्मं वदामि त्वां त्रियुग्मं वा चतुष्टयं ॥ ३५ ॥ ०

Śiva constantly uses the form *dihi* (दिहि दुर्गे, प्रिये दिहि etc.) which the commentary (*śl.* 40) explains by जानीहि.

The last page, containing a few *ślokas* and the colophon, was written by a different hand. It ends:

श्रुत्वा शिवस्य वचनं शिवा दुष्टघनाशिनी ।
नत्वा शम्भुं गतोन्मादा स्वकीयं गृहमागता ॥ ४४ ॥

इत्युमामहेश्वरसंवादे महागुप्ते सर्वशास्त्रोद्धारे ज्ञानकाण्डशेषरहस्ये सर्वकामदे महागमे त्रिशतषष्टितमो गणः समाप्तः ॥

On the back of the last leaf Colebrooke's *Paṇḍit* calls the work *Śaivavyākaraṇa*, for which see no. 2572.

II. Foll. 8*b*–27. [*Mahātantra-*]*Bhāvārthadīpikā*, a commentary on the foregoing tract, by *Rāmānanda Devaśarman Vācaspati Bhaṭṭācārya*, a resident of the country of Khiri, then ruled over by *Caitanyasiṃha* (*Mallamahīndra*).

It begins: ओं गंधाय चंदाय नमः ॥

नत्वात्र कालीं मुण्डालीं* श्रीरामाश्रयवन्दितां ।
बीजव्याकरणादीनां टीकां वक्ति यथामति ॥

श्रीलरामानन्ददेवशर्मा रामपदाश्रयी ।
अत्ययोग्यो ग्रन्थकृतौ मन एतत् प्रवर्तितः† ॥
यावन्ति ग्रन्थसाराणि सन्तीह जगतीपतेः ।
तेषां सारं समुद्धृत्य शिवेनैतत् कृतं पुरा ॥ ०

It ends:

इत्युमामहेश्वरसम्वादे इत्यादयो व्यक्तविशेषणकाः ॥ ० ॥

आगमानां समाकृष्य सारं सारं यथामति ।
कृता टीका मया यत्नात् पठध्वं भावुकाः सदा ॥
श्रीमन्मल्लमहीन्द्रसन्ततिवरश्चैतन्यसिंहो नृपो
धीरः सत्यपरायणो हरिरतो निर्लोभको निःस्पृहः ।
तद्देशे खिरिसंज्ञके‡ निवसति श्रीरामनामा कविः
श्रीमद्रुद्रनिदेशतो विरचिता टीका सता गृह्यतां ॥
प्रकाश्या यत्प्रयासेन टीकेयं देवदुर्लभा ।
रुद्र तं पाहि सततं मच्छिष्यं तनुसंज्ञकं ॥
तद्विद्या वर्धतां नित्यं सदास्तु तन्मतिर्मयि ।
इत्येवं प्रार्थयामि त्वां न चान्यद्विषयं निजं ॥
नाहं द्विजाचाररतो नातिविद्याविनोदधीः ।
न तपस्यायुतो नित्यं न नित्यं गुरुपूजकः ॥
बुद्धाबुद्धौ द्विजौ तुल्यौ तव वेदानुशासनं ।
इति त्वं परिसंभाव्य जायते ते कृपा यदि ॥
श्रीमद्रामपदे भक्तिं देहि रुद्र नमो ऽस्तु ते ।
तया मे धर्मकामार्थमोक्षाः संयान्ति सिद्धतां ॥
तथा भार्यापुत्रपौत्रप्रपौत्रेभ्यः प्रदीयतां ।
न धनं प्रार्थये रुद्र न सुखं वनितादिजं ।
तुभ्यं पूजा राम भक्तिर्मरणं जाह्नवीजले ॥

इति श्रीरामानन्दवाचस्पतिभट्टाचार्यविरचिता महातन्त्रभावार्थदीपिका समाप्ता ॥

[H. T. Colebrooke.]

---

* मुण्डानां आलिः पङ्क्तिर्विद्यते यस्यास्तां । comm.

† ?अत्ययोग्योपि सन् एतद्विषये अर्थात् टीकाकरणविषये मनः प्रवर्तितमित्यर्थः । इति योजना । ननु अत्ययोग्यपदस्य को ऽर्थ इति चेत् । योग्यो ऽर्हः । न योग्यो ऽयोग्य इति० comm.

‡ तन्नामधेयग्रामे स निवसतीति ननु स ग्रामः कस्य देशो विषय इति चेदाह० श्रीमन्मल्ल० । अत एव मल्लो नाम वंशविषयः । अत एव मल्लेषु मल्लवंशेषु ये महीन्द्रा राजानस्ते मल्लमहीन्द्रा इति विग्रहः । ० तेषां सन्ततीनां मध्ये वरः श्रेष्ठो ऽयं चैतन्यसंज्ञ(!) इति चैतन्य इति कृत्वा संज्ञा यस्येति । ते चानित्या इति कप्रत्ययनिषेधः । ० comm.

Digitized by Microsoft®.

2572.

721e. Foll. 28; size 16 in. by 5 in.; clear, modern Bengalī writing; foll. 13–21 by the same hand as the preceding MS.; the rest by a different hand; 13–15 lines in a page.

A commentary (*ṭippanī*), entitled *Bhedikā*, on *Rāmānanda's Bhāvārthadīpikā*, by his pupil *Rāmatanu Śarman.*

It begins:

प्रणम्य विघ्नेशगुरुरमाश्रयं (?*r.* रमेशं)
  श्रीरामचन्द्रं त्रिजगद्वरेण्यं ।
श्रीरामवाचस्पतिपादसारः
  श्रीरामतन्वाह्वक एतदिच्छः(?) ॥
मूको भवति वाचाटः खञ्जः सिन्धुतरे क्षमः ।
श्रीगुरोः कृपया भूयात् शिवेनोक्तं कदा मुधा ॥
वीजव्याकरणं यत्तु त्रिषु लोकेषु दुर्लभं ।
अपारसिन्धुं जानीहि पारावारविवर्जितं ॥
तस्यैव पारावारे मे गुरुः शक्तो ऽपि लक्ष्यते ।
दीपिकैषा कृता येन धन्या मान्या सुरैरपि ॥
तस्याधरसुधापानशालिना काण्डरूपिणा(?) ।
वितन्यते मया किञ्चिद्विभाव्य गुरुपादुका ॥

अथ विघ्नध्वंसाय ओं गंघाय चंदाय नम इति टीकाकृता आदौ लिखितं । तस्यार्थो यथा गं गणेशे इति कोषे वक्ष्यति संप्रदाने घ इति च कारकपादे विधास्यति एवं चं चतुर्वर्गसाधने इति च । अत एव उभयत्र चतुर्थ्येकवचनेन साधनीयं चतुर्वर्गप्रदाय गणेशाय नम इति निष्कृष्टार्थः ॥ ०

The title is given in full on fol. 21*b*: इति श्रीरामतनुशर्मणा श्रीगुरुचरणप्रमाणकेन विरचिता शैवव्याकरणीयसंग्रहभावार्थटीकाटिप्पनी भेदिकेति ॥

It ends: संप्रदानसंज्ञासर्वं हित्वा भक्तेराधिक्यतां दर्शयन्नाह पुनर्भक्तिरिति जाह्नवीजले मरणमिति च प्रार्थनाविरामः ॥ इति श्रीरामतनुशर्मणा गुरुपादसारेण विरचिता षष्ठाध्यायटिप्पनी भेदिका समाप्ता ॥ [H. T. Colebrooke.]

2573.

364. Foll. 271; size 9½ in. by 4 in.; careless, modern Devanāgarī writing; eight lines in a page.

Tantraratna, or *Tantraratnadīpikā*, a compilation of extracts from the principal *Tantras*, on religious rites and ceremonies, by *Kṛishṇa Vidyāvāgīśa Bhaṭṭācārya* of Navadvīpa.

It begins:

नित्यानंदां परां वंदे ब्रह्मरूपां गुणाश्रयां ।
सर्वभूतमयीं देवीं श्रीमत्त्रिपुरसुंदरीं ॥ १ ॥
पुराणकरिणं वंदे गणेशं पार्वतीसुतं ।
यस्य स्मरणमात्रेण विघ्ना दूरीभवंति हि ॥ २ ॥
गुरुदेवं नमस्कृत्य – – – सर्वशारदं ।
यस्य पादरजोभिश्च तीर्थस्नानफलं लभेत् ॥ ३ ॥
आगमांबुनिधिमंथनोद्धतं संस्कृतं निजगुरूपदेशतः ।
तंत्ररत्नमिदमुत्तमं बुधा भावयध्वमपहाय मत्सरं ॥ ४ ॥
असंख्या त्रिपुरा देवी असंख्याता च कालिका ।
वागीश्वरी तथासंख्या तथा च अकुलाकुला ॥ ५ ॥
मातंगिनी चान्नपूर्णा विमला चंडनायिका ।
त्रिपुरैकजटी दुर्गा या चान्या कुलसुंदरी ॥ ६ ॥
वैष्णवं गाणपत्यं च महासौरमतं तथा ।
शैवं शंकरजातं च यत्किंचिद्भूतसंभवं ॥ ७ ॥

With the verses which follow, compare Prof. Bhandarkar's extracts from the *Vāmakeśvaratantra*, Rep. 1883-84, pp. 87, 375; and Aufrecht, Cat. Bodl., no. 169.

चतुःषष्टिश्च तंत्राणि मातृणामुत्तमानि च ।
महामायाशंबरं च योगिनीजालशंबरं ॥ ८ ॥
[तत्त्वशंबर]कं नाम भैरवाष्टकमेव च ।
बहुरूपाष्टकं ज्ञानं जामलाष्टकमेव (*r.* याम०) च ॥ ९ ॥
तत्त्वज्ञानं (चन्द्रज्ञानं Bh., A.) वासुकिं च महासंमोहनं [तथा ।
महाशंखं (महोच्छुष्मं Bh.) महादेवं वातुलं च लयोत्तरं [(नयोत्तरं Bh.) ॥ १० ॥
हृग्भेदं (हृद्भेद Bh., A.) मातृभेदं च गुह्यतंत्रं (गु० Bh., [A.) च कामिकं ।
कलापदं (कलावादं A., कालपादं Bh.) कलासारं [(कालसारं Bh.) तथान्यत्कुब्जिकामतं ॥ ११ ॥
लयोत्तरं (न० Bh., ?मतोत्तरं A.) च विणाख्यं (वीणाख्यं [Bh., वीणातन्त्रं A.) तोतलं तोतलोत्तरं [(तोत्त० Bh., त्रोट० A.) ।
पंचामृतं रूपभेदं भूतोड्डामरमेव च ॥ १२ ॥

Digitized by Microsoft®

कुलसारं कुलोड्डीशं [कुलचूडामणिं तथा] ।
तंत्रं विश्वात्मकं (सर्वज्ञानोत्तरं चैव Bh., A.) देवि
[महापिचुमतं (महापिश्चमतं Bh.) तथा ॥ १३ ॥
महालक्ष्मीमतं देवि सिद्धयोगेश्वरीमतं ।
कुरूपिकाष्टकं देवि रूपिकामतमेव च ॥ १४ ॥
सर्ववीरमते देवी (*r.* °वि) विमलामतमेव च ।
पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरं ॥ १५ ॥
तंत्रं वैशेषिकं ज्ञानं वीरावलिमथापरं ।
अरुणेशं मोहिनीशं (आ° मोदनेशं Bh.) विशुद्धेश्वरमेव
[च ॥ १६ ॥
एतदादीनि तंत्राणि परिलोक्य विचार्य च ।
वैदिकान्वयसंभूतनवद्वीपनिवासिना ॥ १७ ॥
श्रीकृष्णविद्यावागीशभट्टाचार्येण धीमता ।
तंत्राणां सारभूतं च तंत्ररत्नं प्रतन्यते ॥ १८ ॥

हयशीर्षे ॥
जैमिनिः सुगतश्चैव नास्तिको लग्न एव च ।
कपिलश्चाक्षपादश्च षडेते हेतुवादिनः ॥ १९ ॥ °

According to Rāj. Mitra, Notices, i., p. 126, the work consists of five *paṭalas*, treating resp. of secret congregation, time for initiation, mystic diagrams, rituals, and regulation of the breath and gesticulation during worship.

In the present MS., which is not punctuated, the following divisions have been noticed: इति वैदिकश्रीकृष्णविद्यावागीशभट्टाचार्यविरचिते तंत्ररत्ने चक्रविचारो नाम प्रथमपटलः ॥ अथ मासादि निर्णयः ॥ fol. 18*b*; इति दीक्षाविधिः । अथ पुरश्चरणं fol. 83*a*; अथ जपमालासंस्कारः fol. 109*b*; इति शिवावलिः । अथ श्यामाचाराः । fol. 137*a*; इति कालीसपर्या । अथ नित्यहोमविधिः fol. 165*a*; इति भैरवतंत्रे भैरवभैरवीसंवादे कालीकवचं (36 verses) fol. 167*b*; इत्युत्तरतंत्रे कालीप्रस्तावे कालीभैरवसंवादे दक्षिणकलिकाकवचं (83 vv.) fol. 172*a*; इति महाकालविरचितं श्रीदक्षिणकालिकास्वरूपाख्यं स्तोत्रं (22 vv.) fol. 174*b*; इति कालिकाकुलसर्वस्वे शिवपरशुरामसंवादे कालिकानामसहस्रं (स्तोत्रं 221 vv.) fol. 186*b*; इति तारामंत्रप्रकरणं । अथ तारावासना fol. 215*b*; इति शांतिस्तोत्रं (11 vv.) इति श्रीनलतंत्रे परमरहस्ये ताराष्टकं fol. 235*b*; इति शिवशासने तारास्तवः (17 vv.) fol. 237*b*; इत्येकवीराकल्पोक्ततारास्तवः (27 vv.) fol. 239*a*; इति श्रीशंकराचार्यविरचिता तारापञ्चस्फटिका (31 vv.) fol. 241*b*; इति योगिनीमते ताराकवचं (28 vv.) fol. 243*a*; इति भैरवतंत्रे भैरवभैरवीसंवादे ताराकल्पे त्रैलोक्यमोहनं नाम कवचं (39 vv.) fol. 245*b*; इति गोरक्षसंहितायां नीलसरस्वतीकवचं (60 vv.) fol. 249*a*; इति श्रीहरगौरीसंवादे श्रीतारायाः कुलसर्वस्वनाम स्तोत्रं (189 vv.) fol. 259*b*; इति महाचीनक्रमः fol. 260*b*; इति कुमारीपूजा । अथ चितासाधनं fol. 265*b*.

It ends:

एवं शतत्रयादूर्ध्वं देवान्वै तर्पयेज्जलैः ।
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणं ॥
इत्यनेन विधानेन सिद्धिं प्राप्नोति निश्चितं ।
इह भुक्त्वा वरान्भोगानंते याति हरेः पदं ॥

इति वीरसाधनं ॥ Apparently incomplete.

The leaves are marked र° दी° or तं° र° दी, or तं° र° का; and on fol. 1*a* Colebrooke calls the work *Tantradīpikā*.

[H. T. Colebrooke.]

2574.

1582. Foll. 294; size 18¾ in. by 5¼ in.; good Bengalī handwriting of 1790 A.D.; 8 or 9 lines in a page.

Tantrasāra, a summary of *Tantric* cult, compiled by *Krishṇānanda Vāgīśa Bhaṭṭācārya*.

It begins:

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितं ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थगताद्वाक्याज्ज्ञानार्थं प्रतिपद्य च ।
सौकर्यार्थं च संक्षेपात् तन्त्रसारः प्रतन्यते ॥

For an analysis of the work see Aufrecht, Cat. Bodl., no. 149 (cf. Rāj. Mitra, Notices, ii., p. 326; Weber, Berl. Cat., no. 1335). It is variously described as consisting of three (Rāj. M.), four (Aufr.) or five (Weber) sections (*pariccheda*). The colophons of those marked by Aufrecht are found here: I., fol. 31*b*; II.,

Digitized by Microsoft ®

fol. 199*b* इति ° तृतीयः(!) परिच्छेदः (but द्वितीयः MS. B., fol. 157*b*); III., fol. 252*b* इति स्तवककवचपरिच्छेदः ।

The MS. is preceded by a leaf of diagrams, and three leaves containing a list of contents.

It ends (cf. Notices, ii., p. 326):

वेदार्थशास्त्रविपरीतविलोकनेन
प्रायोभवद्यजनलोपमपेक्ष्य मातः ।
तद्गूढकूटविशदीकरणेषु जातान्
मातः क्षमस्व तव पादयुगेषु याते ॥

यद्यन्मया नाथ विमूढबुद्ध्या
स्पष्टीकृतं गुह्यतमं तु तन्त्रे ।
क्षन्तव्यमेतत् करुणानिधान
क्रोधो न चार्हः खलु पामरेषु ॥

इति श्रीमहामहोपाध्यायश्रीकृष्णानन्दभट्टाचार्यविरचितस्तन्त्रसारः समाप्तः ॥

शाके पक्षशशाङ्कसप्तशशभृन्माने भवानीपदा-
म्भोजद्वन्द्वमनुक्षणं सुरसुरद्वेषिव्रजैर्वन्दितं ।
नत्वा फाल्गुनिकद्वितीयदिवसे ऽष्टम्यां तिथौ भार्गवे
वारे जीवनशर्मणा विलिखिता यत्नादियं पुस्तिका ॥

यत्नेन लिखिता पुस्ती येनेयं ह्रियते मम ।
जननी विट्चरी तस्य जनकश्चापि विट्चरः ॥

शकाब्दाः १७१२ ॥ श्रीरामजीवनशर्मणः स्वाक्षरमिदं ॥ श्रीश्रीअनुपूर्णायै नमः ॥

The statement of the Berlin MS., that the work was revised by (*Bhairava*) *Amṛitānanda*, would seem to refer only to that MS. which commences differently from the others.

[?]

2575.

1200. Foll. 255; size 12¼ in. by 4¼ in.; carefully written, in Devanāgarī, towards the end of last century, by two or three different hands; eleven lines in a page.

The same work.

[H. T. Colebrooke.]

2576.

2055. Foll. 193; size 11½ in. by 5¾ in.; Devanāgarī writing of the early part of last century; twelve lines in a page.

Mantramahodadhi, an exposition of *Tantric* worship, in 25 chapters (*taraṅga*), composed, under the patronage of king *Lakshmīnṛisiṃha*, in Saṃvat 1645, by *Mahīdhara*, son of *Rāmabhakta*, and grandson of *Ratnākara*; with the author's own commentary entitled *Naukā*.

See Aufrecht, Cat. Bodl., nos. 154, 155; and the Benares edition of 1862. [Gaikawar.]

2577.

1332. Foll. 137+74; size 11¾ in. by 3¾ in.; Bengalī handwriting of the early part of last century; ten lines in a page.

Mantramahodadhi, followed by the commentary written separately. Some leaves in the latter having apparently been lost, have been replaced in Devanāgarī.

[H. T. Colebrooke.]

2578.

1508b. Foll. 68 (of which foll. 1, 6 and 7 are missing); size 11¾ in. by 4¼ in.; indifferent Devanāgarī writing of 1799 A.D.; thirteen lines in a page.

Mantramahodadhi, without the commentary.

[H. T. Colebrooke.]

2579.

1442d. Foll. 58 (fol. 9 of which is missing, while fol. 29 is double); size 12¼ in. by 4 in.; indifferent, modern Devanāgarī writing (foll. 28 and 29*a* by a different hand); eleven lines in a page.

Mahīdhara's Naukā, without the text.

Rather incorrect.

Digitized by Microsoft®

Some corrupt verses at the end: धातुवक्रमिग-माद्रिभूमिते(!) विक्रमार्कनृपतौ शकेश्वरे। ०॥ विश्वनाथानंद-नाथछात्रः काश्यां सदाशिवः। लिलेखैतां शुभां नौकां टीकां मंत्रमहोदधेः॥ ० were probably copied from a previous MS. [H. T. COLEBROOKE.]

2580.

1426. Foll. 181; size 12¾ in. by 4½ in.; careless, modern Devanāgarī writing (foll. 119–127*a* by a different, regular hand); nine lines in a page.

Mantraratnāvalī, an exposition of *Tantric* rites and formulas in twenty-six(?) chapters (*ullāsa*), compiled, for king *Kīrtisiṃha*, by *Miśra-śrī-Bhāskara*.

It begins: सिद्धिः॥

नत्वा श्रीगुरुकृष्णनाथचरणौ सर्वार्थसिद्धिप्रदौ
विघ्नध्वांतदिवाकरं गणपतिं देवीं च वागीश्वरीं।
यद्ग्रंथेषु सुगोपितं गुरुमुखाद्बुद्ध्वा मुदे मंत्रिणां
सुस्पष्टा क्रियते मयार्चनविधौ श्रीमंत्ररत्नावली॥१॥

अमलकमलनेत्रापूर्णशीतांशुवक्त्राद्
दनुजमनुजदेवैः पूजिता -सिसंघैः।
उदिततरणितेजोमंडलारक्तकांतिर्
दिशतु सकलसिद्धिं सुंदरी साधकेभ्यः॥२॥

सौंदर्ये कीर्तिसिंहो विभववितरणाडंबरे कीर्तिसिंहः
सौंदर्ये कीर्तिसिंहो रिपुबलमथनप्रोद्भतः कीर्तिसिंहः।
सत्कीर्तौ कीर्तिसिंहः सुजनजनमनोवल्लभः कीर्तिसिंहः
सद्विद्याकीर्तिसिंहः त्रिभुवनभवने कीर्तिसिंहात्परः कः
[॥३॥

मिश्रश्रीभास्कराख्येन कीर्तिसिंहस्य चाज्ञया।
मंत्ररत्नावली नाम क्रियते बालबोधिनी॥४॥

तत्रादौ गुरुशिष्यलक्षणमाचक्ष्महे॥

अवदातान्वयः शुद्धः स्वोचिताचारतत्परः।
आश्रमी वेदवित् क्रोधरहितः सर्वशास्त्रवित्॥

श्रद्धावानतसूपरश्च(*r.*०नसूयकः) प्रियवाक् प्रियदर्शनः।
शुचिः सुवेषस्तरुणः(?०षास्तरणः) सर्वभूतसमानधीः॥

श्रीमाननुद्धतमतिः पूर्णाहंताविमर्शकः(!)।
सगुणार्चासुकृतधीः कृतज्ञः शिष्यवल्लभः॥

निग्रहानुग्रहे दक्षो महामंत्रपरायणः।
ऊहापोहप्रकारज्ञः शुद्धाम्नायः कृपालयः॥

इत्यादिलक्षणैर्युक्तो गुरुः स्याद्गरिमानिधिः(!)।
शिष्यः शुद्धान्वयः श्रीमान् कुलीनः प्रियदर्शनः॥

स्पष्टवाक् पुण्यचरितो ऽभ्रांतधीर्दंभवर्जितः।
कामक्रोधपरित्यागी रागी च गुरुपादयोः॥

देवताप्रणतः कायमनोवाग्भिर्दिवानिशं।
निरुजो(*r.* नी०) निर्जिताशेषयाजकः(?०पातकः)
[श्रद्धयान्वितः॥

द्विजदेवपितॄणां च नित्यपूजापरायणः।
युवा विनियताशेषकारणः करुणालयः॥

इत्यादिलक्षणैर्युक्तः शिष्यो दीक्षाधिकारभाक्।
तयोर्वत्सरवासेन ज्ञातान्योन्यस्वभावयोः।
गुरुता शिष्यता वापि नान्यथेति विनिश्चयः॥

इति मंत्रमुक्तावल्यां॥ अथ मंत्रेषु विशेषनिरूपणं॥ ०

अथ बालादिभेदः fol. 3*b*; अथ नक्षत्रप्रकारः fol. 4*a*; अथ ऋणशोधनं fol. 5*b*;—ii. अथ दीक्षाप्रकारः fol. 6*b*; iii. अथ कुंडानि fol. 11*b*; iv. भूमौ श्रीचक्रं पंचवर्णेन पूरयित्वा। अथ वायव्यदेवताया: दीक्षा। fol. 23*a*; v. अथ समयाचारः fol. 31*a*; vi. अथ होमविधिः fol. 33*b*; vii. अथ मंत्राणां दश संस्काराः। fol. 40*b*; viii. यस्मिन्सृष्टिस्थितिध्वं[सि]न्यपिधानानुग्रहात्मकं(!)। कृत्यं पंचविधं शश्वद्भासते(?) तं स्तुमः शिवं॥ ० sets of devotional verses with explanations, fol. 45*a*; ix. अथ मुद्रा fol. 62*a*; x. अथ कूर्मचक्रं fol. 64*a*; xi. विद्यापूजनं fol. 68*b*; xii. (रत्नपूजाविधानं) fol. 71*a*; xiii. अथ काम्यकर्माणि fol. 74*a*; xiv. अथ काम्यकर्महोमः fol. 77*b*; xv. (न्यासविधिः) fol. 82*b*; xvi. (दक्षिणापुण्यं) fol. 98*a*; xvii. अथ वारादीभेदाः (! mainly formulas) fol. 105*b*; xviii. प्राणाग्निहोत्रविधिः fol. 115*b*; xix. do., fol. 120*b*; xx. अथ मातृकामंत्राः fol. 122*b*; xxi. अथ शिरोमंत्राः fol. 127*a*; xxii. अथ भुवनेश्वरीमंत्रविवरणं fol. 133*b*; xxiii. अथ त्वरितामंत्रविवरणं fol. 143*b*; xxiv. अथ दुर्गामंत्राः fol. 156*b*; xxv. अथ गणपतिमंत्राः fol. 165*a*; xxvi. अथ वरमंत्राः fol. 175*b*.

This chapter seems to end fol. 180*b* अग्निजातवेद इहावह सर्वकर्माणि सादय स्वाहा॥२६॥ when there follow three more lines of formulas,

Digitized by Microsoft®

ending इति खडंग ॥ followed by a *śārdrīlavikrīḍita* संसासक्त°, and two *ślokas*, the second of which runs thus :

अमावास्यदिने विप्रान्भोजयेन्मधुरोत्तमैः ।
भक्ष्यभोज्यैर्यथाशक्ति दद्यात्तेभ्यो ऽत्र दक्षिणाः ॥

This is followed by an incomplete *śloka* with a colophon written by a different hand, which is wrong both as to the number of the chapters (21) and the subject treated of.

In the colophon the work is attributed to *Kīrtisiṃha* : इति श्रीमहाराजाधिराजश्रीकीर्तिसिंहविरचितायां मंत्ररत्नावल्यां . . . उल्लासः ॥

The author quotes *Jñānārṇava*, *Jayadrathayāmala*, *Mantramuktāvalī*, *Tantrarāja*, *Pañcarātratantra*, *Prapañcasāra*, *Śāradātilaka* and *Sārasamuccaya*, etc. [H. T. Colebrooke.]

2581.

1197. Foll. 78; size 12½ in. by 4½ in.; careless, modern Devanāgarī writing, by the same hand as the bulk of the preceding MS.; nine lines in a page.

Mantrārādhana-dīpikā, an exposition of *Tantric* formulas, by *Yaśodhara*, son of *Kaṃsāri Miśra*.

Chapters vii.–ix., and part of the xth. Very incorrect.

VII. begins: महितोनलः दोर्षचान्यैपरायणादपरायैहसौ पुनः सदाशिव °

VIII. fol. 15 : अथ शैवमंत्राः ॥ तत्रैकप्रासादमंत्रः । °

IX. fol. 44 : अथ वैष्णवमंत्राः ॥ तत्रादौ रत्नाभिषेको द्वादशाक्षरः । °

It ends (fol. 77*a*): इति श्रीकंसारिमिश्रात्मजयशोधरविरचितायां मंत्राराधनदीपिकायां नवमः प्रकाशः ॥

X. begins : अथाष्टादशाक्षरगोपालमंत्रं ॥ °

The MS. breaks off abruptly with अष्टाक्षम, after which a later hand has added the colophon : इति श्रीकंसारिमिश्रविरचितायां मंत्रदिपिकायां दशमप्रकाशः ॥ [H. T. Colebrooke.]

2582.

968c. Foll. 15; size 7½ in. by 4½ in.; careless Devanāgarī writing of 1753 A.D.; six lines in a page.

Mantramuktāvalī, a short compilation of *Tantric* spells, with directions for the use of them; in very incorrect Sanskrit.

It begins : श्रीभगवान उवाचः ओं अस्य श्रीगुरुर्ब्रह्मा गुरुर्विष्णुर्गुरु देवमहेश्वरं गुरु एवं परं ब्रह्म तस्मै श्रीगुरवे नमः आदित्यवारे मलेछबुद्धि च सोमवारे सर्वसिद्धयः मंगलवारे धनविद्या च बुधवैश्यमेव चः बृहस्पतिवारे शांतिं कृत्वा च शुक्रवारे वैश्य भवेत् शनिवारे गछति वृद्धिपुत्रदाराधनं °

It ends with mystic sets of the figures ८ and ९ in conjunction with the days of the week, thus : रविरात्री ८८८८८८०८८८९९८८८८ रविदिने 17 times ८, etc., शनिदिने 4 ८, 3 ९, 6 ८, 1 ९, ॥ इति श्रीमंत्रमुक्तावली संपूर्णा ॥

[H. T. Colebrooke.]

2583.

1192b. Foll. 70; size 12½ in. by 4⅜ in.; careless Devanāgarī writing, of 1804 A.D.; eight lines in a page.

Dakshiṇāmūrtisaṃhitā, a work on *Tantric* worship by means of mystic formulas. It seems to consist of 64 chapters (*paṭala*), only the first 40 of which are, however, numbered in this MS.

It begins :

श्रीमच्छ्रीकोशहृदयं पंचसिंहासनात्मकं ।
फलं कल्पलतानां च चारुरत्नस्फुरत्कलं ॥ १ ॥

चतुरायतनानंदि चतुराम्नायकोशगं ।
नित्यानंदि परं ब्रह्मधाम नौमि सुखाश्रये ॥ २ ॥

श्रीदेव्युवाच ॥

कृपां कुरु महादेव कृपयानंदसुंदर ।
किंतु ब्रह्ममयं [धाम] श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥

कथं श्रीसहितं देव श्रीकोशहृदयं कथं ।
पंचसिंहासनं सेव्यं कथं कल्पलतात्मकं ॥ ४ ॥

Digitized by Microsoft®

कथं रत्नात्मकं देव कथमायतनात्मकं ।
कथमाम्नायसंसेव्यं कथं नित्यात्मकं प्रभो ॥ ५ ॥
ईश्वर उवाच ॥
एतत्सर्वात्मकं वस्तु त्रिपुरा पर[मे]श्वरी ।
चतुर्लक्ष्मी सेव्यमाना तदा कामदुघा वरा ॥ ६ ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च ।
त्रिशक्तिः सर्वसाम्राज्यलक्ष्मी पंच प्रकीर्तिताः ॥ ७ ॥ °

1. *ekāksharalakshmīpūjāvidhi*; 2. *mahālakshmīpūjā*; 3. *triśaktimahālakshmīyajanavidhi*; 4. *sāmrājyavidyāyajanavidhi*; 5. *ātmāshṭāksharaparajyotirvidyārādhanam*; 6. *praṇavavidyāparanishkalabhedasamārādhanam*; 7. *ajapānāmavidhānam*; 8. *mātṛikāpūjāsādhanavidhi*; 9. *tripureśvarīsamārādhanavidhi*; 10. *kāmeśvarīpūjāvidhi*, etc.

It ends:

जलकेलिं ततः कुर्यात्सार्धं समयिभिः सुखं ।
अन्नदानं प्रकुर्वीत रसैः षड्भिः समन्वितं ॥
एवं यः कुरुते विद्वान् दमनारोपणक्रमं ।
तस्य सांवत्सरी पूजा श्रीविद्याधिष्ठिता भवेत् ॥

इति दक्षिणामूर्तिसंहितायां दमनकरोपणविधानं नाम पटलः समाप्तः ॥ [H. T. Colebrooke.]

2584.

1230a. Foll. 17; size 11 in. by 4½ in.; fairly good, modern Devanāgarī writing; nine lines in a page.

Kāmākhyātantra, a treatise on the worship of *Śakti*, in the form of *Kāmākhyā*, here consisting of 7 *paṭalas*.

It begins: श्रीदेव्युवाच ।
भगवन् सर्वधर्मज्ञ सर्वविद्याप्रिय प्रभो ।
सर्वदानंदहृदय सर्वागमविकाशक ॥
श्रुतानि सर्वतंत्राणि साधनानि च सर्वशः ।
विद्यास्ताः सकला देव फलानि त्वत्प्रसादतः ॥ °

Cf. Rāj. Mitra, Notices, iii., p. 39, where, as in the next MS., the treatise is divided into 9 *paṭalas*.

It ends:

एतत्ते कथितं स्नेहान्न प्रकाश्यं कदाचन ।
गोपनीयं गोपनीयं गोपनीयं सदा प्रिये ॥
पशोरग्रे विशेषेण गोपनीयं प्रयत्नतः ।
भ्रष्टानां साधकानां च सान्निध्ये न वदेदपि ॥
न दद्यात्काणखंजेभ्यो विगीतेभ्यस्तथैव (?ऽविनी°) च ।
उदासीनजनस्यैव सान्निध्ये न वदेदपि ॥
दांभिकाय न दातव्यं नाभक्ताय कदाचन ।
मूर्खाय भावहीनाय दरिद्राय ममाज्ञया ॥
दद्याच्छांताय शुद्धाय कौलिकाय महेश्वरि ।
कालीभक्ताय शैवाय प्रदद्याच्च शिवाज्ञया ॥
अनेन भवमुक्ताय महाकालप्रपूजिने ।
सुरास्त्रीवंदकायाथ शिवाबलिप्रदाय च ॥

इति श्रीकामाख्यातंत्रे पार्वतीश्वरसंवादे (thus always) सप्तमः पटलः ॥ [H. T. Colebrooke.]

2585.

1442b. Foll. 13; size 12¼ in. by 4 in.; very careless, modern Devanāgarī writing; ten lines in a page.

Kāmākhyātantra. The treatise is here divided into 9 *paṭalas*, the first two of which correspond to *paṭ.* 1, and 3 and 4 to *paṭ.* 2, of the preceding MS.

[H. T. Colebrooke.]

2586.

3187. Foll. 29; size 7¾ in. by 6 in.; well written, in Devanāgarī, on European paper (water-mark 1867); ten lines in a page.

Kalpasūtra, a manual of certain *Tantric* rites, ascribed to *Paraśurāma*.

It begins:

श्रीगुरुगणपतीष्टदेवताभ्यो नमः ॥ अथातो दीक्षां व्याख्यास्यामो भगवान्परमशिवभट्टारकः श्रुत्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय स विमर्शया भगवत्या भैरव्या स्वात्मा भिन्नया पृष्टः पंचभिर्मुखैः पंचाम्नायान्परमात्मसाररूपान् प्रणिन्ये तत्रायं सिद्धांतः षट्त्रिंशत्तत्वानि विश्वं शरीरं कंचुकितः शिवो जीवो निष्कंचुकितः परमशिवः स्वविमर्शः

Digitized by Microsoft®

पुरुषार्था वर्णात्मिका नित्याः शब्दा मंत्राणामचिंत्यशक्तिता संप्रदायविश्वासाभ्यां सर्वसिद्धिविश्वासभूयिष्ठं प्रामाण्यं गुरुमंत्रदेवतामनःपवनानामैक्येन भावनादंतरात्मवित्तिरानंदं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं° सर्वेषु दर्शनेषु गुप्तेयं विद्या । तत्र सर्वथा मतिमान्दीक्षेत । दीक्षास्तिस्रः शाक्तिकी शांभवी मांत्री चेति । तत्र शाक्तिकी शक्तिप्रवेशनाच्छांभवी चरणविन्यासान्मांत्री मंत्रोपदिष्ट्या । सर्वाश्च कुर्यादेकैकां वेत्येके । सद्गुरुः क्रमं प्रवर्त्य सांगं हुत्वा तरुणोल्लासवान् शिष्यमाहूय वाससा मुखं बद्ध्वा गणपतिललिताश्यामावार्तालीपरापात्रबिंदुभिस्तमवोक्ष्य सिद्धांतं श्रावयित्वा ॥ तच्छिरसि रक्तशुक्लचरणौ भावयित्वा तदमृतक्षालितं सर्वमलंकुर्यात् °

ब्राह्मे मुहूर्त उत्थाय सहस्रदलकमलकर्णिकामध्यनिविष्टगुरुचरणयुगलविगलदमृतरसविसरपरिप्लुताखिलांगो ° fol. 3*a*; अथ यागविधिः fol. 3*b*; अथ होमविधिं व्याख्यास्यामः fol. 22*b*; अथातः सर्वेषां मंत्राणां सामान्यपद्धतिं व्याख्यास्यामः ॥ fol. 24*b*; भूर्भुवः स्वस्तत्सवितुर्वरेण्यं° प्रचोदयात् । इति त्रिंशार्णा गायत्री ॥ यत इंद्र भयामहे° (*Rigv.* viii. 38, 13) । स्वस्तिदा° (ib. x. 152, 2) । इत्यैंद्री गायत्री ॥ ° खेचराय नमः ॥ ° नमो भगवते श्रीसूर्याय ॥ ° पुंडरीकाक्षाय नमः ॥ पुष्करेक्षणाय नमः ॥ अमलेक्षणाय नमः ॥ कमलेक्षणाय नमः ॥ विश्वरूपाय नमः ॥ श्रीमहाविष्णवे नमः ॥ इति षोडशमंत्रेण समवृष्टिरूपिणी दूरदृष्टिसिद्धिप्रदायकचक्षुष्मती विद्या ° । इति महाव्याधिनाशनी विद्या ॥ °

It ends:

य इमां दशकांडीं महोपनिषदं महात्रैपुरसिद्धांतमालासर्वस्वभूतामहरहरधीते स सर्वयज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति श्रुतमित्युपनिषदिति शिवं ॥ इति श्रीदुष्टक्षत्रियकुलकालांतकरेणुकागर्भसंभूतमहादेवप्रधानशिष्यश्रीनारायणावतारमहामहोपाध्यायश्रीपरशुरामविरचितं कल्पसूत्रं संपूर्णं॥

This seems to be a different treatise from the same author's *Vidyākalpasūtra*, described by Rāj. Mitra, Notices, iv., p. 69.

'This copy was made from an undated Devanāgarī MS. belonging to *Lakshmaṇ Trimbakjī Gaḍgil* of Belgaum, consisting of 39 leaves, about 8″ by 3¾″; and presented to the India Office Library, 23rd Aug. 1878.'

[J. F. FLEET.]

2587.

452b. Foll. 11; size 9½ in. by 5 in.; fair Devanāgarī writing of the latter part of the last century; 12–15 lines in a page.

Mahārasāyanavidhi, also called *Kākacaṇḍeśvarīmata*, a Tantric treatise on quack medicines; deriving its name from *Kākacaṇḍeśvarī* (or *Kākacāmuṇḍā*), a particular form of *Śakti* or *Bhairavī*, to whom *Īśvara*, in a series of conversations, reveals his occult science.

Very incorrect. It begins:

कैलासशिखरासीन[म्] उमासार्धं जगद्गुरुं ।
योगिन्यः कथयं(°नोऽकथयन्) यंत्रं गुह्यागुह्यतरं परं॥१॥
सर्वज्ञानप्रकाशाय सर्वज्ञाः सर्वकृच्छ्रयः(!) ।
एतैः कथे कथं देव त्वया सर्वं ममोपरि(!) ॥ २ ॥

ईश्वर उ° ॥

कंकालिकालरात्रिं च कालचंडाभवांबिका ।
कालिका कालरात्रिं च काकचंडेश्वरीमते ॥ ३ ॥

The numbering of the *ślokas* is discontinued from fol. 6 (after *śloka* 127).

इति (प्रथमः°) चतुर्थः पटलः fol. 4*b*; इति काकचांडेश्वरीमते त्रैलोक्यसुंदरीगुटिका संपूर्णा fol. 5*a*; इति° जारणपटलः fol. 6*b*; इति शाल्मलीकल्पः ° इति ब्रह्मदंडीकल्पः fol. 7*a*; इति काकचांडेश्वरीकल्पः (?) fol. 7*b*; इति हारीतकीकल्पः fol. 8*a*; इति पोटलीपादरसेंद्रं fol. 8*b*; इति° जलूकापटलः fol. 9*a*; इति° तालकेश्वरं fol. 10*b*.

It ends:

सप्तमे सप्तके चैव खेचरी भवति व्यथा ।
अल्पपुन्येन सोध्यंति (!) इदं चैव रसायणं ॥
न कांतेन विना सूतं सूतं कांतिविवर्जितं ।
सतमंसतीदेहेनह (!) पिंडमिवांभसि ॥

इति महारसायनविधिः समाप्तः ॥

[H. T. COLEBROOKE.]

2588.

1248c. Foll. 16; size 9½ in. by 3¾ in.; fairly good Devanāgarī writing of 1777 A.D.; nine lines in a page.

Digitized by Microsoft®

Mantraratnākara, by *Vijayarāmācārya*, pupil of *Caturbhujācārya*. The 13th chapter (of the section) entitled *Kārtavīryamantranirūpaṇa*, containing charms and spells, in the form of prayers addressed to *Kārtavīrya-Arjuna*, king of the Haihaya country, with the view of averting ill-luck of every kind.

It begins:

अथ सर्वेष्टदान् वक्ष्ये कार्तवीर्यमनूत्तमान् ।
यान्समाराध्य मनुजाः साधयंति निजेप्सितं ॥ १ ॥

रौद्री सद्याग्निचंद्राढ्या(!) लक्ष्मीर्वह्नींदुशांतियुक् ।
विधिर्धरेंदुशांत्याढ्या निद्राघ्र्यग्नींदुसंयुता ॥ २ ॥

पाशो मायांकुशं विष्णुप्रिया वर्मास्त्रमीरयेत् ।
कार्तवीर्यार्जुनो रेतो हृदंतः प्रणवादिकः ॥ ३ ॥

It ends:

श्रीफलैः श्रियमाप्नोति पद्मैर्वश्यो भवेन्नृपः ।
किं बहूक्तेन सर्वेष्टं प्राप्नोति साधकोत्तमः ॥ ३१४ ॥

इति श्रीमच्चतुर्भुजाचार्यचरणसरोजनिवसित(मनं)चंचरीकास्वादितचिन्मकरंदश्रीमद्विजयरामाचार्यविरचिते मंत्ररत्नाकरे कार्तवीर्यमंत्रनिरूपणे त्रयोदशस्तरंगः ॥

[H. T. Colebrooke.]

2589.

1717. Foll. 81, 83 and 67; size 9½ in. by 4¼ in.; careless Devanāgarī writing of 1768 A.D.; ten lines in a page.

Śaktisaṃgama-tantrarāja, a spicilegium of abstruse speculations on the transcendent mysteries of *Tantric* belief, in four *khaṇḍas*, only three of which—viz. I., III. (or II.), and IV., consisting of 20, 20, and 11 *paṭalas* resp.—are, however, contained in the present MS.

It begins (with the numbers supplied): श्रीदेव्युवाच ।

अनादिरूप भूतेश शशिशेखर शंकर ।
देवाधिदेव विश्वेश विश्वाराध्य सुरेश्वर ॥ १ ॥

निरंजन निराकार नित्यानंद गुणाकर ।
गुणातीत परस्वामिन्सर्वातीत परात्पर ॥ २ ॥

तत्त्वं श्रुतं जगत्सर्वं स्थावरजंगमादिकं ।
श्रुतानि सर्वतंत्राणि लक्षकोट्यार्बुदानि च ॥ ३ ॥

तंत्रार्णवादिकं देवराज राजेश्वर प्रभो ।
तंत्रराजः श्रुतो देव नानाभेदाश्च संश्रुताः ॥ ४ ॥

रसायनं श्रुतं देव सिद्धयो विविधाः श्रुताः ।
शक्तिसंगमनामानं तंत्रराजोत्तमोत्तमं ॥ ५ ॥

सूचितं देव देवेश मंत्रसिद्ध्यभिधागमे ।
न मह्यं कथितं देव संशयं छेदय प्रभो ॥ ६ ॥

चतुःखंडेन संयुक्तं सर्वसारोत्तमोत्तमं ।
तंत्रं कथय देवेश संप्रदायक्रमागतं ॥ ७ ॥

समग्रं तंत्रराजेंद्रसापेक्षरहितं(?) प्रभो ।
संप्रदायप्रभ्रष्टानां मार्गसंदर्शकारकं ।
कल्यै (!) सिद्धिप्रदं तत्र कथयस्व मम प्रभो ॥ ८ ॥

शिव उवाच ।

तंत्रराजः पूर्वमुक्तः खंडाष्टकसमुज्ज्वलः ।
पूर्वार्धमुत्तरार्धें(!) च सार्धद्वयसमन्वितः ॥ ९ ॥

पूर्वार्धं कादिसंज्ञं तु द्वितीयं हादिसंज्ञकं ।
कादौ तु वेद(*i. e.* 4)खंडानि हादावपि चतुष्टयं ॥ १० ॥

प्रतिखंडं महेशानि त्रिसहस्रं च षट्शतं ।
प्रत्यध्यायं शतश्लोकाः षट्त्रिंशत् पटलानि च* ॥ ११ ॥

इत्येकखंडमित्युक्तमेव खंडाष्टकं विदुः ।
दिव्यौघरचितो यत्र गुरुद्वारा(?) भविष्यति ॥ १२ ॥

शक्तिसंगमनामाख्यं श्रीवृहत्तंत्रराजकं ।
वेदखंडसमायुक्तं षष्टिसाहस्रकं शुभे ॥ १३ ॥

दिव्यौघरचितं तंत्रं सर्वतंत्रोत्तमोत्तमं ।
अत्रादि काल्या रचितं तारारूपं द्वितीयकं ॥ १४ ॥

तृतीयं सुंदरीरूपं चतुर्थी छिन्नमस्तका ।
युगे युगे चंद्रसंख्यं कलौ खंडचतुष्टयं ॥ १५ ॥

षट्शती वत्सरांते तु द्विसप्तत्युत्तरं शिवे ।
आदिर्भवतु देवेशि दिव्यौघाद्वा रतः शिवे ॥ १६ ॥

I. ends:

तत्तत्वं निहनादेवमुखादुच्चार्यते(!) च यत् ।
तदेव सत्यं भवति प्रोत्तस्पर्शं(? *r.* प्रोक्तात्परं) किमिच्छसि॥

इति श्रीमदक्षोभ्यमहोग्रतारासंवादे शक्तिसंगमतंत्रराजे प्रथमखंडे कामधेन्वादियोगे विंशः पटलः समाप्तः ॥

* For the *Kādimata* see no. 2538.

Digitized by Microsoft®

III.(?) begins: देव्युवाच ॥

देवदेवं महादेवं भक्तानुग्रहकारकं ।
अनाद्यंतं पराकाशं तमीडे निर्गुणं विभुं ॥ १ ॥
त्वत्प्रसादान्मया नाथ ज्ञानमागमशासनं ।
कालांतरे समायाते पुनः पृष्टं मया विभो ॥ २ ॥
पूर्णाभिषेकदीक्षा तु कथं भेदत्वमागता ।

ईश्वर उवाच ॥ ०

It ends:

सर्वतंत्रे प्रयुक्तत्वादत्र संक्षेपतो मता (? मया) ।
मंत्रांतरत्वात्कथिता किमन्यत् श्रोतुमिच्छसि ॥

इति श्रीकालीकालसंवादे षट्शाम्भवरहस्ये उड्डंडभैरवीये शक्तिसंगमतंत्रराजे षष्टिसहस्रे धूमावतीकौतुकं संक्षेपविधिर्नाम विंशतितमः पटलः ॥ समाप्तश्चायं ग्रंथः ॥

IV. begins: देव्युवाच ।

देवदेव महादेव सर्वसिद्धिप्रवर्तक ।
तत्त्वं श्रुतं मया सर्वं रहस्यातिरहस्यकं ।
इदानीं वद देवेश रहस्यं परमं विभो ॥

शिव उवाच ।

रहस्यातिरहस्यं च कथं त्वयि निवेद्यतां ।
तथापि तव सद्भक्त्या रहस्यमपि कथ्यते ॥
काली तारा छिन्नमस्ता सुंदरी वगला रमा ।
मातंगिभुवनासिद्धिविद्या (!) च भैरवी तथा ॥ ०

It ends:

गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकं ॥ १०५ ॥
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥

इति श्रीमदक्षोभ्यमहोग्रतारासंवादे तारासूक्ते ब्रह्मजातिवर्णने एकादशः पटलः ११ समाप्तः ॥ संवत् १८१५ ॥

Cf. Rāj. Mitra, Notices, i., p. 229; Bik. Cat., p. 606; where *khaṇḍa* I. is said to consist of 20; II. of 65; III. of 19; IV. of 11 chapters. The opening and concluding couplets of the former MS. agree with those of the present one. [H. T. Colebrooke.]

2590.

1412b. Foll. 16; size 12¾ in. by 4⅞ in.; fair Bengalī handwriting of about 1750 A.D.; twelve lines in a page.

Parātantra, or *Karavīrayāga*, a series of revelations regarding the occult science of *Tantric* worship, in the form of a dialogue between *Īśvara* and *Devī*. Very incorrect.

Whether the title *Kālikulakrama* refers only to the last section of this treatise, or whether it belongs to the whole, as that of a section of a larger work, is not clear.

It begins:

बहुसिद्धि (*r.* सिद्ध) समाकीर्णे श्मशाने करवीरकं (*r.* ०के) ।
तत्र वीरगणाः सर्वे महाभल्लान्त (कल्लोल C.) हूँकृते ॥
निवर्तते महाशत्रुयोगे (निवर्तितमहाचक्रे योगे C.) चिद-
[शडामरे ।
महावृन्दे महास्थाने गणडाकिनि (महास्फारडाकिनीगण
[C.) याचिते ॥

वाह्माद्या (ब्रह्माद्या C.) मातरश्चाष्टौ क्षेत्रेण (!) भैरवादयः ।
गणेशो (०शा C.) वटुकाः सिद्धा मातुश्चक्रे तु मालके
[(मेलके C.) ॥

श्रीनाथादिगणाः [सर्वे] वीरनाथावतारिते ।
सिद्धिनाथावकाशेन संतोषितकुलेश्वरे ॥

सर्वभूषां परित्यज्य सानन्दोल्लासिमानसा ।
श्रीचक्रे स्म स्थितं देवं पृच्छते कुलसुन्दरी ॥

श्रीदेव्युवाच ।

सर्वश्रोतोत्तरं (श्रोत्रोद्भवं C.) ज्ञानं त्वत्प्रसादाच्छ्रुतं मया ।
यामलाष्टकपूर्वं तु तन्त्राण्यनेकधानि च ॥

शिरश्छेदश्च बहुधा महामन्थानषट्ककं (!) ।
मालातन्त्रं च चकार सागराभ्यामिहामतं ॥

चतुर्विंशतिवैलक्ष्मश्रुताः (!) सर्वा विधारिता ।
इदानीं संशयो जातो तवैव वचनात्प्रभो ॥

एषा सा परमा शक्तिर्न द्वितीया परेश्वरी ।
एषा शक्तिर्महामाया विश्वं व्याप्य व्यवस्थिता ॥

नादिर्मध्या न चान्ता तु यया सर्वं प्रवर्तते ।
तथोक्ता न द्वितीया च तन्त्रे कुलमहार्णवे ॥

एषा संधीयते विश्वमेका त्रैलोक्यपूजिता ।
एतदेव तथा (?) ब्राह्मीषडाम्नायः कथं प्रभो ॥

षट्सिंहासनगा देवी नायिकाः षट् प्रकीर्तिताः ।
षडाम्नायविभिन्ना चेदेका सा परमा कथं ॥

Digitized by Microsoft ®

अभिन्ना वाथ भिन्ना च त्वं चेदेव जगत्प्रभो ।
कथमेवापरा शक्तिर्विभिन्ना परमेश्वरी ॥ ०

श्रीसदाशिव उवाच ।

मयि प्रियतमे देवि निशामय वदामि ते ।
गुह्यं गुह्यतमं दिव्यमकथ्यं कथयामि ते ॥
तव स्नेहात्प्रवक्ष्यामि रहस्यं कौलिकाय वै ।
तां नमस्कृत्य वक्ष्यामि विष्णुमायां जगन्मयीं ॥
नारायणीं महामायां प्रकृतिं विश्वरूपिणीं ।
एकापरा परा शक्तिः प्रकृतिर्विश्वमोहिनी ॥
विश्वविमोहिनी सा च वैष्णवी च प्रकीर्तिता ।
धारणाद्धात्रीमित्याहुः पालनां परमेश्वरीं ॥
त्रैलोक्यमोहनान्मायायुता सा प्रकृतिः स्मृता ।
विश्वसंसारणात्सा तु वैष्णवी तु प्रकीर्तिता ॥ ०

इति श्रीपूर्णेश्वरीपूर्वाम्नायः [॥ १ ॥ C.] fol. 2b; इति परातन्त्रे विश्वेश्वरीदक्षिणाम्नायः [॥ २ ॥ C.] fol. 3b; इति° पश्चिमसिंहासनं (पश्चिमाम्नायकुब्जिकादेवी ॥ ३ ॥ C.) fol. 4a; इति परातन्त्रे उत्तराम्नाये कालिकाक्रमः (कालीक्रमः ॥ ४ ॥ C.) fol. 4b; इति परातन्त्रे श्रीविद्याऊर्ध्वाम्नायः (ऊर्ध्वाम्नायत्रिपुरसुन्दरी ॥ ५ ॥ C.) fol. 6b; इति श्रीमहाश्रोतसि शिरश्छेदे करवीरमहायागे परातन्त्रे (परातन्त्रक्रमे C.) द्वादशसाहस्रिकायां षडाम्नायभेदसूत्रं ॥ ६ ॥ ib.; इति श्रीमहाश्रोतसि शि° करवीरयागे परातन्त्रे (परातन्त्रक्रमे C.) क्रमद्वादशसाहस्रिकायां कालीक्रमनिर्णयसूत्रं fol. 11a; इति श्रीभैरवश्रोतसि शि° करवीरयागे परातन्त्रे (परातन्त्रक्रमे C.) परमार्थनिर्णयः 13a.

It ends:

चिद्भिन्ना बहुधा जाता नानाभेदसमाश्रिता ।
एका सा बहुरूपा च जानीयाद्दिव्यचक्षुषा ॥
स एव साधकः श्रेष्ठः सिद्धिज्ञानस्य भाजनं ।
अनुष्ठानरतं सर्वं सिद्धिभागी भवेद्ध्रुवं ॥

इति श्रीभैरवश्रोतसि (इति श्रीश्रोतसि C.) शिरश्छेदे महाकरवीरयागे परातन्त्रे कालीकुलक्रमः समाप्तः ॥

On the back of the last leaf the treatise is called *Karavīratantrakulakarma.*

The Cambridge Library possesses another MS. of this work (Add. 1477; 39 leaves, the second of which is, however, wanting) from which Profs. Aufrecht and Cowell have kindly supplied the various readings noted above.

[H. T. COLEBROOKE.]

2591.

1192c. Foll. 41; size 12½ in. by 4½ in.; indifferent Devanāgarī writing of 1804 A.D.; eleven lines in a page.

Rahasyārṇava, a manual of *Tantric* worship, in 15 chapters (*paṭala*), compiled, under orders of *Jayacandra Navendra* of Trigarta (Lahore), by *Vanamālin*, pupil of *Hṛidayānanda.* The MSS. (esp. the second) are rather incorrect.

It begins (somewhat corrected): श्रीपरदेवतायै नमो नमः ॥

सुधासारेण सिंचंतीं कंठनीलं सदाशिवम् ।
नवीनजलदश्यामां विघ्नेशजननीं नुमः ॥ १ ॥
नमामि जालपां देवीं कालपाशनिकृंतनीं ।
ब्रह्मेशविष्णुनमितां क्षिप्रसिद्धिप्रदायिनीं ॥ २ ॥
गुरुं च हृदयानन्दं सर्वशास्त्रविशारदं ।
शिवरूपं नतो नित्यं मंत्राणां विदधातु नः ॥ ३ ॥
जयचंद्रनरेंद्रस्य त्रिगर्तेशस्य चाज्ञया ।
विदुषां साधकानां च प्रीतये वनमालिना ॥ ४ ॥
सिद्धिप्रदः सदा तेषां पशूनां च विषप्रदः(!) ।
श्रीरहस्यार्णवो ग्रंथस्तन्यते सरसो मया ॥ ५ ॥
सप्रमाणं सतर्कं च विदुषां वचनादपि ।
भावचूडामणिं ज्ञात्वा तंत्रचूडामणिं तथा ॥ ६ ॥
कुलचूडामणिं चैव ज्ञानार्णवं च भैरवीं ।
कुलार्णवं वीरतंत्रं समयाचारमुत्तमं ॥ ७ ॥
गांधर्वमत्स्यसूक्तं च नीलतंत्रं ततः परं ।
एकवीरां समालोक्य तन्त्रार्णवं च भैरवं ॥ ८ ॥
अन्येषां च मतं ज्ञात्वा साधकानां हिताय च ।
गुरुक्रमविधानं च भावश्च त्रिविधस्तथा ॥ ९ ॥
कुमारीपूजनं चैव कुलाचारस्ततः परं ।
पीठपूजाविधिश्चैव निशीथसाधनं ततः ॥ १० ॥
पाण्डवैः पूजनं चैव द्रौपदीसंस्कृतिस्ततः ।
पुरश्चर्याक्रमश्चैव बलिदानविधिस्ततः ॥ ११ ॥
रहस्यातिरहस्यं च साधनं सर्वसिद्धिदं ।
विभूतिधारणं चैव स्वंतयोगविधिस्तथा ॥ १२ ॥
योगश्चैव यथान्यायं ग्रंथे ऽस्मिंस्तन्यते मया ।
एनं विज्ञाय यो मर्त्यः कुरुते साधनं सदा ॥ १३ ॥

Digitized by Microsoft®

शंकरस्य प्रतिज्ञैषा तस्य सिद्धिः करे स्थिता ।
ततो गुरुक्रमं वक्ष्ये यथावदनुपूर्वशः ॥ १४ ॥
तदुक्तं भावचूडामणौ । °

1. *Gurunirṇaya*, fol. 4*b*; 2. *bhāvanirṇaya*, fol. 8*a*; 3. *kumārikākalpa*, fol. 9*b*; 4. *samayācāra*, fol. 10*a*; 5. *pīṭhapūjā*, fol. 10*b*; 6. *niśīthapūjāpaddhati*, fol. 11*a*; 7. *pāṇḍavamahāpūjāpaddhati*, fol. 22*a*; 8. *draupadīsaṃskṛiti*, fol. 23*b*; 9. *chinnādipaṭala*, fol. 28*b*; 10. *puraścaryākrama*, fol. 35*a*; 11. *balidānavidhi*, fol. 36*b*; 12. *vibhūtidhāraṇavidhi*, fol. 37*b*; 13. *antaryāgavidhi*, fol. 39*a*; 14. *yogavaraṇam*, fol. 39*b*; 15. *rahasyoktadravyaśodhanavidhānam*; ends: अनंतरं श्रीपात्रं गृहीत्वा शांतिपठनं । तर्पणं च तत्त्वेन ईशस्वरूपमात्मानं स्वकुर्यात् (!) ॥ हरिमीडे ॥ °

इति श्रीवनमाल्याचार्यश्रीरहस्योक्तद्रव्यशोधनविधानं पंचदशः पटलः ॥ This colophon has caused the alternative title of *Dravyaśodhana* being wrongly ascribed to the whole work.

The colophons usually run thus: इति श्रीवनमाल्याचार्यसंगृहीते रहस्यार्णवे °

[H. T. COLEBROOKE.]

2592.

581d. Foll. 50; size 12¼ in. by 4½ in.; fairly written in Devanāgarī, by several hands, in 1800 A.D.; eleven lines in a page.

The same work. Both MSS. seem to have been transcribed from the same original.

[H. T. COLEBROOKE.]

2593, 2594.

705, 706. Foll. 1–150, 151–293; size 16¼ in. by 4½ in.; clear Bengalī handwriting of about 1700 A.D.; nine lines in a page.

Śivarahasya, an extensive work on Śiva-worship. The complete work consists of 12 parts (*aṃśa*), only one of which, the seventh, is contained in these volumes.

It begins: ऋषय ऊचुः ।
सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्युपायं वदास्मभ्यं कृपालो मुनिसत्तम ॥
कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा ।
स्यातव्यं कुत्र वा नित्यं किं वा सर्वार्थसाधकं ॥

सूत उवाच ।
धन्यान्मन्यामहे नूनमनन्यशरणान्मुनीन् ।
वनाशिनो वनावासान्युष्मानन्यूनकल्मषान् ॥
भवद्भिः सर्ववेदार्थतत्त्वज्ञानमकल्मषैः ।
परात्परतरः शर्वः सर्वदा पूज्यते धिया ॥
भवद्भिः सर्ववेदार्थो ज्ञात एवास्ति यद्यपि ।
तथापि किंचिद्वक्ष्यामि यथा ज्ञातं मया तथा ॥
पुरा कैलासशिखरे सुखासीनं जगत्प्रभुं ।
वेदान्तवेद्यमीशानं शङ्करं लोकशङ्करं ॥
विश्वतश्चक्षुषं देवं विश्वतोमुखमव्ययं ।
विश्वतोबाहुमाराध्यं विश्वतःपादमीश्वरं ॥
निष्कलं निर्गुणं शान्तं निरवद्यमनामयं ।
निष्प्रपञ्चं निराकारं निर्मलं निरुपाधिकं ॥
शर्वं प्रसन्नवदनं सर्वाभरणभूषितं ।
गौरीभूषितवामाङ्गं ब्रह्मविष्ण्वादिसेवितं ॥
अप्रमेयजगज्जन्मस्थितिसंहारकारणं ।
सोमसूर्याग्निनयनं सोमार्धकृतशेखरं ॥
विल्वचन्दनलिप्ताङ्गं नरविल्वदलार्चितं ।
व्याघ्रचर्मपरीधानमनन्तेन्दुरविप्रभं ॥
नानामणिगणाकीर्णं किरीटकटकावृतं ।
दयासुधार्द्रनयनं वरदा(*r.* दो)भयपाणिनं ॥
निजसंतोषपूर्णाङ्गमुमालिङ्गितविग्रहं ।
विलोक्यातीव संतुष्टः षण्मुखः साम्बमीश्वरं ॥
मत्वा कृतार्थमात्मानं प्रणिपत्य सदाशिवं ।
पप्रच्छ सर्वलोकानां मुक्त्युपायं कृताञ्जलिः ॥
विश्वेश्वर महादेव विष्णुब्रह्मादिवन्दित ।
देवानां मानवानां च किं मोक्षस्यास्ति साधनं ॥
तव नामान्यनन्तानि सन्ति यद्यपि शङ्कर ।
तथापि तानि भव्यानि न ज्ञायन्ते मयाधुना ॥
प्रियाणि शिवनामानि सर्वाणि शिव यद्यपि ।
तथापि कानि रम्याणि तेषु प्रियतमानि ते ॥

Digitized by Microsoft®

तानि सर्वार्थदान्यद्य कृपया वक्तुमर्हसि ।
यन्नामस्मरणादेव सद्यो मुच्यते पातकैः ॥
रसनारससारज्ञा त्वन्नामामृतपायिनी ।
यस्यास्ति स पुमान्धन्यो मान्यो ह्यमनुजैरपि ॥
जन्मान्तरसहस्रेषु तप्तं यदि तपस्तदा ।
त्वन्नामस्मरणायत्तं चित्तं जन्तोः प्रजायते ॥
महेशनामामृतदिव्यधारापरिप्लुताङ्गोदरमध्यगोऽपि ।
न शोकमाप्नोति नरो यतो हंसरक्षितो वह्निगतः शिवेन॥
यतो विभूतिकवचाः शिवनामास्त्रपाणयः ।
चत्वारो ह्यसुरानीकैश्चक्रुर्युद्धं पुरा मुदा ॥
ब्रह्महत्यासहस्राणि सम्यक्कृत्वापि पुक्कसः ।
शिवेति नाम विमलं श्रुत्वा मोक्षं गतः पुरा ॥
ये ते ऽपि प्रमथाः शुद्धाः शिवनामामृताशनाः ।
इन्द्राद्यर्चितपादाब्जा वसन्ति शिवसन्निधौ ॥
शिवनामैव संसारमहारोगौघशामकं ।
नान्यत्संसाररोगस्य शामकं दृश्यते मया ॥
शिव शङ्कर विश्वेश महादेवेति यन्मया ।
पूर्वमुच्चरितं युद्धे जयस्तेनाभवन्मया ॥
शङ्करेश महेशेति नाम दिव्यं महावने ।
पुरा श्रुतं पिशाचेन ततस्तस्मात्स मोचितः ॥
समस्तवेदवेदान्तसारभूतं शिवप्रदं ।
शिवनामामृतं दिव्यं पेयं सर्वार्थसाधकं ॥
ये संततं शङ्करमादरेण मनःसरोजासनसंनिविष्टाः ।
ध्यायन्ति शम्भुं स्मरणानुषक्तास्त एव धन्याः शिवसंमताश्च ॥
शिवनामामृतापुष्टरसनाः शिवपूजकाः ।
शिवध्यानरता नित्यं सन्ति धन्याः क्वचित्क्वचित् ॥
इत्युक्त्वा वेपमानाङ्गः प्रणिपत्य पुनः शिवं ।
कुमारः पार्श्वतस्तस्थौ नतमूर्धा कृताञ्जलिः ॥

सूत उवाच ।

कुमारेणोदितां वाचं सर्वलोकहितावहां ।
श्रुत्वा प्रसन्नवदनस्तमुवाच सदाशिवः ॥

शिव उवाच ।

साधु साधु कुमाराद्य सम्यक् पृष्टं त्वयाधुना ।
यदिदानीं त्वया पृष्टं तद्वक्ष्ये शृणु सादरं ॥
एवमेव पुरा गौर्या पृष्टः काश्यामहं सदा ।
समाख्यातं मया सम्यक् सर्वेषां मोक्षसाधनं ॥
दिव्यान्यनन्तनामानि सन्ति तन्मध्यगं परं ।
अष्टोत्तरसहस्रं तु नाम्नां प्रियतरं मम ॥
एकैकमेव तन्मध्ये नाम सर्वार्थसाधकं ।
मयापि नाम्नां सर्वेषां फलं वक्तुं न शक्यते ॥
तिलाक्षतैर्बिल्वपत्रैः कमलैः कोमलैर्नवैः ।
पूजयिष्यति मां भक्त्या यस्त्वेतन्नामसंख्यया ॥
स पापेभ्यः संसृतेश्च मुच्यते नात्र संशयः ।
ततो ममान्तिकं याति पुनरावृत्तिदुर्लभं ॥ ०

The *saptamāṃśa*, according to a MS. in Rāj. Mitra's Notices, i., p. 123, consists of 29 *adhyāyas*. The present MS., however, terminates abruptly in the 25th *adhyāya*; and the colophon of some of the others also is wanting.

I. इति श्रीशिवरहस्ये सप्तमांशे स्कन्दसदाशिवसंवादे मुख्यशिवसहस्रनामकथनं नाम प्रथमोऽध्यायः ॥ fol. 10*b*.

II. beg.: ऋषय ऊचुः ।

त्वत्प्रसादाद्वयं सूत निष्पापाः स्मो न संशयः ।
धन्याः कृतास्त्वया नूनं सत्कथाश्रवणाद्वयं ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये काशीप्रशंसा नाम द्वितीयो ऽध्यायः ॥ fol. 14*a*.

III. beg.: पार्वत्युवाच ।

देवोत्तमाखिलाराध्य विश्वेश शिव विश्वग ।
श्रुता पुण्यकथा रम्या त्वत्प्रसादान्मनोहरा ॥
त्वन्मुखाम्भोजविलसत्कथापुष्परसं पुनः ।
मच्चेतश्चञ्चरीको ऽयं पातुमिच्छति शङ्कर ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये तृतीयो ऽध्यायः ॥ fol. 18*b*.

IV. beg.: श्रीशिव उवाच ।

कथामन्यां प्रवक्ष्ये ऽहं शृणु सादरमम्बिके ।
यत्कथाश्रवणादेव सद्यो मुच्येत पातकैः ॥
शिवस्थानान्यनेकानि सन्ति काश्यां वरानने ।
तेषां संख्या मया सम्यक्कर्तुमेव न शक्यते ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये चतुर्थो ऽध्यायः ॥ fol. 23*a*.

V. beg.: श्रीपार्वत्युवाच ।

महेशाखिलदेवेश काशीवासरतैर्नरैः ।
प्रत्यहं नियतं काश्यां किं कर्तव्यं वद प्रभो ॥

Col.: इति° काशीमाहात्म्ये काशीवासनियमविधिकथनं° fol. 29*a*.

Digitized by Microsoft®

VI. beg.: पार्वत्युवाच ।

शिव कल्याणद श्रीमन्सर्वज्ञामितविक्रम ।
ज्ञानवापीति संज्ञेयमस्याः कथमभूद्वद ॥

Col.: इति° शिवगौरीसंवादे काशीज्ञानवापीप्रशंसा° fol. 33*b*.

VII. beg.: पार्वत्युवाच ।

विश्वेश्वराखिलाराध्य सर्वज्ञ करुणानिधे ।
क्व मुक्तिमण्डपस्थानं तत्प्रमाणं कियन्मतं ॥

Col.: इति° काशीमाहात्म्ये मुक्तिमण्डपाख्यानं° fol. 37*a*.

VIII. beg.: पार्वत्युवाच ।

शिवानन्दमयानन्त ज्ञानवापीतटे शुभे ।
केन पुण्यप्रभावेन दण्डपाणिः स्थिरं स्थितः ॥

Col.: इति° काशीमाहात्म्ये दण्डपाणीतिहासकथनं° fol. 40*a*.

IX. beg.: शिव उवाच ।

कथामन्यां प्रवक्ष्ये ऽहं श्रोत्रानन्दकरीं परां ।
शृणु यत्नेन विमलामम्बिके पापहारिणीं ॥
पुरा कश्चिद् द्विजाधीशः पूर्वजन्मतपोबलात् ।
काशीं संप्राप्य मामर्च्यमभ्यर्च्य विधिपूर्वकं ॥
उपित्वैकदिनं दीनः क्षुधार्त्तो ऽस्तङ्गते रवौ ।
वीरेश्वरालये रम्ये निद्रां कर्तुं समाययौ ॥

Col.: इति° वीरेश्वरेतिहासकथनं° fol. 43*b*.

X. beg.: शिव उवाच ।

अन्यामपूर्वामनघां कथां वक्ष्ये शुभप्रदां ।
यत्कथाश्रवणात्सद्यो मुच्यते सर्वबन्धनात् ॥
काश्यां पशुपतीशस्य स्थानमस्त्युत्तमं शुभे ।
नित्यं संनिहितस्तत्र निवसाम्यहमादरात् ॥
महापाशुपतैरत्र वसतिः क्रियते सदा ।
शैवशास्त्रप्रणेतारः सन्ति तत्रैव कोटिशः ॥

Col.: इति° काशीमाहात्म्ये पशुपतीश्वरेतिहासकथनं° fol. 63*b*.

XI. beg.: शिव उवाच ।

ओंकारं नाम विमलं क्षेत्रं काश्यां वरानने ।
सर्वपापक्षयकरं तिष्ठत्येकं शुभप्रदं ॥
(? ends fol. 69*b*).

XII. col.: इति° काशीमाहात्म्ये शिवगौरीसंवादे द्वादशो ऽध्यायः fol. 99*a*. (At fol. 81*a* *Vishṇu* is introduced worshipping *Śiva*).

XIII. beg.: ऋषय ऊचुः ।

सूत वेदार्थतत्त्वज्ञ काशीतत्त्वं यथार्थतः ।
यथा ज्ञातं तथैवोक्तं त्वयास्मभ्यं प्रयत्नतः ॥
वयं प्रणीताः सर्वे ऽपि त्वत्प्रसादान्मुनीश्वराः ।
तत्त्वावबोधाद्यः कृतस्त्वयास्मासु कृपानिधे ॥

Colophon of XIII. and XIV. wanting; XV. ends fol. 109*a*.

